न्यायबिन्दुटीका ।

धर्मोत्तराचार्यकृता ।



THE NYĀYABINDU-TIKA,

BY

DHARMOTTARA ĀCHĀRYA.

PREFACE

The circumstances under which this ancient treatise on logic is now for the first time published, as a number of the Calcutta *Bibliotheca Indica*, should interest even the general reader The first to make known to us so much as the name of the author, the Ācharya Dharmottara, was the Russian scholar W Wassiljew. During a ten years' residence at Pekin (1840–1850) Wassiljew devoted himself to the study at first hand of Buddhism, fired, as he tells us, with the hope of affording proof that the "Russians too could do something for learning" Wassiljew did much He would appear to have already mastered both the Chinese and the Tibetan languages, and with these keys he unlocked the vast stores of Buddhist tradition in Northern Asia That tradition is not indigenous, and the books in which it is preserved are for the most part translations from Sanskrit If we can conceive a state of things in which the whole of the New Testament, lost for ages, and perhaps for ever, in the original Greek, should have been suddenly recovered, in the form of a translation into old Gothic, we shall appreciate the service Wassiljew did to the study of Buddhism

In his first publication 'Buddhism, its Dogmas, History and Literature'[1] Wassiljew had a good deal to tell us of the Buddhist ächārya or teacher, Dharmottara The Dharmottarīya school, so called after its founder Dharmottara or Uttaradharma, was one of eleven schools into which the great Sthavira sect of Buddhists was ultimately subdivided (pp 253, 256) Along with three of these schools the follow-

[1] Der Buddhismus, seine Dogmen, Geschichte und Literatur St Peters burg, 1860 I use this German translation

ers of Dharmottara asserted that "it was possible for those who had been saved again to fall" (p 279) Lastly, in a very important passage, which can only be generally referred to here, Wassiljew brings together the names Dignāga, Dharmakīrti, Śāntideva and Dharmottara in a way which has special significance for our book (p 318)

One of the Tibetan works used by Wassiljew, and of which he had already in 1860 prepared a translation into Russian, was Tāranātha's history of Buddhism, known pretty generally now from Max Muller's references to it in his 'India what can it teach us?' (Note on the Renaissance of Sanskrit Literature) Schiefner, the translator into German of Wassiljew's first work, published the Tibetan text of Tāranātha in 1868 and independent translations into Russian and German, by Wassiljew and Schiefner respectively, appeared in 1869 In his book Schiefner was able to use the greater part of Wassiljew's notes, and at p 330 of the German work it will be found that Schiefner corrects from Wassiljew his own translation of a passage in which, according to Wassiljew, Dharmottara is referred to Schiefner adds the information that the Tibetan Tandjur[1] contains, among other works by Dharmottara, one entitled the Nyāyabindutīkā

Now this Nyāya-bindu-tīkā of Dharmottarāchārya is the book which I have the good fortune to offer here to scholars in its lost Sanskrit original form For the circumstances under which the then unique MS of the work (written Samvat 1229 = A D 1173) was discovered among the palm-leaf MSS preserved in the Jain temple of Śāntinātha,

[1] "The Tibetan Tandjur is a compilation in Tibetan of all sorts of literary works, written mostly by ancient Indian Pandits and some learned Tibetans in the first centuries after the introduction of Buddhism into Tibet, commencing with the seventh century of our era The whole makes 225 volumes" Csoma Korosi, quoted in Weber's History of Indian Literature, p 209, note

Cambay, I may be permitted to refer to my Third Report [1] The publication of the book is due to the liberality of the Asiatic Society of Bengal Observing from the Annual Address of the President of that Society that it was intended to publish some of the Tibetan texts collected by Csoma Korosi and Hodgson, side by side with their Sanskrit originals, I offered to edit in that way Dharmottara's book This has unfortunately not been found practicable, but the search for Dharmottara's work in its Tibetan form has at least revealed the fact that the Society possesses a work of the same name by the better known author, Dharmakīrti [2] Both books are of course commentaries (tīkās) on a work entitled the Nyāyabindu. and it is to be hoped that Dharmakīrti's books will ultimately be made available, if not in Sanskrit, at least in a translation from the Tibetan.

---

[1] "No 215 is a Buddhist work, the only Buddhist book in this library and Dharmottarāchārya's commentary on the Nyāyabindu my colleagues in these studies, if I may permit myself that expresson, will sympathise with the feelings with which I came upon it I have already tried to convey to the reader something of that sense of ruin and desolation which must flow into the mind of him who, in this empty temple, turns over these buried records of human faith and love and sorrow Here in the midst of it all is one solitary survival of a still older faith, of a yet greater religion I turn the page and read

Jayanti jāti-vyasana-prabandha-
prasūti hetor jagato vijetuh
rāgādy arāteh Sugatasya vācho
manas tamas tānavam ādadhānāh

• The world breeds nothing but a chain of evils that begin with birth but He has overcome the World It is He that fighteth for us His words lighten the darkness of our souls Glory to Buddha.

A Third Report of operations in search of Sanskrit MSS in the Bombay Circle. Trubner & Co , 1887

[2] For this Buddhist writer see Aufrecht in the Indische Studien, XVI, 201 (the passage is given in English in Peterson and Durgaprasād's Subhāshitāvli of Vallabhadeva, Introduction, p 46)

The first of the three chapters into which this book is divided had already been printed from the Cambay palm-leaf MS. (A), when I was very unexpectedly put in possession of a second MS. For this find I was indebted to Mr Bhagvandas Kevaldas, the well-known agent for the search for Sanskrit MSS in the Bombay Presidency. Mr Bhagvandas noticed that the Bhao Daji collection of MSS belonging to the Bombay Branch of the Royal Asiatic Society contained a work styled, in the Catalogue, Laghu-Dharmottara-Sūtra. We sent for that book and found to our delight that it contained a second copy of Dharmottara's commentary on the Nyāya-bindu, and a copy of the text of the Nyāya-bindu itself (B). This discovery has very greatly lightened the task of editing the book. I have also, through it, been able to present at the end of the commentary the work to which it refers.

In reviewing my Third Report, Dr Buhler was disposed to think that the Nyāyabindutīkā of my Cambay MS. must be identical with a Dharmottara-vritti which he saw in Jesalmir, and of which he had a copy made for the Bombay Government collection. This has not turned out to be the case, but the Jesalmir MS. is nevertheless of great importance to us. It is not Dharmottara's book, but a commentary upon that by a writer whose name is not given. Unfortunately it is a mere fragment, extending only to p. 20 of this edition of the Nyāyabindutīkā. In a paper, read before the Bombay Branch of the Royal Asiatic Society, I have put together the information contained in the Jesalmir fragment, and have shown in particular that, according to the anonymous commentator, Dharmottara had three predecessors in his task of commenting on these old sūtras, Vinītadeva, Śāntibhadra, and Dharmakīrti. As this last writer is known to have written a commentary on a work by Dignāga, who is supposed to have been a contemporary of Kālidāsa's, we

obtain from this statement something in the nature of a clue to Dharmottara's date But for this, and some speculations as to the authorship of sūtras held in such high honour by a succession of famous Buddhist writers, I must take leave here to refer to my paper, which will appear in the forthcoming number of the Society's Journal

The two MSS on which this edition is thus based have been very carefully collated by me in collaboration with my Shāstrī, Mr Syamji Valji, whose assistance I desire cordially to acknowledge We cannot hope that our text is absolutely correct But we have spared no pains to make it as correct as we could

I had intended to furnish this edition with full notes, but I soon found that the only satisfactory way of explaining a text, which is in places very obscure, would be to attempt a complete translation I had made considerable progress with a translation when an unexpected opportunity of attending the Stockholm Orientalist Congress rendered it advisable to lay that undertaking aside for the time The book itself will, I am confident, have great interest for students of Buddhism and of Hindu Philosophy, and I have ventured to solicit permission, which has been kindly given, to dedicate it to the august and learned Patron of the Assembly I cannot refrain from adding that to me, the son of a Shetlander, it is as great a pleasure as it is an honour, to present this venerable relic of old-world thought to the Sovereign of Norway and Sweden

P PETERSON

Bombay, July 24th, 1889

न्यायबिन्दुटीका ।

प्रथमपरिच्छेदः ।

जयन्ति जातिव्यसनप्रबन्ध-
प्रस्खलितहेतोर्जगतो विजेतुः ।
रागाद्यरातेः सुगतस्य वाचो
मनस्तमस्तानवमादधानाः ॥

सम्यग्ज्ञानपूर्विका सर्वेत्यादिनाऽस्य प्रकरणस्याभिधेयप्रयोजन-
मुच्यते । द्विविधं हि प्रकरणशरीरं शब्दोऽर्थश्चेति । तत्र शब्दस्य
स्वाभिधेयप्रतिपादनमेव प्रयोजनम् । नान्यत् । अतस्तन्न निरूप्यते ।
अभिधेयं तु यदि निष्प्रयोजनं स्यात्तदा तत्प्रतिपत्तये शब्द-
संदर्भोऽपि नारम्भणीयः स्यात् । यथा काकदन्तप्रयोजनाभावान्न
तत्परीक्षारम्भणीया प्रेक्षावता । तस्मादस्य प्रकरणस्यारम्भणी-
यत्वं दर्शयताऽभिधेयप्रयोजनमनेनोच्यते । यस्मात्सम्यग्ज्ञानपूर्विका
सर्वपुरुषार्थसिद्धिस्तस्मात्तत्प्रतिपत्त्यर्थमिदमारभ्यत इत्ययमत्र

वाक्यार्थः। अत्र च प्रकरणाभिधेयस्य सम्यग्ज्ञानस्य सर्वपुरुषार्थसिद्धिहेतुत्वं प्रयोजनमुक्तम्। अस्मिंश्चार्थ उच्यमाने संबन्धप्रयोजनाभिधेयान्युक्तानि भवन्ति। तथा हि पुरुषार्थोपयोगि सम्यग्ज्ञानं व्युत्पादयितव्यमनेन प्रकरणेनेति ब्रुवता सम्यग्ज्ञानस्य शब्दसंदर्भस्याभिधेयं तद्व्युत्पादन प्रयोजन प्रकरणं चेदमुपायो व्युत्पादनस्येत्युक्तं भवति। तस्मादभिधेयभागप्रयोजनाभिधानसामर्थ्यात्संबन्धादीन्युक्तानि भवन्ति। न त्विदमेकं वाक्यं संबन्धमभिधेयं प्रयोजनं च वक्तुं साक्षात्समर्थम्। एकं तु वदत्तयं सामर्थ्याद्दर्शयति। तच्च तदित्यभिधेयपदम्। व्युत्पाद्यत इति प्रयोजनमिदम्। प्रयोजनं चाच्च वक्तुः प्रकरणकरणव्यापारस्य चिन्यते श्रोतुश्च श्रवणव्यापारस्य। तथा हि सर्वे प्रेक्षावन्तः प्रवृत्तिप्रयोजनमन्विष्य प्रवर्तन्ते। तत आचार्येण प्रकरणं किमर्थं कृतं श्रोतृभिश्च किमर्थं श्रूयत इति संशयव्युत्पादन प्रयोजनमभिधीयते। सम्यग्ज्ञानं व्युत्पद्यमानानामात्मानं व्युत्पादक कर्तुं प्रकरणमिदं कृतं शिष्यैश्चाचार्यप्रयुक्तामात्मनो व्युत्पत्तिमिच्छद्भिः प्रकरणमिदं श्रूयत इति प्रकरणकरण-श्रवणयोः प्रयोजन व्युत्पादनम्। संबन्धप्रदर्शनपदं तु न विद्यते। सामर्थ्यादेव तु स प्रतिपत्तव्यः। प्रेक्षावता हि सम्यग्ज्ञानव्युत्पादनाय प्रकरणमिदमारभ्यमानेऽयमेवोपायो नान्य इति दर्शित एवोपायोपेयभावः प्रकरणप्रयोजनयोः संबन्ध इति। ननु च प्रकरणश्रवणात्प्रागुक्तान्यप्यभिधेयादीनि प्रमाणाभावात्प्रेक्षावद्भिर्न गृह्यन्ते। तत्किमेतैरारम्भप्रदर्शनमात्रोक्तैः। सत्यमश्रुते प्रकरणे कथितान्यपि न निश्चो-

यन्ते। उक्तेषु त्वप्रमाणकेष्वप्यभिधेयादिषु संशय उत्पद्यते। संशयाच्च प्रवर्तन्ते। अर्थसंशयोऽपि हि प्रवृत्त्यङ्गम्। प्रेक्षावतामनर्थसंशयो निवृत्त्यङ्गम्। अत एव शास्त्रकारेणैव पूर्वं संबन्धादीनि युज्यन्ते वक्तुम्। व्याख्यातॄणां हि वचनं क्रीडार्थमन्यथापि संभाव्यते। शास्त्रकृतां तु प्रकरणारम्भे न विपरीताभिधेयाद्यभिधाने प्रयोजनमुत्पश्यामो नापि प्रवृत्तिम्। अतस्तेषु संशयो युक्तः। अनुक्तेषु तु प्रतिपत्तृभिर्निष्प्रयोजनमभिधेयं संभाव्येताऽस्य प्रकरणस्य काकदन्तपरीक्षाया इव। अशक्यानुष्ठानं वा। ज्वरहरतक्षकचूडारत्नालंकारोपदेशवत्। अनभिमतं वा प्रयोजनम्। माहविवाहक्रमोपदेशवत्। अतो वा प्रकरणाल्लघुतरोपायः प्रयोजनस्य। अनुपाय एव वा प्रकरणं संभाव्येत। एतासु चानर्थसंभावनास्वेकस्यामप्यनर्थसंभावनायां न प्रेक्षावन्तः प्रवर्तन्ते। अभिधेयादिष्वर्थसंभावनाऽनर्थसंभावनाविरुद्धोत्पद्यते तया तु प्रेक्षावन्तः प्रवर्तन्त इति प्रेक्षावतां प्रवृत्त्यङ्गमर्थसंभावनां कर्तुं संबन्धादीन्यभिधीयन्त इति स्थितम्। अविसंवादकं ज्ञानं सम्यग्ज्ञानम्। लोके च पूर्वमुपदर्शितमर्थं प्रापयन्संवादक उच्यते। तद्वज्ज्ञानमपि प्रदर्शितमर्थं प्रापयत्संवादकमुच्यते। प्रदर्शिते चार्थे प्रवर्तकत्वमेव प्रापकत्वम्। नान्यत्। तथा हि न ज्ञानं जनयदर्थं प्रापयति। अपि त्वर्थे पुरुषं प्रवर्तयत्प्रापयत्यर्थम्। प्रवर्तकत्वमपि प्रवृत्तिविषयप्रदर्शकत्वमेव। नहि पुरुषं हठात्प्रवर्तयितुं शक्नोति विज्ञानम्। अत एव चार्थाधिगतिरेव प्रमाणफलम्। अधिगते चार्थे प्रवर्तितः पुरुषः प्रापितश्चार्थः। तथा च सत्यर्थाधिगमा-

त्समाप्तः प्रमाणव्यापारः। अत एवानधिगतविषयं प्रमाणम्। येनैव हि ज्ञानेन प्रथममधिगतोऽर्थस्तेनैव प्रवर्तितः पुरुषः प्रापितश्चार्थः। तत्रैवार्थे किमन्येन ज्ञानेनाधिकं कार्य्यम्। ततोऽधिगतविषयमप्रमाणम्। तत्र योऽर्थो दृष्टत्वेन ज्ञातः स प्रत्यक्षेण प्रवृत्तिविषयीकृतः। यस्माद्यस्मिन्नर्थे प्रत्यक्षस्य साक्षात्कारित्वव्यापारो विकल्पेनानुगम्यते तस्य प्रदर्शकं प्रत्यक्षम्। तस्माद्दृष्टतया ज्ञातः प्रत्यक्षदर्शितः। अनुमानं तु लिङ्गदर्शनान्निश्चित्यप्रवृत्तिविषयं दर्शयति। यथा च प्रत्यक्षं प्रतिभासमानं नियतमर्थं दर्शयति। अनुमानं च लिङ्गसंबन्धं नियतमर्थं दर्शयति। अत एते नियतस्यार्थस्य प्रदर्शके। तेन ते प्रमाणे। नान्यद्विज्ञानम्। प्राप्तुं शक्यमर्थमादर्शयत्प्रापकम्। प्रापकत्वाच्च प्रमाणम्। आभ्यां प्रमाणाभ्यामन्येन च ज्ञानेन प्रदर्शितोऽर्थः कश्चिदत्यन्तविपर्यस्तः। यथा मरीचिकासु जलम्। स चासत्त्वात्प्राप्तुमशक्यः। कश्चिदनियतो भावाभावयोः। यथा संशयार्थः। न च भावाभावाभ्यां युक्तोऽर्थो जगत्यस्ति। ततः प्राप्तुमशक्यस्तादृशः। सर्वेण चालिङ्गजेन विकल्पेन नियामकमदृष्ट्वा प्रवृत्तेन भावाभावयोरनियत एवार्थो दर्शयितव्यः। स च प्राप्तुमशक्यः। तस्मादशक्यप्रापणमत्यन्तविपरीतं भावाभावनियतं चार्थं दर्शयदप्रमाणमन्यज्ज्ञानम्। अर्थक्रियार्थिभिश्चार्थक्रियासमर्थार्थप्राप्तिनिमित्तं ज्ञानं मृग्यते। यच्च तैर्मृग्यते तदेव शास्त्रे विचार्यते। ततोऽर्थक्रियासमर्थवस्तुप्रदर्शकं सम्यग्ज्ञानम्। यच्च तेन प्रदर्शितं तदेव प्रापणीयम्। अर्थाधिगमात्मकं हि प्रापकमित्युक्तम्।

तच्च प्रदर्शितादन्यदस्तु भिन्नाकारं भिन्नदेशं भिन्नकालं च। विरुद्धधर्मसंसर्गाद्वान्यदस्तु। देशकालाकारभेदश्च विरुद्धधर्मसंसर्गः। तस्मादन्याकारवदस्तुग्राहि नाकारान्तरवति वस्तुनि प्रमाणम्। यथा पीतशङ्खग्राहि शुक्ले शङ्खे। देशान्तरस्थग्राहि च न देशान्तरस्थे प्रमाणम्। यथा कुम्बिकाविवरदेशस्थायां मणिप्रभायां मणिग्राहि ज्ञानं नापवरकदेशस्थे मणौ। कालान्तरयुक्तग्राहि च न कालान्तरवति वस्तुनि प्रमाणम्। यथार्धरात्रे मध्याह्नकालवस्तुग्राहि स्वप्नज्ञानं नार्धरात्रकाले वस्तुनि प्रमाणम्। ननु देशनियतमाकारनियतं च प्रापयितुं शक्यं यत्कालं तु परिच्छिन्नं तत्कालं न शक्यं प्रापयितुम्। नोच्यते यस्मिन्नेव काले परिच्छिद्यते तस्मिन्नेव काले प्रापयितव्यमिति। अन्यो हि दर्शनकालोऽन्यश्च प्राप्तिकालः। किं तु यत्कालं परिच्छिन्नं तदेव प्रापणीयम्। अभेदाध्यवसायाच्च संतानगतमेकत्वं द्रष्टव्यमिति।

सम्यग्ज्ञान पूर्वं कारणं यस्याः सा तथोक्ता। कार्य्यात्पूर्वं भवत्कारणं पूर्वमुक्तम्। कारणशब्दोपादाने तु पुरुषार्थसिद्धेः साक्षात्कारणं गम्येत। पूर्वशब्दे तु पूर्वमात्रम्। द्विविधं च सम्यग्ज्ञानम्। अर्थक्रियानिर्भासम्। अर्थक्रियासमर्थं च प्रवर्तकम्। तयोर्यत्प्रवर्तकं तदिह परीक्ष्यते। तच्च पूर्वमात्रम्। न तु साक्षात्कारणम्। सम्यग्ज्ञाने हि सति पूर्वदृष्टस्मरणम्। स्मरणादभिलाषः। अभिलाषात्प्रवृत्तिः। प्रवृत्तेश्च प्राप्तिः। ततो न साक्षाद्धेतुः। अर्थक्रियानिर्भासे तु यद्यपि साक्षात्प्रवृत्तिस्तथापि तन्न परीक्षणीयम्।

यचैव हि प्रेक्षावन्तोऽर्थिनः साशङ्कास्तत्परीक्ष्यते। अर्थक्रिया-निर्भासे च ज्ञाने सति सिद्धः पुरुषार्थः। तेन तत्र न साशङ्का अर्थे ज्ञाते। अतस्तन्न परीक्षणीयम्। तस्मात्परीक्षार्हमसाक्षात्कारण सम्यग्ज्ञानमादर्शयितुं कारणशब्दं परित्यज्य पूर्वग्रहणं कृतम्।

पुरुषस्यार्थः। अर्थ्यत इत्यर्थः। काम्यत इति यावत्। हेयोऽर्थ उपादेयो वा। हेयो ह्यर्थो हातुमिष्यते। उपादेयोऽप्युपादातुम्। न च हेयोपादेयाभ्यामन्यो राशिरस्ति। उपेक्षणीयो ह्यनुपादेय-त्वाद्धेय एव। तस्य सिद्धिर्हानमुपादानं च। हेतुनिबन्धना हि सिद्धिरुत्पत्तिरुच्यते। ज्ञाननिबन्धना तु सिद्धिरनुष्ठानम्। हेयस्य हानमनुष्ठानम्। उपादेयस्य चोपादानम्। ततो हेयोपादेययो-र्हानोपादानलक्षणानुष्ठितिः सिद्धिरित्युच्यते।

सर्वा चासौ पुरुषार्थसिद्धिश्चेति। सर्वशब्द इह द्रव्यकात्स्न्र्ये वृत्तो न प्रकारकात्स्न्र्ये। ततो नायमर्थः। द्विप्रकाराऽपि सिद्धिः सम्यग्ज्ञाननिबन्धनेति। अपि त्वयमर्थः। या काचित्सिद्धिः सा सर्वा कृत्स्नैवासौ सम्यग्ज्ञाननिबन्धनैवेति। मिथ्याज्ञानाद्धि काकतालीयाऽपि नास्त्यर्थसिद्धिः। तथा हि यदि प्रदर्शितमर्थं प्रापयत्येवं ततो भवत्यर्थसिद्धिः। प्रदर्शितं च प्रापयत्सम्यग्ज्ञान-मेव। प्रदर्शितं चाप्रापयन्मिथ्याज्ञानम्। अप्रापकं च कथमर्थ-सिद्धिनिबन्धनं स्यात्। तस्माद्यन्मिथ्याज्ञानं न ततोऽर्थसिद्धिः। यतश्चार्थसिद्धिस्तत्सम्यग्ज्ञानमेव। अत एव सम्यग्ज्ञानं यत्नतो व्युत्पादनीयम्। यतस्तदेव पुरुषार्थसिद्धिनिबन्धनम्। ततो यावद्भूयात्पुरुषार्थसिद्धिः सम्यग्ज्ञाननिबन्धनैवेति तावदुक्तं सर्वा

सा सम्यग्ज्ञानपूर्विकेति। इतिशब्दस्तस्मादित्यस्मिन्नर्थे। यत्त-
दोश्च नित्यमभिसंबन्धः। तदयमर्थो तस्मात्सम्यग्ज्ञानपूर्विका
सर्वपुरुषार्थसिद्धिरुक्तस्मात्तद्व्युत्पाद्यते। यद्यपि च समासे गुणीभूतं
सम्यग्ज्ञानं तथापीह प्रकरणे व्युत्पादयितव्यत्वात्प्रधानम्। तत-
स्तस्यैव तच्छब्देन संबन्धः। व्युत्पाद्यत इति विप्रतिपत्तिनिराकरणेन ५
प्रतिपाद्यते व्युत्पाद्यत इति। चतुर्विधा चात्र विप्रतिपत्तिः। संख्या-
लक्षणगोचरफलविषया। तत्र संख्याविप्रतिपत्तिं निराकर्तुमाह।
द्विविधमिति। द्वौ विधौ प्रकारावस्येति द्विविधम्। संख्याप्रदर्शन-
द्वारेण च व्यक्तिभेदो दर्शितो भवति। द्वे सम्यग्ज्ञानव्यक्ती इति।
व्यक्तिभेदे प्रदर्शिते प्रतिव्यक्तिनियतं सम्यग्ज्ञानलक्षणमाख्यातुं १०
शक्यम्। अप्रदर्शिते तु व्यक्तिभेदे सकलव्यक्त्यनुयायि सम्यग्ज्ञान-
लक्षणमेकं न शक्यं वक्तुम्। ततो लक्षणभेदकथनाङ्गमेव संख्याभेद-
कथनम्। अप्रदर्शिते व्यक्तिभेदात्मके संख्याभेदे लक्षणभेदस्य दर्शयि-
तुमशक्यत्वात्। लक्षणनिर्देशाङ्गत्वादेव च प्रथमं संख्याभेदकथनम्।

किं पुनस्तद्द्विविधमित्याह। प्रत्यक्षमिति। प्रतिगतमाश्रित- १५
मक्षम्। अत्यादयः क्रान्ताद्यर्थे द्वितीययेति समासः। प्राप्तापन्ना-
लंगतिसमासेषु परवल्लिङ्गप्रतिषेधात्। अभिधेयवल्लिङ्गे सति सर्व-
लिङ्गः प्रत्यक्षशब्दः सिद्धः। अक्षाश्रितत्वं च व्युत्पत्तिनिमित्तं
शब्दस्य। न तु प्रवृत्तिनिमित्तम्। अनेन लक्षाश्रितत्वेनैकार्थसम-
वेतमर्थसाक्षात्कारित्वं लक्ष्यते। तदेव शब्दस्य प्रवृत्तिनिमित्तम्। २०
ततश्च यत्किंचिदर्थस्य साक्षात्कारिज्ञानं तत्प्रत्यक्षमुच्यते। यदि
लक्षाश्रितत्वमेव प्रवृत्तिनिमित्तं स्यादिन्द्रियज्ञानमेव प्रत्यक्ष-

सुच्येत। न मानसादि। यथा गच्छतीति गौरिति गमनक्रियायां व्युत्पादितोऽपि गोशब्दो गमनक्रियोपलक्षितमेकार्थसमवेतं गोत्वं प्रवृत्तिनिमित्तीकरोति। तथा च गच्छत्यगच्छति च गवि गोशब्दः सिद्धो भवति।

मीयतेनेनेति मानम्। करणसाधनेन मानशब्देन सारूप्यलक्षणं प्रमाणमभिधीयते। लिङ्गग्रहणसंबन्धस्मरणस्य पश्चान्मानमनुमानम्। गृहीते पक्षधर्मे स्मृते च साध्यसाधनसंबन्धेऽनुमानं प्रवर्तत इति पश्चात्कालभावयुच्यते। चकारः प्रत्यक्षानुमानयोस्तुल्यबलत्वं समुच्चिनोति। यथार्थाविनाभावित्वादर्थं प्रापयत्प्रत्यक्षं प्रमाणम्। तद्वदर्थाविनाभावित्वादनुमानमपि परिच्छिन्नमर्थं प्रापयत्प्रमाणमिति। तत्रेति सप्तम्यर्थे वर्तमानो निर्धारणे वर्तते। ततोऽयं वाक्यार्थः। तत्र तयोः प्रत्यक्षानुमानयोरिति समुदायनिर्देशः। प्रत्यक्षमित्येकदेशः। तत्र समुदायात्प्रत्यक्षत्वजात्येकदेशस्य पृथक्करणं निर्धारणम्। तत्र प्रत्यक्षमनूद्य कल्पनापोढत्वमभ्रान्तत्वं च विधीयते। यत्तद्भवतामस्माकं चार्थेषु साक्षात्कारिज्ञानं प्रसिद्धं तत्कल्पनापोढाभ्रान्तत्वयुक्तं द्रष्टव्यम्। न चैतन्मन्तव्यं कल्पनापोढाभ्रान्तत्वं चेदप्रसिद्धं किमन्यत्प्रत्यक्षस्य ज्ञानस्य रूपमवगिष्यते। यत्प्रत्यक्षशब्दवाच्यं सदनूद्येतेति। यस्मादिन्द्रियान्वयव्यतिरेकानुविधायर्थेषु साक्षात्कारिज्ञानं प्रत्यक्षशब्दवाच्यं सर्वेषां सिद्धम्। तदनुवादेन कल्पनापोढाभ्रान्तत्वविधिः। कल्पनाया अपोढमपेतं कल्पनापोढम्। कल्पनास्वभावरहितमित्यर्थः। अभ्रान्तमर्थक्रियाक्षमे वस्तुरूपेऽविपर्यस्तमुच्यते। अर्थक्रियाक्षमं वस्तुरूपं संनिवेशोपाधि-

धर्मात्मकम्। तच्च यन्न भ्राम्यति तदभ्रान्तम्। एतच्च लक्षणद्वयं विप्रतिपत्तिनिराकरणार्थम्। न त्वनुमाननिवृत्त्यर्थम्। यतः कल्पनापोढग्रहणेनैवानुमानं निवर्तितम्। तत्रासत्यभ्रान्तग्रहणे गच्छद्वृक्षदर्शनादि प्रत्यक्षं कल्पनापोढत्वात्स्यात्। ततो हि प्रवृत्तेन वृक्षमात्रमवाप्यत इति संवादकत्वात्सम्यग्ज्ञानम्। कल्पनापोढत्वाच्च प्रत्यक्षमिति स्यादाशङ्का। तन्निवृत्त्यर्थमभ्रान्तग्रहणम्। तद्धि भ्रान्तत्वान्न प्रत्यक्षम्। चिरूपलिङ्गजत्वाभावाच्च नानुमानम्। न च प्रमाणान्तरमस्ति। अतो गच्छद्वृक्षदर्शनादि मिथ्याज्ञानमित्युक्तं भवति। यदि मिथ्याज्ञानं कथं ततो वृक्षावाप्तिरिति चेत्। न ततो वृक्षावाप्तिः। नानादेशगामी हि वृक्षस्तेन परिच्छिन्नः। एकदेशनियतश्च वृक्षोऽवाप्यते। ततो यद्देशो गच्छद्वृक्षो दृष्टस्तद्देशो नावाप्यते। यद्देशश्चावाप्यते स न दृष्ट इति। न तस्मात्कश्चिदर्थोऽवाप्यते। ज्ञानान्तरादेव तु वृक्षादिरर्थोऽवाप्यते। इत्येवमभ्रान्तग्रहणं विप्रतिपत्तिनिरासार्थम्। भ्रान्तं ह्यनुमानम्। स्वप्रतिभासेऽनर्थेऽध्यवसायेन प्रवृत्तत्वात्। प्रत्यक्षं तु ग्राह्ये रूपे न विपर्यस्तम्। न त्वविसंवादकमभ्रान्तमिह ग्रहीतव्यम्। यतः सम्यग्ज्ञानमेव प्रत्यक्षम्। नान्यत्।

तच्च सम्यग्ज्ञानत्वादेवाविसंवादकत्वे लब्धे पुनरविसंवादकग्रहणं निष्प्रयोजनमेव। एवं हि वाक्यार्थः स्यात्। प्रत्यक्षाख्यं यदविसंवादकं ज्ञानं तत्कल्पनापोढमविसंवादकं चेति। न चानेन द्विरविसंवादग्रहणेन किंचित्। तस्माद्ग्राह्येऽर्थक्रियाचक्षे वस्तुरूपे यदविपर्यस्तं तदभ्रान्तमिह वेदितव्यम्।

कीदृशी पुनः कल्पनेह गृह्यत इत्याह। अभिलाप इति। अभिलाप्यतेऽनेनेति अभिलापो वाचकः शब्दः। अभिलापेन संसर्ग एकस्मिञ्ज्ञानेऽभिधेयाकारस्याभिधानाकारेण सह ग्राह्याकारतया ग्रीलनम्। ततो यदैकस्मिञ्ज्ञानेऽभिधेयाभिधानयोराकारौ संनिविष्टौ भवतस्तदा संसृष्टेऽभिधानाभिधेये भवतः। अभिलापसंसर्गार्थं योग्योऽभिधेयाभासो यस्यां प्रतीतौ सा तथोक्ता। तत्र काचित्प्रतीतिरभिलापेन संसृष्टाभासा भवति। यथा व्युत्पन्नसंकेतस्य घटार्थकल्पना घटशब्दसंसृष्टार्थावभासा भवति। काचित्त्वभिलापेनासंसृष्टाप्यभिलापसंसर्गयोग्याभासा भवति। यथा बालकस्याव्युत्पन्नसंकेतस्य कल्पना। तत्राभिलापसंसृष्टाभासा कल्पनेत्युक्तावव्युत्पन्नसंकेतस्य न संगच्छेत। योग्यग्रहणे तु सापि संगच्छते। यद्यप्यभिलापसंसृष्टाभासा न भवति तदर्हजातस्य कल्पना। अभिलापसंसर्गयोग्यप्रतिभासा तु भवत्येव। या चाभिलापसंसृष्टा साऽपि योग्या। तत उभयोरपि योग्यग्रहणेन संग्रहः।

असत्यभिलापसंसर्गे कुतो योग्यतावसितिरिति चेत्। अनियतप्रतिभासत्वात् अनियतप्रतिभासत्वं च प्रतिभासनियमहेतोरभावात्। ग्राह्यो ह्यर्थो विज्ञानं जनयन्नियतप्रतिभासं कुर्यात्। यथा रूपं चक्षुर्विज्ञानं जनयन्नियतप्रतिभासं जनयति। विकल्पविज्ञानं त्वर्थान्नोत्पद्यते। ततः प्रतिभासनियमहेतोरभावादनियतप्रतिभासम्।

कुतः पुनरेतद्विकल्पोऽर्थान्नोत्पद्यत इति। अर्थसंनिधिनिरपेक्षत्वात्। बालोऽपि हि यावद्दृश्यमानं स्तनं स एवायमिति

पूर्वदृष्टत्वेन न प्रत्यवमृशति तावन्नोपरतरुदितो मुखमर्पयति स्तने । पूर्वदृष्टापरदृष्टं चार्थमेकीकुर्वद्विज्ञानममंनिहितविषयम् । पूर्वदृष्टस्यासंनिहितत्वात् । अमंनिहितविषयं चार्थनिरपेक्षम् । अनपेक्षं च प्रतिभासनियमहेतोरभावादनियतप्रतिभासम् । तादृग्गं चाभिलापसंसर्गयोग्यम् । इन्द्रियविज्ञानं तु संनिहित- ५
मात्रग्राहित्वादर्थसापेक्षम् । अर्थस्य च प्रतिभासनियमसेतुत्वा-
न्नियतप्रतिभासम् । ततो नाभिलापसंसर्गयोग्यम् । अत एव स्वलक्षणस्यापि वाच्यवाचकभावमभ्युपगम्यैतद्विकल्पकत्वमुच्यते ।

यद्यपि हि स्वलक्षणमेव वाच्यं वाचकं च भवेत्तथाप्यभिलाप-
संसृष्टार्थं विज्ञानं सविकल्पकम् । न चेन्द्रियविज्ञानमर्थेन नियत- १०
मितप्रतिभासत्वादभिलापसंसर्गयोग्यप्रतिभासं भवतीति निर्विक-
ल्पकम् । श्रोत्रज्ञानं तर्हि शब्दस्वलक्षणग्राहि । शब्दस्वलक्षणं किंचि
द्वाच्यं किंचिद्वाचकमित्यभिलापसंसर्गयोग्यप्रतिभासं स्यात् । तथा
च सविकल्पकं स्यात् । नैष दोषः । सत्यपि स्वलक्षणस्य वाच्यवाचक-
भावे संकेतकालदृष्टत्वेन गृह्यमाणं स्वलक्षणं वाच्यं वाचकं च गृहीतं १५
स्यात् । न च संकेतकालभाविदर्शनविषयत्वं वस्तुनः संप्रत्यस्ति ।
यथा हि संकेतकालभाविदर्शनमद्य निरुद्धं तदुत्तद्विषयत्वमप्यर्थ-
स्याद्य नास्ति । ततः पूर्वकालदृष्टत्वमपश्यच्छ्रोत्रज्ञानं न वाच्यवाचक-
भावग्राहि । अनेनैव न्यायेन योगिज्ञानमपि सकलशब्दार्थाविभा-
सित्वेऽपि संकेतकालदृष्टत्वाग्रहणान्निर्विकल्पकम् । तथा कल्पनया २०
कल्पनास्वभावेन रहितं शून्यं सज्ज्ञानं यदभ्रान्तं तत्प्रत्यक्षमिति
परेण संबन्धः । कल्पनापोढत्वाभ्रान्तत्वे परस्परसापेक्षे प्रत्यक्षलक्षणं

न प्रत्येकमिति दर्शयितुं तया रहितं यदभ्रान्तं तत्प्रत्यक्षमिति लक्षणयोः परस्परसापेक्षयोः प्रत्यक्षविषयत्वं दर्शितमिति। तिमिरमक्षणोर्विप्लवः। इन्द्रियगतमिदं विभ्रमकारणम्। आशुभ्रमणमलातादेः। मन्दं भ्रम्यमाणेऽलातादौ न चक्रभ्रान्तिरुत्पद्यते। तदर्थमाशुग्रहणेन विशेष्यते भ्रमणम्। एतच्च विषयगतं विभ्रमकारणम्। नावा गमनं नौयानम्। गच्छन्त्यां नावि स्थितस्य गच्छद्वृक्षादिभ्रान्तिरुत्पद्यत इति यानग्रहणम्। एतच्च बाह्याश्रयस्थितं विभ्रमकारणम्। संक्षोभो वातपित्तश्लेष्मणाम्। वातादिषु हि क्षोभं गतेषु ज्वलितस्तम्भादिभ्रान्तिरुत्पद्यते। एतच्चाध्यात्मगतं विभ्रमकारणम्। सर्वैरेव च विभ्रमकारणैरिन्द्रियविषयबाह्याध्यात्मिकाश्रयगतैरिन्द्रियमेव विकर्तव्यम्। अविकृत इन्द्रिय इन्द्रियभ्रान्त्ययोगात्। एते संक्षोभपर्यन्ता आद्यो येषां ते तथोक्ताः। आदिग्रहणेन काचकामलादय इन्द्रियस्था गृह्यन्ते। आशुनयनानयनाद्यो विषयस्थाः। आशुनयनानयने हि कार्यमाणेऽलातादावग्निवर्णदण्डाभासा भ्रान्तिर्भवति। हस्तियानाद्यो बाह्याश्रयस्था गाढमर्मप्रहाराद्य आध्यात्मिकाश्रयस्था विभ्रमहेतवो गृह्यन्ते। तैरनाहितो विभ्रमो यस्मिंस्तथाविधं ज्ञानं प्रत्यक्षम्।

तदेवं लक्षणमाख्याय यैरिन्द्रियमेव द्रष्टृ कल्पितं मानसप्रत्यक्षलक्षणे च दोष उद्भावितः स्वसंवेदनं च नाभ्युपगतं योगिज्ञानं च तेषां विप्रतिपत्तिनिराकरणार्थं प्रकारभेदं प्रत्यक्षस्य दर्शयन्नाह। तच्चतुर्विधमिति। इन्द्रियस्य ज्ञानमिन्द्रियज्ञानम्। इन्द्रियाश्रितं यत्तत्प्रत्यक्षम्। मानसप्रत्यक्षे परैर्यो दोष उद्भावितस्तं

निराकर्तुं मानसप्रत्यक्षलक्षणमाह । स्व आत्मीयो विषय इन्द्रिय-
ज्ञानस्य तस्यानन्तरः । न विद्यतेऽन्तरमस्येति । अन्तरं च व्यवधानं
विशेषश्चोच्यते । ततश्चान्तरे प्रतिषिद्धे समानजातीयो द्वितीय-
क्षणभाव्युपादेयक्षण इन्द्रियविज्ञानविषयस्य गृह्यते । तथा च
सतीन्द्रियज्ञानविषयक्षणादुत्तरक्षण एकसंतानान्तर्भूतो गृहीतः । ५
स सहकारी यस्येन्द्रियविज्ञानस्य तत्तथोक्तम् । द्विविधश्च सह-
कारी । परस्परोपकारी एककार्य्यकारी च । इह च क्षणिके
वस्तुन्यतिशयाधानायोगादेककार्य्यकारित्वेन सहकारी गृह्यते ।
विषयविज्ञानाभ्यां हि मनोविज्ञानमेकं क्रियते यतस्तदनयोर्न
परस्परसहकारित्वम् । ईदृशेनेन्द्रियविज्ञानेनालम्बनप्रत्ययभूते- १०
नापि योगिज्ञानं जन्यते । तन्निरासार्थं समनन्तरप्रत्ययग्रहणं
कृतम् । समश्चासौ ज्ञानत्वेनानन्तरश्चासावव्यवहितत्वेन स चासौ
प्रत्ययश्च हेतुत्वात्समनन्तरप्रत्ययः । तेन जनितम् । तदनेनैक-
संतानान्तर्भूतयोरेवेन्द्रियज्ञान-मनोज्ञानयोर्जन्यजनकभावे मनो-
विज्ञानं प्रत्यक्षमित्युक्तं भवति । ततो योगिज्ञानं परसंतानवर्ति १५
निरस्तम् । यदा चेन्द्रियज्ञानविषयादन्यो विषयो मनोविज्ञानस्य
तदा गृहीतग्रहणादासञ्चितोऽप्रामाण्यदोषो निरस्तः । यदा
चेन्द्रियज्ञानविषयोपादेयभूतः क्षणो गृहीतस्तदेन्द्रियज्ञानेना-
गृहीतस्य विषयान्तरस्य ग्रहणादन्धबधिराद्यभावदोषप्रसङ्गो
निरस्तः । एतच्च मनोविज्ञानमुपरतव्यापारे चक्षुषि प्रत्यक्षमिष्यते । २०
व्यापारवति तु चक्षुषि यद्रूपज्ञानं तत्सर्वं चक्षुराश्रितमेव । इतरथा
चक्षुराश्रितत्वानुपपत्तिः कस्यचिदपि विज्ञानस्य । एतच्च

सिद्धान्तप्रसिद्धं मानसं प्रत्यक्षम्। न त्वस्य प्रसाधकमस्ति प्रमाणम्। एवंजातीयकं तद्यदि स्यान्न कश्चिद्दोषः स्यादिति वक्तुं लक्षण-माख्यातमस्येति।

स्वसंवेदनमाख्यातुमाह। चित्तमर्थमात्रग्राहि। चैत्ता विशेषा-वस्थाग्राहिणः सुखादयः। सर्वे च ते चित्तचैत्ताश्च सर्वचित्त-चैत्ताः। सुखादय एव स्फुटानुभवत्वात्स्वसंविदिताः। नान्या चित्तावस्थेत्येतदाशङ्कानिवृत्त्यर्थं सर्वग्रहणं कृतम्। नास्ति सा काचिच्चित्तावस्था यस्यामात्मनः संवेदन न प्रत्यक्षं स्यात्। येन हि रूपेणात्मा वेद्यते तद्रूपमात्मसंवेदन प्रत्यक्षम् इह च रूपादौ वस्तुनि दृश्यमानेऽन्तरः सुखाद्याकारस्तुल्यकालं संवेद्यते। न च ग्रह्यमाणाकारो नीलादिः सातादिरूपो वेद्यत इति वक्तुं शक्यम्। यतो नीलादिः सातरूपेणानुभूयत इति न निश्चीयते। यदि हि सातादिरूपोऽयं नीलादिरनुभूयत इति निश्चीयेत स्यात्तस्य सातादिरूपत्वम्। यस्मिन्रूपे प्रत्यक्षस्य साक्षात्कारित्वव्यापारो विकल्पेनानुगम्यते तत्प्रत्यक्षम्। न च नीलस्य सातरूपत्वमनुगम्यते। तस्मादसातान्नीलाद्यर्थादन्यदेव सातमनुभूयते नीलानुभवकाले। तच्च ज्ञानमेव। ततोऽस्ति ज्ञानानुभवः। तच्च ज्ञानरूपं वेदन-मात्मनः साक्षात्कारि निर्विकल्पकमभ्रान्तं च तस्मात्प्रत्यक्षम्।

योगिप्रत्यक्षं व्याख्यातुमाह। भूतः सद्भूतोऽर्थः। प्रमाणेन दृष्टश्च सद्भूतः। तथा चत्वार्यार्यसत्यानि। भूतार्थस्य भावना पुनःपुनश्चेतसि विनिवेशनम्। भावनायाः प्रकर्षो भाव्यमानार्थाभासस्य ज्ञानस्य स्फुटाभत्वारम्भः। प्रकर्षस्य पर्यन्तो यदा स्फुटाभत्वमौषदमंपूर्ण

भवति। यावद्धि स्फुटाभत्वमपरिपूर्णं तावत्तस्य प्रकर्षगतिः। संपूर्णं तु यदा तदा नास्ति प्रकर्षगतिः। ततः संपूर्णावस्थायाः प्राक्तन्यवस्था स्फुटाभत्वप्रकर्षपर्यन्त उच्यते तस्मात्पर्यन्ताद्यज्ज्ञातं भाव्यमानस्य संनिहितस्येव स्फुटतराकारग्राहि ज्ञानं योगिनः प्रत्यक्षम्। तदिह स्फुटाभत्वारम्भावस्था भावनाप्रकर्षः। अभ्रकव्यवहितमिव यदा भाव्यमान वस्तु पश्यति सा प्रकर्षपर्यन्तावस्था। करतलामलकवद्भाव्यमानस्यार्थस्य यद्दर्शन तद्योगिनः प्रत्यक्षम्। तद्धि स्फुटाभम्। स्फुटाभत्वादेव च निर्विकल्पकम्। विकल्पविज्ञानं हि संकेतकालदृष्टत्वेन वस्तु गृह्णच्छब्दसंसर्गयोग्यं गृह्णीयात्। संकेतकालदृष्टत्वं च संकेतकालोत्पन्नज्ञानविषयत्वम्। यथा च पूर्वोत्पन्नं विनष्टं ज्ञानं संप्रत्यसत्। तद्वत्पूर्वविनष्टज्ञानविषयत्वमपि सप्रति नास्ति वस्तुनः। तदसद्रूपं वस्तुनो गृह्णदसंनिहितार्थग्राहित्वादस्फुटाभम्। अस्फुटाभत्वात्सविकल्पकम्। ततः स्फुटाभत्वान्निर्विकल्पकम्। प्रमाणशुद्धार्थग्राहित्वाच्च संवादकम्। अतः प्रत्यक्षम्। इतरप्रत्यक्षवत्। योगः समाधिः। स यस्यास्ति स योगी। तस्य ज्ञानं प्रत्यक्षम्। इतिशब्दः परिसमाप्त्यर्थः। इयदेव प्रत्यक्षमिति।

तदेवं प्रत्यक्षस्य कल्पनापोढत्वाभ्रान्तत्वयुक्तस्य प्रकारभेद प्रतिपाद्य विषयविप्रतिपत्तिं निराकर्तुमाह। तस्येत्यादि। तस्य चतुर्विधप्रत्यक्षस्य विषयो बोद्धव्यः। स्वलक्षणम्। स्वमसाधारणं लक्षणं तत्त्वं स्वलक्षणम्। वस्तुनो ह्यसाधारणं च तत्त्वमस्ति सामान्यं च यदसाधारणं तत्प्रत्यक्षग्राह्यम्। द्विविधो हि प्रमाणस्य विषयो ग्राह्यश्च यदाकारमुत्पद्यते। प्रापणीयश्च यमध्यवस्यति। अन्यो

हि ग्राह्योऽन्यश्चाध्यवसेयः। प्रत्यक्षस्य हि क्षण एको ग्राह्यः। अध्यवसेयस्तु प्रत्यक्षबलोत्पन्नेन निश्चयेन संतान एव। संतान एव च प्रत्यक्षस्य प्रापणीयः। क्षणस्य प्रापयितुमशक्यत्वात्। तथाऽनुमानमपि स्वप्रतिभासेऽनर्थेऽनर्थाध्यवसायेन प्रवृत्तेरनर्थग्राहि। स पुनरारोपितोऽर्थो गृह्यमाणः स्वलक्षणत्वेनावसीयते यतस्ततः स्वलक्षणमध्यवसित प्रवृत्तिविषयोनुमानस्य। अनर्थस्तु ग्राह्यः। तदत्र प्रमाणस्य ग्राह्यं विषयं दर्शयता प्रत्यक्षस्य स्वलक्षणं विषय उक्तः।

कः पुनरसौ विषयो ज्ञानस्य यः स्वलक्षणं प्रतिपत्तव्य इत्याह। यस्यार्थस्येत्यादि। अर्थशब्दो विषयपर्यायः। यस्य ज्ञानविषयस्य संनिधानं निकटदेशावस्थानम्। असंनिधानं दूरदेशावस्थानम्। तस्मात्संनिधानादसंनिधानाच्च ज्ञानप्रतिभासस्य ग्राह्याकारस्य भेदः स्फुटत्वास्फुटत्वाभ्याम्। यो हि ज्ञानस्य विषयः संनिहितः सन्स्फुटमाभासं ज्ञानस्य करोति। असंनिहितस्तु योग्यदेशावस्थित एवास्फुटं करोति तत्स्वलक्षणम्। सर्वाण्येव हि वस्तूनि दूरादस्फुटानि दृश्यन्ते। समीपे स्फुटानि। तान्येव स्वलक्षणानि।

कस्मात्पुनः प्रत्यक्षविषय एव स्वलक्षणम्। तथा हि विकल्पविषयोऽपि वह्निर्दृश्यात्मक एवावसीयत इत्याह। तदेव परमार्थसदिति। परमार्थोऽकृत्रिममनारोपितं रूपम्। तेनास्तीति परमार्थसत्। य एवार्थः संनिधानासंनिधानाभ्यां स्फुटमस्फुटं च प्रतिभासं करोति परमार्थसन्न एव। स च प्रत्यक्षविषयो यतस्तस्मात्तदेव स्वलक्षणम्।

कस्मात्पुनस्तदेव परमार्थसदित्याह। अर्थक्रेत्यर्थः। क्रेय

उपादेयश्च। हेयो हि हातुमिष्यत उपादेयश्चोपादातुम्। अर्थस्य प्रयोजनस्य क्रिया निष्पत्तिस्तस्यां सामर्थ्यं शक्तिस्तदेव लक्षणं रूपं यस्य वस्तुनस्तदर्थक्रियासामर्थ्यलक्षणम्। तस्य भावः। तस्मादस्तुशब्दः परमार्थसत्पर्यायः। तदयमर्थो यस्मादर्थक्रियासमर्थं परमार्थसदुच्यते संनिधानासंनिधानाभ्यां च ज्ञानप्रतिभासस्य भेदको ऽर्थोऽर्थक्रियासमर्थः। तस्मात्स एव परमार्थसन्। तत एव हि प्रत्यक्षविषयादर्थक्रिया प्राप्यते। न विकल्पविषयात्। अत एव यद्यपि विकल्पविषयो दृश्य द्वावभीयते तथापि न दृश्य एव। ततोऽर्थक्रियाभावात्। दृश्याच्च भावात्। अतस्तदेव स्वलक्षणं न विकल्पविषयम्।

एतस्मात्स्वलक्षणाद्यदन्यत्स्वलक्षणं यो न भवति ज्ञानविषयस्तत्सामान्यलक्षणम्। विकल्पविज्ञानेनावसीयमानो ह्यर्थः संनिधानासंनिधानाभ्यां ज्ञानप्रतिभासं न भिनत्ति। तथा ह्यारोप्यमाणो वह्निरारोपादस्ति। आरोपाच्च दूरस्थो निकटस्थश्च। तस्य समारोपितस्य संनिधानादसंनिधानाच्च ज्ञानप्रतिभासस्य न भेदः स्फुटत्वेनास्फुटत्वेन वा। ततः स्वलक्षणादन्य उच्यते। सामान्येन लक्षणं सामान्यलक्षणम्। साधारणं रूपमित्यर्थः। समारोप्यमाणं हि रूपं सकलवह्निसाधारणम्। ततस्तत्सामान्यलक्षणम्।

तच्चानुमानस्य ग्राह्यं दर्शयितुमाह। सोऽनुमानस्य विषयो ग्राह्यरूपः। सर्वनाम्नोऽभिधेयवल्लिङ्गपरिग्रहः। सामान्यलक्षणम्। अनुमानस्य विषयं व्याख्यातुकामेनायं स्वलक्षणस्वरूपाख्यानग्रन्थ

आवर्तनीयः स्यात्। ततो लाघवार्थं प्रत्यक्षपरिच्छेद एवानुमानविषय उक्तः।

विषयविप्रतिपत्तिं निराकृत्य फलविप्रतिपत्तिं निराकर्तुमाह। तदेवेति। यदेवानन्तरमुक्तं प्रत्यक्षं तदेव प्रमाणस्य फलम्। कथं प्रमाणफलमित्याह। अर्थस्य प्रतीतिरवगमः। सैव रूपं यस्य प्रत्यक्षज्ञानस्य तदर्थप्रतीतिरूपम्। तस्य भावः। तस्मादेतदुक्तं भवति। प्रापकं ज्ञानं प्रमाणम्। प्रापणशक्तिश्च न केवलादर्थाविनाभावित्वाद्भवति। बीजाद्यविनाभाविनोप्यङ्कुरादेरप्रापकत्वात्। तस्मादर्थादुत्पत्तावप्यस्य ज्ञानस्यास्ति कश्चिदवश्यकर्तव्यः प्रापकव्यापारः। येन कृतेनार्थः प्रापितो भवति। स एव च प्रमाणफलम्। यदनुष्ठानात्प्रापकं भवति ज्ञानम्। उक्त च पुरस्तात्प्रवृत्तिविषयप्रदर्शनमेव प्रापकस्य प्रापकव्यापारो नाम। तदेव च प्रत्यक्षमर्थप्रतीतिरूपमर्थदर्शनरूपम्। अतस्तदेव प्रमाणफलम्।

यदि तर्हि ज्ञानं प्रमितिरूपत्वात्प्रमाणफलं किं तर्हि प्रमाणमित्याह। अर्थेन सह यत्सारूप्यं सादृश्यमस्य ज्ञानस्य तत्प्रमाणमिह। यस्माद्विषयाज्ज्ञानमुदेति तद्विषयसदृशं तद्भवति। यथा नीलादुत्पद्यमानं नीलसदृशम्। तच्च सादृश्यमाकार इत्याभास इत्यपि व्यपदिश्यते।

ननु च ज्ञानादव्यतिरिक्तं सादृश्यम्। तथा च सति तदेव ज्ञानं प्रमाणं तदेव प्रमाणफलम्। न चैकं वस्तु साध्यं साधनं चोपपद्यते। तत्कथं सारूप्यं प्रमाणमित्याह। तदग्रादिति।

तदिति सारूप्यं तस्य वशात्सारूप्यसामर्थ्यात् । अर्थस्य प्रतीति-रवबोधस्तस्याः सिद्धिः । तत्सिद्धेः कारणात् । अर्थस्य प्रतीति-रूपं प्रत्यक्षं विज्ञानं सारूप्यवशात्सिध्यति प्रतीतं भवतीत्यर्थः । नीलनिर्भासं हि विज्ञानं यतस्तस्मान्नीलस्य प्रतीतिरवसीयते । येभ्यो हि चक्षुरादिभ्यो विज्ञानमुत्पद्यते । न तद्वशात्तज्ज्ञानं नीलस्य संवेदनं शक्यतेऽवस्थापयितुम् । नीलसदृशं त्वनुभूय-मानं नीलस्य संवेदनमवस्थाप्यते । न चात्र जन्यजनकभाव-निबन्धनः साध्यसाधनभावः । येनैकस्मिन्वस्तुनि विरोधः स्यात् । अपि तु व्यवस्थाप्य-व्यवस्थापकभावेन । तत एकस्य वस्तुनः किंचिद्रूपं प्रमाणं किंचित्प्रमाणफलं न विरुध्यते । व्यवस्थापन-हेतुर्हि सारूप्यम् । तस्य ज्ञानस्य व्यवस्थाप्यं च नीलसंवेदनरूपम् व्यवस्थाप्यव्यवस्थापकभावोऽपि कथमेकस्य ज्ञानस्य चेदुच्यते । सदृशमनुभूयमानं तद्विज्ञानम् । यतो नीलस्य ग्राहकमव-स्थाप्यते निश्चयप्रत्ययेन । तस्मात्सारूप्यमनुभूतं व्यवस्थापनहेतुः, निश्चयप्रत्ययेन च तज्ज्ञानं नीलसंवेदनमवस्थाप्यमानं व्यवस्थाप्यम् । तस्मात्सारूप्यव्यावृत्त्या सारूप्यं ज्ञानस्य व्यवस्थापनहेतुः । अनीलबोधव्यावृत्त्या च नीलबोधरूपत्वं व्यवस्थाप्यम् । व्यव-स्थापकश्च विकल्पप्रत्ययः प्रत्यक्षबलोत्पन्नो द्रष्टव्यः ।

ननु निर्विकल्पकत्वात्प्रत्यक्षमेव नीलबोधरूपत्वेनात्मानमव-स्थापयितुं शक्नोति । निश्चयप्रत्ययेनाव्यवस्थापितं सदपि नील-बोधरूपं विज्ञानमसत्कल्पमेव । तस्मान्निश्चयेन नीलबोधरूपं व्यवस्थापितं विज्ञानं नीलबोधात्मना सङ्गवति । तस्मादध्यव-

सायं कुर्वदेव प्रत्यक्षं प्रमाणं भवति। अकृते त्वध्यवसाये नीलबोधरूपत्वेनाव्यवस्थापितं भवति विज्ञानम्। तथा च प्रमाणफलमर्थाधिगमरूपत्वमनिष्पन्नम्। अतः साधकतमत्वाभावात्प्रमाणमेव न स्याज्ज्ञानम्। जनितेन त्वध्यवसायेन सारूप्यवशान्नीलबोधरूपे ज्ञानेऽवस्थाप्यमाने सारूप्यं व्यवस्थापनहेतुत्वात्प्रमाणं सिद्धं भवति। यद्येवमध्यवसायसहितमेव प्रत्यक्षं प्रमाणं स्यान्न केवलमिति चेत्। नैतदेवम्। यस्मात्प्रत्यक्षबलोत्पन्नेनाध्यवसायेन दृष्टत्वेनाऽर्थोऽवसीयते नोत्प्रेक्षितत्वेन। दर्शनं चार्थसाक्षात्करणाख्यं प्रत्यक्षव्यापारः। उत्प्रेक्षणं तु विकल्पव्यापारः। तथा हि परोक्षमर्थं विकल्पयन्त उत्प्रेक्षामहे न तु पश्याम इत्युत्प्रेक्षात्मकं विकल्पव्यापारमनुभवादवस्यन्ति। तस्मात्स्वव्यापारं तिरस्कृत्य प्रत्यक्षव्यापारमादर्शयति। यत्रार्थे प्रत्यक्षपूर्वकोऽध्यवसायस्तत्र प्रत्यक्षं केवलमेव प्रमाणम्॥

इति न्यायबिन्दुटीकायां प्रथमः परिच्छेदः समाप्तः।

अथ द्वितीयपरिच्छेदः ।

एवं प्रत्यक्षं व्याख्यायानुमानं व्याख्यातुमाह । अनुमानं द्विधा । द्विप्रकारम् । अथानुमानलक्षणे वक्तव्ये किमर्थमस्यप्रकारभेदः कथ्यते । उच्यते । परार्थानुमानं शब्दात्मकं स्वार्थानुमानं तु ज्ञानात्मकम् । तयोरत्यन्तभेदान्नैकं लक्षणमस्ति । ततस्तयोः प्रतिनियतं लक्षणमाख्यातुं प्रकारभेदः कथ्यते । प्रकारभेदो हि व्यक्तिभेदः । व्यक्तिभेदे च कथिते प्रतिव्यक्तिनियतं लक्षणं शक्यते वक्तुम् । नान्यथा । ततो लक्षणनिर्देशाङ्गमेव प्रकारभेदकथनम् । अशक्यतां च प्रकारभेदकथनमन्तरेण लक्षणनिर्देशस्य ज्ञात्वा प्राक्प्रकारभेदः कथ्यत इति ।

किं पुनस्तद्द्वैविध्यमित्याह । स्वस्मायेदं स्वार्थम् । येन स्वयं प्रतिपद्यते तत्स्वार्थम् । परस्मायेदं परार्थम् । येन परं प्रतिपादयति तत्परार्थम् । तच्च तयोः स्वार्थपरार्थानुमानयोर्मध्ये स्वार्थं ज्ञानं किंविशिष्टमित्याह । त्रिरूपादिति । त्रीणि रूपाणि यस्य वक्ष्यमाणलक्षणानि तत्त्रिरूपम् । लिङ्ग्यते गम्यतेऽनेनार्थ इति लिङ्गम् । तस्मात्त्रिरूपाल्लिङ्गाद्यज्ज्ञातं ज्ञानमिति । एतद्धेतुद्वारेण विशेषणम् । तत्त्रिरूपाच्च लिङ्गात्त्रिरूपलिङ्गालम्बनमित्युत्पद्यत इति विशिनष्टि । अनुमेय इति । एतच्च विषयद्वारेण विशेषणम् । त्रिरूपाल्लिङ्गाद्यदुत्पन्नमनुमेयालम्बनं ज्ञानं तत्स्वार्थमनुमानमिति ।

लक्षणविप्रतिपत्तिं निराकृत्य फलविप्रतिपत्तिं निराकर्तुमाह। प्रमाणस्य यत्फलं तस्य या व्यवस्थाऽत्रानुमानेऽपि प्रत्यक्षवत्प्रत्यक्ष इव वेदितव्या। यथा हि नीलमरूपं प्रत्यक्षमनुभूयमानं नीलबोधरूपमवस्थाप्यते। तेन नीलसारूप्यं व्यवस्थापनहेतुः प्रमाणम्। नीलबोधरूपं तु व्यवस्थाप्यमानं प्रमाणफलम्। तद्वदनुमानं नीलाकारमुत्पद्यमानं नीलबोधरूपमवस्थाप्यते। तेन नीलसारूप्यमस्य प्रमाणम्। नीलविकल्पनरूपं त्वस्य प्रमाणफलम्। सारूप्यवशाद्धि तन्नीलप्रतीतिरूपं सिध्यति। नान्यथेति। एवमिह संख्यालक्षणफलविप्रतिपत्तयः। प्रत्यक्षपरिच्छेदे तु गोचरविप्रतिपत्तिर्निराकृता।

लक्षणनिर्देशप्रसङ्गेन तु त्रिरूपं लिङ्गं प्रस्तुतम्। तदेव व्याख्यातुमाह। त्रैरूप्यमित्यादि। लिङ्गस्य यत्त्रैरूप्यं यानि त्रीणि रूपाणि तदिदमुच्यत इति शेषः।

किं पुनस्तत्त्रैरूप्यमित्याह। अनुमेयं वक्ष्यमाणलक्षणम्। तस्मिंल्लिङ्गस्य सत्त्वमेव निश्चितमेकं रूपम्। यद्यपि चात्र निश्चितग्रहणं न कृतं तथाऽप्यन्ते कृतं प्रक्रान्तयोर्द्वयोरपि रूपयोरपेक्षणीयम्। यतो न योग्यतया लिङ्गं परोक्षज्ञानस्य निमित्तम्। यथा बीजमङ्कुरस्य। अदृष्टाद्धूमादग्नेरप्रतिपत्तेः। नापि स्वविषयज्ञानापेक्षं परोक्षार्थप्रकाशनम्। यथा प्रदीपो घटादेर्दृष्टादप्यनिश्चितसंबन्धादप्रतिपत्तेः। तस्मात्परोक्षार्थनान्तरीयकतया निश्चयनमेव लिङ्गस्य परोक्षार्थप्रतिपादनव्यापारः। नापरः कश्चित्। अतोऽन्वयव्यतिरेकपक्षधर्मत्वनिश्चयो लिङ्गव्यापारा-

त्मकत्वाद्वश्यकर्तव्य इति सर्वेषु रूपेषु निश्चितग्रहणमपेक्षणीयम् । तच्च सत्त्ववचनेनासिद्धं चाक्षुषत्वादि निरस्तम् । एवकारेण पक्षैकदेशासिद्धः । यथा चेतनास्तरवः स्वापादिति । पक्षीकृतेषु तरुषु पक्षसंकोचलक्षणः स्वाप एकदेशेन सिद्धः । न हि सर्वे वृक्षा रात्रौ पक्षसंकोचभाजः । किं तु केचिदेव । सत्त्ववचनस्य पश्चात्कृतेनैवकारेणासाधारणो धर्मो निरस्तः । यदि ह्यनुमेय एव सत्त्वमिति कुर्याच्छ्रावणत्वमेव हेतुः स्यात् । निश्चितग्रहणेन संदिग्धासिद्धः सर्वो निरस्तः ।

सपक्षो वक्ष्यमाणलक्षणः । तस्मिन्नेव सत्त्वं निश्चितं द्वितीयं रूपम् । इहापि सत्त्वग्रहणेन विरुद्धो निरस्तः । स हि नास्ति सपक्षे । एवकारेण साधारणानैकान्तिकः । स हि न सपक्ष एव वर्तते किं तूभयत्रापि । सत्त्वग्रहणात्पूर्वावधारणवचनेन सपक्षव्यापिसत्ताकस्यापि प्रयत्नानन्तरीयकस्य हेतुत्वं कथितम् । पश्चादवधारणे त्वयमर्थः स्यात् । सपक्षे सत्त्वमेव यस्य स हेतुरिति प्रयत्नानन्तरीयकत्वं न हेतुः स्यात् । निश्चितवचनेन संदिग्धान्वयोऽनैकान्तिको निरस्तः । यथा सर्वज्ञः कश्चिद्वक्तृत्वात् । वक्तृत्वं हि सपक्षे सर्वज्ञे संदिग्धम् ।

असपक्षो वक्ष्यमाणलक्षणः । तस्मिन्नसत्त्वमेव निश्चितं तृतीयं रूपम् । तत्रासत्त्वग्रहणेन विरुद्धस्य निरासः । विरुद्धो हि विपक्षेऽस्ति । एवकारेण साधारणस्य विपक्षैकदेशवृत्तेर्निरासः । प्रयत्नानन्तरीयकत्वे साध्ये ह्यनित्यत्वं विपक्षैकदेशे विद्युदादावस्त्याकाशादौ नास्ति । ततो नियमेनास्य निरासः । असत्त्ववचना-

त्पूर्वस्मिन्नवधारणेऽयमर्थः स्यात्। विपक्ष एव यो नास्ति स हेतुः। तथा च प्रयत्नानन्तरीयकत्वं सपक्षेऽपि सर्वत्र नास्ति। ततो न हेतुः स्यात्। ततः पूर्वं न कृतम्। निश्चितग्रहणेन संदिग्धविपक्षव्यावृत्तिकोऽनैकान्तिको निरस्तः।

५ ननु च सपक्ष एव सत्त्वमित्युक्ते विपक्षेऽसत्त्वमेवेति गम्यत एव। तत्किमर्थं पुनरुभयोरुपादानं कृतम्। तदुच्यते। अन्वयो व्यतिरेको वा नियमवानेव प्रयोक्तव्यो नान्यथेति दर्शयितुं द्वयोरप्युपादानं कृतम्। अनियमे हि द्वयोरपि प्रयोगेऽयमर्थः स्यात्। सपक्षे योऽस्ति विपक्षे च नास्ति स हेतुरिति। तथा च सति १० स श्यामस्तत्पुत्रत्वाद्दृश्यमानपुत्रवदिति तत्पुत्रत्वं हेतुः स्यात्। तस्मान्नियमवतोरेवान्वयव्यतिरेकयोः प्रयोगः कर्तव्यः। येन प्रतिबन्धो गम्येत साधनस्य साध्येन। नियमवतोश्च प्रयोगेऽवश्यकर्तव्ये द्वयोरेक एव प्रयोक्तव्यो न द्वाविति नियमवानेवान्वयो व्यतिरेको वा प्रयोक्तव्य इति शिक्षणार्थं द्वयोरुपादानमिति।

१५ त्रैरूप्यकथनप्रसङ्गेनानुमेयः सपक्षो विपक्षश्चोक्तः। तेषां लक्षणं वक्तव्यम्। तत्र कोऽनुमेय इत्याह। अनुमेयोऽित्यादि। अत्र हेतुलक्षणे निश्चेतव्ये धर्म्यनुमेयः। अन्यत्र तु साध्यप्रतिपत्तिकाले समुदायोऽनुमेयः। व्याप्तिनिश्चयकाले तु धर्मोऽनुमेय इति दर्शयितुमत्र ग्रहणम्। जिज्ञासितो ज्ञातुमिष्टो विशेषो धर्मो २० यस्य धर्मिणः स तथोक्तः।

कः सपक्षः। समानोऽर्थः सपक्षः। समानः सदृशो योऽर्थः पक्षेण स सपक्ष उक्त उपचारात्। समानशब्देन विशेष्यते। समानः पक्षः सपक्षः।

समानस्य च सशब्दादेशः। स्यादेतत्। किं तत्पक्षसपक्षयोः सामान्यं येन समानः सपक्षः पक्षेणेत्याह। साध्यधर्मसामान्येनेति। साध्यश्चासावसिद्धत्वाद्धर्मश्च पराश्रितत्वात्साध्यधर्मः। न च विशेषः साध्यः। अपि तु सामान्यम्। अत दृह सासान्यं साध्यमुक्तम्। साध्यधर्मश्चासौ सामान्यं चेति साध्यधर्मसामान्येन समानः पक्षेण सपक्ष इत्यर्थः। ५

कोऽसपक्ष इत्याह। न सपक्षोऽसपक्षः। सपक्षो यो न भवति सोऽसपक्षः। कश्च सपक्षो न भवति। ततः सपक्षादन्यः। तेन च विरुद्धः। तस्य च सपक्षस्याभावः। सपक्षादन्यत्वं तद्विरुद्धत्वं च न तावत्प्रत्येतुं शक्यं यावत्सपक्षस्वभावाभावो न विज्ञातः। तस्मादन्यत्वविरुद्धत्वप्रतीतिसामर्थ्यात्सपक्षाभावरूपौ प्रतीतावन्यविरुद्धौ। ततोऽभावः साक्षात्सपक्षाभावरूपः प्रतीयते। अन्यविरुद्धौ तु सामर्थ्यादभावरूपौ प्रतीयेते। ततस्त्रयाणामप्यसपक्षत्वम्। १०

उक्तेन त्रैरूप्येण त्रिरूपाणि च त्रीण्येव लिङ्गानीति चकारो वक्ष्यान्तरसमुच्चयार्थः। त्रैरूप्यमादौ पृष्टं त्रिरूपाणि च लिङ्गानि परेण। तत्र त्रैरूप्यमुक्तम्। त्रिरूपाणि चोच्यन्ते। त्रीण्येव त्रिरूपाणि लिङ्गानि। त्रयस्त्रिरूपलिङ्गप्रकारा इत्यर्थः। कानि पुनस्तानीत्याह। प्रतिषेध्यस्य साध्यस्यानुपलब्धिस्त्रिरूपा। विधेयस्य साध्यस्य स्वभावस्त्रिरूपः। कार्यं च। १५

अनुपलब्धिमुदाहर्तुमाह। यथेत्यादि। यथेत्युपप्रदर्शनार्थम्। यथेयमनुपलब्धिस्तथान्याऽपि। न त्वियमेवेत्यर्थः। प्रदेश एकदेशः। विशिष्यत इति विशेषः प्रतिपत्तृप्रत्यक्षः। तादृशश्च न सर्वः प्रदेशः। तदाह क्वचिदिति। प्रतिपत्तृप्रत्यक्षे क्वचिदेव प्रदेश इति धर्मी। २०

न घट इति साध्यम्। उपलब्धिर्ज्ञानम्। तस्या लक्षणं जनिका सामग्री। तया ह्युपलब्धिर्लक्ष्यते। तत्प्राप्तोऽर्थो जनकत्वेन सामग्यन्तर्भावादुपलब्धिलक्षणप्राप्तो दृश्य इत्यर्थः। तस्यानुपलब्धेरित्ययं हेतुः। अथ यो यत्र नास्ति स कथं तत्र दृश्यः। दृश्यत्वसमारोपादसन्नपि दृश्य उच्यते। यश्चैवं संभाव्यते यद्यसावत्र भवेद्दृश्य एव भवेदिति स तत्राविद्यमानोऽपि दृश्यः समारोप्यः। कश्चैवं संभाव्यः। यस्य समग्राणि स्वालम्बनदर्शनकारणानि भवन्ति। कदा च तानि समग्राणि गम्यन्ते। यदैकज्ञानसंसर्गिवस्त्वन्तरोपलम्भः। एकेन्द्रियज्ञानग्राह्यं लोचनादिप्रणिधानाभिमुखंव स्तु-द्वयमन्योन्यापेक्षमेकज्ञानसंसर्गि कथ्यते। तयोर्हि सतोर्नैकनियता भवति प्रतिपत्तिः। योग्यतायां द्वयोरप्यविशिष्टत्वात्। तस्मादेकज्ञानसंसर्गिणि दृश्यमाने सत्येकस्मिन्नितरत्समग्रदर्शनसामग्रीकं यदि भवेद्दृश्यमेव भवेदिति संभावितं दृश्यमारोप्यते। तस्यानुपलम्भो दृश्यानुपलम्भः। तस्मात्स एव घटविविक्तप्रदेशस्तदालम्बनं च ज्ञानं दृश्यानुपलम्भनिश्चयहेतुत्वाद्दृश्यानुपलम्भ उच्यते। यावद्धेकज्ञानसंसर्गि वस्तु न निश्चितं तज्ज्ञानं च न तावद्दृश्यानुपलम्भनिश्चयः। ततो वस्त्वप्यनुपलम्भ उच्यते तज्ज्ञानं च। दर्शननिवृत्तिमात्रं तु स्वयमनिश्चितत्वादगमकम्। ततो दृश्यघटरहितः प्रदेशस्तज्ज्ञानं च वचनसामर्थ्यादेव दृश्यानुपलम्भरूपमुक्तं द्रष्टव्यम्।

का पुनरुपलब्धिलक्षणप्राप्तिरित्याह। उपलब्धिलक्षणप्राप्तिरुपलब्धिलक्षणप्राप्तत्वं घटस्य। उपलम्भप्रत्ययान्तरसाकल्यमिति।

ज्ञानस्य घटोऽपि जनकः । अन्ये च चक्षुरादयः । घटादृश्यादन्ये हेतवः प्रत्ययान्तराणि । तेषां साकल्यं संनिधिः । स्वभाव एव विशिष्यते तदन्यस्मादिति विशेषो विशिष्ट इत्यर्थः । तदयं विशिष्टः स्वभावः प्रत्ययान्तरसाकल्यं चैतद्वयमुपलब्धिलक्षणप्राप्तत्वं घटादेर्द्रष्टव्यम् । ५

कीदृशः स्वभावविशेष इत्याह । सत्स्वित्यादि । उपलम्भस्य यानि घटादृश्यात्प्रत्ययान्तराणि तेषु सत्सु विद्यमानेषु यः स्वभावः सन्प्रत्यक्ष एव भवति स स्वभावविशेषः । तदयमत्रार्थः । एकप्रतिपत्तृपेक्षमिदं प्रत्यक्षलक्षणम् । तथा च सति द्रष्टुं प्रवृत्तस्यैकस्य द्रष्टुर्दृश्यमान उभयवान्भावः । १ । अदृश्यमानास्तु देशकालस्वभावविप्रकृष्टाः स्वभावविशेषरहिताः प्रत्ययान्तरसाकल्यवन्तस्तु । यैर्हि प्रत्ययैः स द्रष्टा पश्यति ते संनिहिताः । अतश्च संनिहिताय द्रष्टुं प्रवृत्तः सः । २ । द्रष्टुमप्रवृत्तस्य तु योग्यदेशस्था अपि द्रष्टुं ते न शक्याः । प्रत्ययान्तरवैकल्यवन्तः स्वभावविशेषयुक्तास्तु । ३ । दूरदेशकालास्तूभयविकलाः । ४ ॥ १५

तदेवं पश्यतः कस्यचिन्न प्रत्ययान्तरविकलो नाम । १ । स्वभावविशेषविकलस्तु भवेत् । २ । अपश्यतस्तु शक्यो द्रष्टुं योग्यदेशस्थः प्रत्ययान्तरविकलः । ३ । अन्ये त्वुभयविकला इति । ४ ॥

अनुपलब्धिमुदाहृत्य स्वभावमुदाहर्तुमाह । स्वभावो हेतुरिति संबन्धः। कीदृशो हेतुः साध्यस्यैव स्वभाव इत्याह । स्वस्यात्मनः सत्ता सैव केवला स्वसत्तामात्रम् । तस्मिन्सति भवितुं शीलं यस्येति । यो हेतोरात्मनः सत्तामपेक्ष्य विद्यमानो भवति २०

न तु हेतुसत्तायां व्यतिरिक्तं कंचिद्धेतुमपेक्षते स स्वसत्तामात्रभावी साध्यः। तस्मिन्साध्ये यो हेतुः स स्वभावः। तस्य साध्यस्य नान्यः। उदाहरणं यथेति। अयमिति धर्मी। वृक्ष इति साध्यम्। शिंशपात्वादिति हेतुः। तदयमर्थो वृक्षव्यवहारयोग्योऽयं शिंशपाव्यवहारयोग्यत्वादिति। तच्च प्रचुरशिंशपे देशेऽविदितशिंशपाव्यवहारो जडो यदा केनचिदुच्चां शिंशपामुपादर्श्योच्यते अयं वृक्ष इति तदासौ जाड्याच्छिंशपाया उच्चत्वमपि वृक्षव्यवहारनिमित्तमवस्थति। तदा यामेवानुच्चां शिंशपां पश्यति तामेवावृक्षमवस्थति। स मूढः शिंशपात्वमात्रनिमित्ते वृक्षव्यवहारे प्रवर्त्यते। नोच्चत्वादि निमित्तान्तरमिह वृक्षव्यवहारस्य। अपि तु शिंशपात्वमात्रं निमित्तं शिंशपागतशाखादिमत्त्वं निमित्तमित्यर्थः।

कार्यमुदाहर्तुमाह। अग्निरिति साध्यम्। अत्रेति धर्मी। धूमादिति हेतुः। कार्यकारणभावो लोके प्रत्यक्षानुपलम्भनिबन्धनः प्रतीत इति न स्वभावस्येव कार्यस्य लक्षणमुक्तम्। ननु त्रिरूपत्वादेकमेव लिङ्गमयुक्तम्। अथ प्रकारभेदाद्भेदः। एवं सति स्वभावहेतोरेकस्यानन्तप्रकारत्वात्त्रित्वमयुक्तमित्याह। अत्र द्वाविति। अत्रेति एषु त्रिषु हेतुषु मध्ये द्वौ हेतू वस्तुसाधनौ विधेः साधनौ गमकौ। एकः प्रतिषेधस्य हेतुर्गमकः। प्रतिषेध इति चाभावोऽभावव्यवहारश्चोक्तो द्रष्टव्यः। तदयमर्थो हेतुः साध्यसिद्ध्यर्थत्वात्साध्याङ्गम्। साध्यं प्रधानम्। अतश्च साध्योपकरणस्य हेतोः प्रधानसाध्यभेदाद्भेदो न स्वरूपभेदात्। साध्यश्च कश्चिद्विधिः कश्चित्प्रतिषेधः। विधिप्रतिषेधयोश्च

परस्परपरिहारेणावस्थानात्तयोर्हेतू भिन्नौ। विधिरपि कश्चिद्धेतोर्भिन्नः कश्चिदभिन्नः। भेदाभेदयोरप्यन्योन्यत्यागेनात्मस्थितेर्भिन्नौ हेतू। ततः साध्यस्य परस्परविरोधाद्धेतवो भिन्ना न तु स्वत एवेति। कस्मात्पुनस्त्रयाणां हेतुत्वं कस्माच्चान्येषामहेतुत्वमित्याशङ्क्य यथा त्रयाणामेव हेतुत्वमन्येषां चाहेतुत्वं तदुभयं दर्शयितुमाह। स्वभावप्रतिबन्ध इति। स्वभावेन प्रतिबन्धः स्वभावप्रतिबन्धः। साधनं हृतेति समासः। स्वभावप्रतिबद्धत्वं प्रतिबद्धस्वभावत्वमित्यर्थः। कारणे स्वभावे च साध्ये स्वभावेन प्रतिबन्धः कार्यस्वभावयोरविशिष्ट इत्येकेन समासेन द्वयोरपि संग्रहः। हिर्यस्मादर्थे। यस्मात्स्वभावप्रतिबन्धे सति साधनार्थः साध्यार्थं गमयेत्तस्मात्त्रयाणां गमकत्वमन्येषामगमकत्वम्। कस्मात्पुनः स्वभावप्रतिबन्ध एव सति गम्यगमकभावो नान्यथेत्याह। तदप्रतिबद्धस्येति। तदिति स्वभाव उक्तः। तेन स्वभावेनाप्रतिबद्धस्तदप्रतिबद्धः। यो यत्र स्वभावेन न प्रतिबद्धस्तस्य तदप्रतिबद्धस्य तदव्यभिचारनियमाभावस्तस्याप्रतिबद्धविषयस्याव्यभिचारस्तदव्यभिचारस्तस्य नियमस्तदव्यभिचारनियमस्तस्याभावात्। अयमर्थः। न हि यो यत्र स्वभावेन न प्रतिबद्धः स तमप्रतिबद्धविषयमवश्यमेव न व्यभिचरतीति नास्ति तयोरव्यभिचारनियमः। अविनाभावनियमः। अव्यभिचारनियमाच्च गम्यगमकभावः। न हि योग्यतया प्रदीपवत्परोक्षार्थप्रतिपत्तिनिमित्तमिष्टं लिङ्गम्। अपि त्वव्यभिचारित्वेन निश्चितम्। ततः स्वभावप्रतिबन्धे सत्यविनाभावनिश्चयः।

ततो गम्यगमकभावः। तस्मात्स्वभावप्रतिबन्धे सत्यर्थोऽर्थं गमये-न्नान्यथेति स्थितम्। ननु च परायत्तस्य प्रतिबन्धोऽपरायत्ते। तदिह साध्यसाधनयोः कस्य क्व प्रतिबन्ध इत्याह। स चेति। स च स्वभावप्रतिबन्धो लिङ्गस्य साध्येऽर्थे। लिङ्गं परायत्तत्वा-त्प्रतिबद्धुम्। साध्यस्वर्थोऽपरायत्तत्वात्प्रतिबन्धविषयो न प्रतिबद्धु इत्यर्थः। तच्चायमर्थस्तादात्म्याविशेषेऽपि यत्प्रतिबद्धुं तद्गमकम्। यत्प्रतिबन्धविषयस्तद्गम्यम्। यस्य च धर्मस्य यन्नियतः स्वभावः स तत्प्रतिबद्धो यथा प्रयत्नानन्तरीयकत्वाख्योऽनित्यत्वे। यस्य तु स चान्यश्च स्वभावः स प्रतिबन्धविषयः। न तु प्रतिबद्धः। यथानित्यत्वाख्यः प्रयत्नानन्तरीयकत्वाख्ये। निश्चयापेक्षो हि गम्यगमकभावः। प्रयत्नानन्तरीयकत्वमेव चानित्यत्वस्वभावं निश्चितम्। अतस्तदेवानित्यत्वे प्रतिबद्धुं तस्मान्नियतविषय एव गम्यगमकभावो नान्यथेति। कस्मात्पुनः स्वभावप्रतिबन्धो लिङ्ग-स्येत्याह। वस्तुत इत्यादि। स साध्योऽर्थ आत्मा स्वभावो यस्य तत्तदात्मा तस्य भावस्तादात्म्यं तस्माद्धेतोर्यतः साध्यस्वभावं साधनं तस्मात्तच्च स्वभावप्रतिबद्धुमित्यर्थः। यदि साध्यस्वभावं साधनं साध्यसाधनयोरभेदात्प्रतिज्ञार्थैकदेशो हेतुः स्यादित्याह वस्तुत इति। परमार्थसता रूपेणाभेदः। तयोर्विकल्पविषयस्तु यत्समारोपितं रूपं तदपेक्षः साध्यसाधनभेदः। निश्चयापेक्ष एव हि गम्यगमकभावः। ततो निश्चयारूढरूपापेक्ष एव तयोर्भेदो युक्तो वास्तवस्त्वभेद इति। न केवलं तादात्म्यादपि तु ततः साध्यादर्थादुत्पत्तिर्लिङ्गस्य तदुत्पत्तेश्च साध्येऽर्थे स्वभावप्रतिबन्धो

लिङ्गस्य। कस्मान्निमित्तद्वयात्स्वभावप्रतिबन्धो लिङ्गस्य नान्यस्मा-
दित्याह। अतत्स्वभावस्येति। स स्वभावोऽस्य सोऽयं तत्स्व-
भावः। न तत्स्वभावोऽतत्स्वभावः। तस्मादुत्पत्तिरस्य सोऽयं
तदुत्पत्तिः। न तथातदुत्पत्तिः। यो यत्स्वभावो यदुत्पत्तिश्च
न भवति तस्यातत्स्वभावस्यातदुत्पत्तेश्च। तत्रातत्स्वभावेऽनुत्पादके ५
चाप्रतिबद्धः स्वभावोऽस्येति सोऽयमप्रतिबद्धस्वभावस्तस्य भावो-
ऽप्रतिबद्धस्वभावत्वं तस्मादप्रतिबद्धस्वभावत्वात्। यद्यतत्स्वभावे-
ऽनुत्पादके च कश्चित्प्रतिबद्धस्वभावो भवेत्। भवेदन्यतोऽपि
निमित्तात्स्वभावप्रतिबन्धः। प्रतिबद्धस्वभावत्वं हि स्वभाव-
प्रतिबन्धो न चान्यः कश्चिदायत्तस्वभावः। तस्मात्तादात्म्य- १०
तदुत्पत्तिभ्यामेव स्वभावप्रतिबन्धः। भवतु नाम तादात्म्यतदु-
त्पत्तिभ्यामेव स्वभावप्रतिबन्धः कार्यस्वभावयोरेव तु गमकत्वं
कथमित्याह। ते चेति। इतिस्तस्मादर्थे। यस्मात्स्वभावे कार्य
एव च तादात्म्यतदुत्पत्ती स्थिते तन्निबन्धनश्च गम्यगमकभाव-
स्तस्मात्ताभ्यामेव कार्यस्वभावाभ्यां वस्तुनो विधेः सिद्धिः। १५

अथ प्रतिषेधसिद्धिरदृश्यानुपलम्भादपि कस्मान्नेष्टेत्याह।
प्रतिषेधव्यवहारस्य सिद्धिर्यथोक्ता या दृश्यानुपलब्धिस्तत एव
भवति यतस्तस्मादन्यतो नोक्ता। ततस्तावत्कस्माद्भवतीत्याह।
सति तस्मिन्प्रतिषेध्ये वस्तुनि यस्मादृश्यानुपलब्धिर्न संभवति
तस्मादसंभवात्ततः प्रतिषेधसिद्धिः। अथ तत एव कस्मादित्याह। २०
अन्यथा चेति। सति वस्तुनि तस्या अदृश्यानुपलब्धेः संभवादि-
त्यन्यथाशब्दार्थः। एतस्मात्कारणान्नान्यस्या अनुपलब्धेः प्रतिषेध-

सिद्धिः। कुत एतत्सत्यपि वस्तुनि तस्याः संभव इत्याह। अनुपलब्धिलक्षणप्राप्तेष्वित्यादि। इह प्रत्ययान्तरसाकल्यात्स्वभावविशेषाच्चोपलब्धिलक्षणप्राप्तार्थ उक्तः। द्वयोरेकैकस्याप्यभावेऽनुपलब्धिलक्षणप्राप्तोऽर्थ उच्यते। तदिहानुपलब्धिलक्षणप्राप्तेष्विति प्रत्ययान्तरकैवल्यवन्त उक्ताः। देशकालस्वभावविप्रकृष्टेष्विति। स्वभावविशेषविप्रकृष्टा उक्ताः। देशश्च कालश्च स्वभावश्च तैर्विप्रकृष्टा इति विग्रहः। तेष्वभावनिश्चयस्याभावात्। सत्यपि वस्तुनि तस्याभाव इष्टः। कस्मान्निश्चयाभाव इत्याह। तेषु प्रतिप्रत्तुरात्मनो यत्प्रत्यक्षं तस्य निवृत्तेः कारणान्निश्चयाभावः। यस्मादनुपलब्धिलक्षणप्राप्तेष्वात्मप्रत्यक्षनिवृत्तेरभावनिश्चयाभावस्तस्मात्सत्यपि वस्तुन्यात्मप्रत्यक्षनिवृत्तिलक्षणाया अदृश्यानुपलब्धेः संभवः। ततो यथोक्ताया एव प्रतिषेधसिद्धिः।

अथेयं दृश्यानुपलब्धिः कस्मिन्काले प्रमाणं किंस्वभावा किंव्यापारा चेत्याह। अमूढेति। प्रतिपत्तुः प्रत्यक्षो घटादिरर्थस्तस्य निवृत्तिरनुपलब्धिस्तद्भावस्वभावेति यावत्। अत एवाभावो न साध्यः स्वभावानुपलब्धेः सिद्धत्वात्। अविद्यमानोऽपि च घटादिरेकज्ञानसंसर्गिणि भासमाने समग्रसामग्रीको ज्ञायमानो दृश्यतया संभावितत्वात्प्रत्यक्ष उक्तः। अत एकज्ञानसंसर्गी दृश्यमानोऽर्थस्तज्ज्ञानं च प्रत्यक्षनिवृत्तिरुच्यते। ततो हि दृश्यमानादर्थात्तद्वुद्धेश्च समग्रदर्शनसामग्रीकत्वेन प्रत्यक्षतया संभावितस्य निवृत्तिरवसीयते। तस्मादर्थज्ञान एव प्रत्यक्षस्य घटस्याभाव उच्यते। न तु निवृत्तिमात्रमिहाभावो निवृत्ति-

माचाद्दृश्यनिवृत्त्यनिश्चयात् । ननु च दृश्यनिवृत्तिरव-
सीयते दृश्यानुपलम्भात् । सत्यमेवैतत् । केवलमेकज्ञानसंसर्गिणि
दृश्यमाने घटो यदि भवेद्दृश्य एव भवेदिति दृश्यः संभावितस्ततो
दृश्यानुपलब्धिर्निश्चिता। दृश्यानुपलब्धिनिश्चयसामर्थ्यादेव च दृश्या-
भावो निश्चितः । यदि हि दृश्यस्तच्च भवेद्दृश्यानुपलब्धो न भवेत् । ५
अतो दृश्यानुपलम्भनिश्चयाद्दृश्याभावः सामर्थ्यादवसितो न तु व्यव-
हृत इति दृश्यानुपलम्भेन व्यवहर्तव्यः । तस्मादर्थान्तरमेकज्ञानसं-
सर्गि दृश्यमानं तज्ज्ञानं च प्रत्यक्षनिवृत्तिनिश्चयहेतुत्वात्प्रत्यक्षनि-
वृत्तिरूपं द्रष्टव्यम् । यदा चैकज्ञानसंसर्गिणि प्रत्यक्षे घटस्य प्रत्य-
क्षत्वमारोपितमसतोऽपि तथा तस्मिन्नेकज्ञानसंसर्गिण्यतीते वर्त- १०
माने चामूढस्मृतिसंस्कारे च घटस्य तद्रूपमारोपितमसत इति द्रष्ट-
व्यम् । अनेन दृश्यानुपलब्धिः प्रत्यक्षघटनिवृत्तिस्वभावोक्ता। सा च
सिद्धा । तेन न घटाभावः साध्योऽपि त्वभावव्यवहार इत्युक्तम् ।

अमूढोऽभ्रष्टो दर्शनाहितः स्मृतिजननरूपः संस्कारो यस्मि-
न्घटादौ स तथोक्तः । तस्यातीतस्य प्रतिपत्तृप्रत्यक्षस्येति संबन्धः । १५
वर्तमानस्य च प्रतिपत्तृप्रत्यक्षस्येति संबन्धः । अमूढस्मृतिसंस्कार-
ग्रहणं तु न वर्तमानविशेषणम् । यस्मादतीते घटविविक्तप्रदेश-
दर्शने स्मृतिसंस्कारो मूढो दृश्यघटानुपलम्भे दृश्ये च घटेऽमूढो
भवति । वर्तमाने च घटरहितप्रदेशदर्शने न स्मृतिसंस्कारमोहः ।
अत एव न घटानुपलम्भे नापि घटे मोहः । तस्मान्न वर्तमान- २०
निषेध्यविशेषणममूढस्मृतिसंस्कारग्रहणम् । स्मृतिसंस्कारव्यभि-
चाराभावाद्वर्तमानस्यार्थस्य । अत एव वर्तमानस्य चेति । च शब्दः

कृतो विशेषणरहितस्य वर्तमानस्य विशेषणवताऽतीतेन समुच्चयो यथा विज्ञायेतेति। तदयमर्थोऽतीतोऽनुपलम्भः स्फुटं स्मर्य्यमाणः प्रमाणं वर्तमानश्च। ततो नासौदिह घटोऽनुपलब्धत्वान्नास्त्यनुपलभ्यमानत्वादिति शक्यं ज्ञातुम्। न तु न भविष्यत्यत्र घटोऽनुपलभ्यमानत्वादिति शक्यं ज्ञातुम्। अनागताया अनुपलब्धेः सत्त्वसंदेहादिति। कालविशेषोऽनुपलब्धेर्व्याख्यातः।

व्यापारं दर्शयति। अभावस्य व्यवहारो नास्तीत्येवमाकारं ज्ञानं शब्दश्चैवमाकारो निःशङ्कं गमनागमनलक्षणा च प्रवृत्तिः कार्यिकोऽभावव्यवहारः। घटाभावे हि ज्ञाते निःशङ्कं गन्तुमागन्तुं च प्रवर्तते। तदेवमेतस्य त्रिविधस्याप्यभावव्यवहारस्य दृश्यानुपलब्धिः साधनी प्रवर्तिका। यद्यपि च नास्ति घट इति ज्ञानमनुपलब्धेरेव भवत्यथमेव चाभावनिश्चयस्तथापि यस्मात्प्रत्यक्षेण केवलः प्रदेश उपलब्धस्तस्मादिह घटो नास्तीत्येवं च प्रत्यक्षव्यापारमनुसरत्यभावनिश्चयः। तस्मात्प्रत्यक्षस्य केवलप्रदेशग्रहणव्यापारानुसार्यभावनिश्चयः प्रत्यक्षकृतः। किं च। दृश्यानुपलम्भनिश्चयकरणसामर्थ्यादेव पूर्वोक्तया नीत्या प्रत्यक्षेणैवाभावो निश्चितः। केवलमदृष्टानामपि सत्त्वसंभवात्। सत्त्वशङ्कया न शक्नोत्यसत्त्वं व्यवहर्तुम्। अतोऽनुपलम्भोऽभावं व्यवहारयति। दृश्यो यतोऽनुपलब्धस्तस्मान्नास्तीत्यतो दृश्यानुपलम्भोऽभावज्ञानं कृतं प्रवर्तयति न त्वकृतं करोतीत्यभावनिश्चयोऽनुपलम्भात्प्रवृत्तोऽपि प्रत्यक्षेण कृतोऽनुपलम्भेन प्रवर्तित उक्त इत्यभावव्यवहारप्रवर्तन्यनुपलब्धिः। कस्मात्पुनरतीते वर्तमाने चानुपलब्धिर्गमिकेत्याह। तस्या एव यथोक्तकालाया

अनुपलब्धेरभावनिश्चयात् । अनागता ह्यनुपलब्धिः स्वयमेव संदिग्धस्वभावा । तस्या असिद्धाया नाभावनिश्चयोऽपि त्वतीतवर्तमानाया इति ।

संप्रत्यनुपलब्धेः प्रकारभेदं दर्शयितुमाह । सा चैषानुपलब्धिरेकादश प्रकारा अस्या इत्येकादशप्रकारा । कुतः प्रकारभेदः प्रयोगभेदात् । प्रयोगः प्रयुक्तिः शब्दस्याभिधानव्यापार उच्यते । शब्दो हि साक्षात्क्वचिदर्थान्तराभिधायी क्वचित्प्रतिषेधान्तराभिधायी। सर्वत्रैव तु दृश्यानुपलब्धिरशब्दोपात्तापि गम्यत इति वाचकव्यापारभेदादनुपलब्धिप्रकारभेदो न तु स्वरूपभेदादिति यावत् ।

प्रकारभेदानाह । स्वभावेत्यादि । प्रतिषेधस्य यः स्वभावस्तस्यानुपलब्धिः । यथेति । अत्रेति धर्मी । न धूम इति साध्यम् । उपलब्धिलक्षणप्राप्तस्यानुपलब्धेरिति हेतुः । अयं च हेतुः पूर्ववद्व्याख्येयः ॥ १ ॥

प्रतिषेधस्य यत्कार्यं तस्यानुपलब्धिरुदाहियते । यथेति । दृश्येति धर्मी । अप्रतिबद्धमनुपहतं धूमजननं प्रति सामर्थ्यं येषां तान्यप्रतिबद्धसामर्थ्यानि न सन्तीति साध्यम् । धूमाभावादिति हेतुः । कारणानि च नावश्यं कार्यवन्ति भवन्तीति कार्यादर्शनादप्रतिबद्धसामर्थ्यानामेवाभावः साध्यः । न त्वन्येषाम् । अप्रतिबद्धशक्तीनि चान्यक्षणभावीन्येवान्येषां प्रतिबन्धसंभवात् । कार्यानुपलब्धिश्च यत्र कारणमदृश्यं तत्र प्रयुज्यते । दृश्ये तु कारणे दृश्यानुपलब्धिरेव गमिका । तत्र धवलगृहोपरिस्थितो गृहाङ्गणमपश्यन्नपि चतुर्षु पार्श्वेष्वङ्गणभित्तिपर्यन्तं पश्यति ।

भित्तिपर्यन्तसमं चालोकसंज्ञकमाकाशदेशं धूमविविक्तं पश्यति। तत्र धूमाभावनिश्चयाद्यद्देशस्थेन वह्निना जन्यमानो धूमस्तद्देशः स्यात्। तस्य च वह्नेरप्रतिबद्धसामर्थ्यस्याभावः प्रतिपत्तव्यः। तद्गृहाङ्गणदेशेन वह्निना जन्यमानो धूमस्तद्देशः स्यात्। तस्मात्तद्देशस्य वह्नेरभावः प्रतिपत्तव्यः। तद्गृहाङ्गणदेशं भित्तिपरिच्छिन्नं भित्तिपर्यन्तपरिच्छिन्नेन चालोकात्मना धूमविविक्तेनाकाशदेशेन सह धर्मिणं करोति। तस्माद्दृश्यमानादृश्यमानाकाशदेशावयवः प्रत्यक्षाप्रत्यक्षसमुदायो वह्न्यभावप्रतीतिसामर्थ्याद्यातो धर्मी न दृश्यमान एव। दृहेति तु प्रत्यक्षनिर्देशो दृश्यमानभागापेक्षो न केवलमिहैव दृश्यादृश्यसमुदायो धर्म्यपि त्वन्यत्रापि। शब्दस्य क्षणिकत्वे साध्ये कश्चिदेव शब्दः प्रत्यक्षोऽन्यस्तु परोक्षस्तद्वदिहापि। यथा चात्र धर्मी साध्यप्रतिपत्त्यधिकरणभूतो दृश्यादृश्यावयवो दर्शितस्तद्वदुत्तरेष्वपि प्रयोगेषु स्वयं प्रतिपत्तव्यः॥ २॥

प्रतिषेधस्य व्याप्यस्य यो व्यापको धर्मस्तस्यानुपलब्धिरुद्घाट्यते। यथेति। अत्र धर्मी। न शिंशपेति शिंशपाभावः साध्यः। वृक्षस्य व्यापकस्याभावादिति हेतुः। दृश्यमप्यनुपलब्धिर्व्याप्यस्य शिंशपात्वस्य दृश्याभावे प्रयुज्यते। उपलब्धिलक्षणप्राप्ते तु व्याप्ये दृश्यानुपलब्धिर्गमिका। तत्र यदा पूर्वापरावुपश्लिष्टौ सम्बन्धतौ देशौ भवतस्तयोरेकस्तद्ग्रहनोपेतोऽपरस्यैकशिलाघटितो निर्वृक्षकत्वः। द्रष्टापि तत्स्थान्वृक्षान्यश्चन्नपि शिंशपादिभेदं न यो विवेचयति। तस्य वृक्षत्वं प्रत्यक्षमप्रत्यक्षं शिंशपात्वम्। स हि निर्वृक्ष एक-

शिंशपात्वाघटिते वृक्षाभावं दृश्यत्वादृश्यानुपलम्भादवस्यति । शिंशपात्वाभावं तु व्यापकस्य वृक्षत्वस्याभावादिति । तादृशे विषयेऽस्या अभावसाधनाय प्रयोगः ॥ ३ ॥

प्रतिषेध्यस्य स्वभावेन विरुद्धस्योपलब्धिरुदाहृियते । यथेति । अत्रेति धर्मी । न शीतस्पर्श इति शीतस्पर्शप्रतिषेधः साध्यः । वह्नेरिति हेतुः । दृश्यं चानुपलब्धिस्तत्र प्रयोक्तव्या यत्र शीतस्पर्शोऽदृश्यः । दृश्ये दृश्यानुपलब्धिप्रयोगात् । तस्माद्यत्र वर्णविशेषाद्वह्निर्दृश्यः शीतस्पर्शो दूरस्थत्वात्सन्नपदृश्यस्तत्रास्याः प्रयोगः ॥ ४ ॥

प्रतिषेध्येन यद्विरुद्धं तत्कार्यस्योपलब्धिर्गमिका । यथेति । अत्रेति धर्मी । न शीतस्पर्श इति शीतस्पर्शाभावः साध्यः । धूमादिति हेतुः । यत्र शीतस्पर्शः सन्दृश्यः स्यात्तत्र दृश्यानुपलब्धिर्गमिका । यत्र विरुद्धो वह्निः प्रत्यक्षस्तत्र विरुद्धोपलब्धिः । द्वयोरपि तु परोक्षत्वे विरुद्धकार्योपलब्धिः प्रयुज्यते । तत्र समस्तापवरकव्यं शीतं निवर्तयितुं समर्थस्याग्नेरनुमापकं यदा विशिष्टं धूमकलापं निर्यान्तमपवरकात्पश्यति तदा विशिष्टाद्वह्नेरनुमिताच्छीतस्पर्शनिवृत्तिमनुमिमीते । इह दृश्यमानद्वारप्रदेशसहितः सर्वापवरकाभ्यन्तरदेशो धर्मी साध्यप्रतिपत्त्यनुसरणात्पूर्ववद्द्रष्टव्यः ॥ ५ ॥

प्रतिषेध्यस्य यद्विरुद्धं तेन व्याप्तस्य धर्मान्तरस्योपलब्धिरुदाहर्तव्या । यथेति । ध्रुवमवश्यं भवतीति ध्रुवभावी नेति ध्रुवभावित्वनिषेधः साध्यः । विनाशी धर्मी । भूतस्यापि भावस्येति धर्मिविशेषणम् । भूतस्य जातस्यापि विनश्वरः स्वभावो

नावश्यंभावी किमुताजातस्येत्यपिशब्दार्थः। जननाद्धेतोरन्यो हेतु-र्हेत्वन्तरं मुद्गरादि तदपेक्षते विनश्वरः। तस्यापेक्षणादिति हेतुः। हेत्वन्तरापेक्षणं नामाध्रुवभावित्वेन व्याप्तम्। यथा वाससि रागस्य रञ्जनादिहेत्वन्तरापेक्षणमध्रुवभावित्वेन व्याप्तम्। ध्रुव-भावित्वविरुद्धं चाध्रुवभावित्वम्। विनाशश्च विनश्वरस्वभावात्मा हेत्वन्तरापेक्षः दृष्टः। ततो विरुद्धव्याप्तहेत्वन्तरापेक्षणदर्शनाद्ध्रुव-भावित्वनिषेधः। इह ध्रुवभावित्वं नित्यत्वमध्रुवभावित्वं चानि-त्यत्वम्। नित्यत्वाऽनित्यत्वयोश्च परस्परपरिहारेणावस्थानादेकत्र विरोधः। तथा च सति परस्परपरिहारवतोर्द्वयोर्यदेकं दृश्यते तत्र द्वितीयस्य तादात्म्यनिषेधः कार्यः। तादात्म्यनिषेधश्च दृश्य-तयाऽभ्युपगतस्य संभवति। यत एवं तादात्म्यनिषेधः क्रियते यद्ययं दृश्यमानो नित्यो भवेन्नित्यरूपो दृश्येत। न च नित्यरूपो दृश्यते। तस्मान्न नित्यः। एवं च प्रतिषेध्यस्य नित्यत्वस्य दृश्यमानात्मत्व-मभ्युपगम्य प्रतिषेधः कृतो भवति। वस्तुनोऽप्यदृश्यस्य पिशाचादे-र्यदि दृश्यघटात्मत्वनिषेधः क्रियते दृश्यात्मत्वमभ्युपगम्य कर्तव्यः। यद्ययं दृश्यमानः पिशाचात्मा भवेत्पिशाचो दृष्टो भवेत्। न च दृष्टस्तस्मान्न पिशाच इति दृश्यात्मत्वाभ्युपगमपूर्वको दृश्य-माने घटादौ वस्तुनि वस्तुनोऽवस्तुनो वा दृश्यस्यादृश्यस्य च तादात्म्यनिषेधः। तथा च सति यथा घटस्य दृश्यत्वमभ्युपगम्य प्रतिषेधो दृश्यानुपलम्भादेव तद्वत्सर्वस्य परस्परपरिहारवतो-ऽन्यत्र दृश्यमाने निषेधो दृश्यानुपलम्भादेव। तथा चास्यैवं-जातीयकस्य प्रयोगस्य स्वभावानुपलब्धावन्तर्भावः॥ ६॥

प्रतिषेध्यस्य यत्कार्यं तस्य यद्विरुद्धं तस्योपलब्धेरुदाहरणम् । यथेति । दृहेति धर्मी । अप्रतिबद्धं सामर्थ्यं येषां शीतकारणानां शीतजननं प्रति न तानि सन्तीति साध्यम् । वह्नेरिति हेतुः । यच्च शीतकारणान्यदृश्यानि शीतस्पर्शोऽप्यदृश्यस्तच्चायं हेतुः प्रयोक्तव्यः । दृश्यत्वे तु शीतस्पर्शस्य तत्कारणानां वा कार्यानुपलब्धिर्दृश्यानुपलब्धिर्वा गमिका । तस्मादेषाप्यभावसाधनी । ततो यस्मिन्देशे सदपि शीतकारणमदृश्यं शीतस्पर्शश्च दूरत्वात्प्रतिपत्तुर्वह्निर्भास्वरवर्णत्वाद्दूरादपि दृश्यस्तच्चायं प्रयोगः ॥ ७ ॥

प्रतिषेध्यस्य यद्व्यापकं तेन यद्विरुद्धं तस्योपलब्धिरुदाहर्तव्या । यथेति । अत्रेति धर्मी । तुषारस्पर्शो नेति साध्यम् । वह्नेरिति हेतुः । यच्च व्याप्यस्तुषारस्पर्शो व्यापकश्च शीतस्पर्शो न दृश्यस्तच्चायं हेतुः । तयोर्दृश्यत्वे स्वभावस्य व्यापकस्य चानुपलब्धिर्यतः प्रयोक्तव्या । तथा सत्यभावसाधनीयम् । दूरवर्तिनश्च प्रतिपत्तुस्तुषारस्पर्शः शीतस्पर्शविशेषः । शीतमात्रं च परोक्षम् । वह्निस्तु रूपविशेषाद्दूरस्थोऽपि प्रत्यक्षः । ततो वह्नेः शीतमात्राभावः । ततः शीतविशेषतुषारस्पर्शाभावनिश्चयः । शीतविशेषस्य शीतसामान्येन व्याप्तत्वादिति विशिष्टविषयेऽस्याः प्रयोगः ॥ ८ ॥

प्रतिषेध्यस्य यत्कारणं तस्यानुपलब्धेरुदाहरणम् । यथेति । अत्रेति धर्मी । न धूम इति साध्यम् । वह्नसत्त्वादिति हेतुः । यच्च कार्यं सदपि दृश्यं न भवति तच्चायं प्रयोगः । दृश्ये तु कार्ये दृश्यानुपलब्धिर्गमिका । ततोऽयमप्यभावसाधनम् । निष्कम्पायतसलिलपूरिते ह्रदे हेमन्तोचितबाष्पोद्गमे विरले संध्या-

तमसि सति सन्नपि तत्र धूमो न दृश्य इति कारणानुपलब्ध्या प्रतिषेध्यते। वह्निस्तु यदि तस्याश्मस उपरि भवमानो भवेज्ज्वलितोरूपविशेषादेवोपलब्धो भवेत्। अज्वलितस्त्विन्धनमध्यनिविष्टो भवेत्तत्रापि दहनाधिकरणमिन्धनं प्रत्यक्षमिति स्वरूपेणाधाररूपेण वा दृश्य एव वह्निरिति। तत्रास्याः प्रयोगः॥ ९॥

प्रतिषेध्यस्य यत्कारणं तस्य यद्विरुद्धं तस्योपलब्धेरुदाहरणम्। यथेति। अस्येति धर्मी। रोम्णां हर्ष उद्भेदः स आदिर्येषां दन्तवीणादीनां गीतकृतानां ते विशिष्यन्ते तदन्येभ्यो भयश्रद्धादिकृतेभ्य इति रोमहर्षादिविशेषाः। ते न सन्तीति साध्यम्। दहन एव विशिष्यते तदन्यस्माद्दहनाच्छीतनिवर्तनसामर्थ्येनेति दहनविशेषः। कश्चिद्दहनः सन्नपि न गीतनिवर्तनक्षमो यथा प्रदीपः। तादृग्निवृत्तये विशेषग्रहणम्। संनिहितो दहनविशेषो यस्य स तथोक्तस्य भावस्तस्मादिति हेतुः। यच्च गीतस्पर्शः सन्नप्यदृश्यो रोमहर्षादिविशेषाश्चादृश्यास्तत्रायं प्रयोगः। रोमहर्षादिविशेषस्य दृश्यत्वे दृश्यानुपलब्धिः प्रयोक्तव्या। गीतस्पर्शस्य दृश्यत्वे कारणानुपलब्धिः। तस्मादभावसाधनोऽयम्। रूपविशेषाद्दिदूराद्दहनं पश्यति। गीतस्पर्शस्वदृश्यो रोमहर्षादिविशेषाश्च तेषां कारणविरुद्धोपलब्ध्याभावः प्रतिपद्यत इति। तत्रास्याः प्रयोगः॥ १०॥

प्रतिषेध्यस्य यत्कारणं तस्य यद्विरुद्धं तस्य यत्कार्यं तस्योपलब्धिरुदाहर्तव्या। यथेति। अयं देश इति धर्मी। योगो युक्तं रोमहर्षादिविशेषैर्युक्तं रोमहर्षादिविशेषयुक्तम्। तस्य संबन्धी

पुरुषो रोमहर्षादिविशेषयुक्तपुरुषः । तद्वान्न भवतीति साध्यम् । धूमादिति हेतुः । रोमहर्षादिविशेषस्य प्रत्यक्षत्वे दृश्यानुपलब्धिः । कारणस्य शीतस्पर्शस्य प्रत्यक्षत्वे कारणानुपलब्धिः । वह्नेस्तु प्रत्यक्षत्वे कारणविरुद्धोपलब्धिः प्रयोक्तव्या । त्रयाणामप्यदृश्यत्वेऽयं प्रयोगः । तस्मादभावसाधनोऽयम् । तत्र दूरस्थस्य प्रतिपत्तुर्दहनशीतस्पर्शरोमहर्षादिविशेषा अप्रत्यक्षाः सन्तोऽपि धूमस्तु प्रत्यक्षो यत्र तत्रैतत्प्रमाणम् । धूमस्तु यादृग्गम्भिन्देशे स्थितं शीतं निवर्तयितुं समर्थस्य वह्नेरनुमापकः स दूरे ग्राह्यः । धूममात्रेण तु वह्निमात्रेऽनुमितेपि न शीतस्पर्शनिवृत्तिर्नापि रोमहर्षादिविशेषनिवृत्तिरवसातुं शक्येति न धूममात्रं हेतुरिति द्रष्टव्यमिति ॥ ११ ॥

यद्येकः प्रतिषेधहेतुरुक्तः कथमेकादशाभावहेतव इत्याह । इम इत्यादि । इमेऽनुपलब्धिप्रयोगाः । इदमानन्तरप्रयोगान्ता निर्दिष्टाः । तत्र कियतामपि ग्रहणे प्रसक्त आह । कार्यानुपलब्ध्यादय इति । कार्यानुपलब्ध्यादीनामपि त्रयाणां चतुर्णां वा ग्रहणे प्रसक्ते सत्याह । दशेति । दशानामप्युदाहृतमात्राणां ग्रहणप्रसङ्गे सत्याह । सर्व इत्येतदुक्तं भवति । अप्रयुक्ता अपि प्रयुक्तोदाहरणसदृशाश्च सर्व एवेति दशग्रहणमन्तरेण सर्वग्रहणे क्रियमाणे प्रयुक्तोदाहरणकात्स्न्यं गम्येत । दशग्रहणात्तूदाहरणकात्स्न्येऽवगते सर्वग्रहणमतिरिच्यमानमुदाहृतसदृशकात्स्न्यावगतये जायते । ते स्वभावानुपलब्धौ संग्रहं तादात्म्येन गच्छन्ति । स्वभावानुपलब्धिस्वभावा इत्यर्थः । ननु च स्वभावानुपलब्धि-

प्रयोगाद्भिद्यन्ते कार्यानुपलब्ध्यादयस्तत्कथमन्तर्भवन्तीत्याह। प्रयोगभेदेऽपि। प्रयोगस्य शब्दव्यापारस्य भेदेऽपि अन्तर्भवन्ति। कथं प्रयोगभेद इत्याह। अर्थान्तरविधीत्यादि। प्रतिषेध्यादर्थादर्थान्तरस्य विधिरुपलब्धिः। स्वभावविरुद्धाद्युपलब्धिप्रयोगेषु प्रतिषेधः। कार्यानुपलब्ध्यादिप्रयोगेष्वर्थान्तरविधिनाऽर्थान्तरप्रतिषेधेन च प्रयोगा भिद्यन्ते। यदि प्रयोगान्तरेष्वर्थान्तरविधिप्रतिषेधौ कथं तर्ह्यन्तर्भवन्तीत्याह। पारंपर्येणेति। प्रणालिकयेत्यर्थः। एतदुक्तं भवति। न साक्षादेते प्रयोगा दृश्यानुपलब्धिमभिदधति। दृश्यानुपलब्ध्यव्यभिचारिणं त्वर्थान्तरस्य विधिनिषेधं वाऽभिदधति। ततः प्रणालिकयामीषां स्वभावानुपलब्धौ संग्रहो न साक्षादिति। यदि प्रयोगभेदेन भेदः परार्थानुमाने वक्तव्य एषः। शब्दभेदो हि प्रयोगभेदः। शब्दश्च परार्थानुमानमित्याशङ्क्याह। प्रयोगदर्शनेत्यादि। प्रयोगाणां शास्त्रघटितानां दर्शनमुपलम्भः। तस्याभ्यासः पुनःपुनरावर्तनम्। तस्मान्निमित्तात्स्वयमपीति प्रतिपत्तुरात्मनोऽप्येवमित्यनन्तरोक्तेन क्रमेण व्यवच्छेदस्य प्रतिषेधस्य प्रतीतिर्भवतीति। इतिशब्दस्तस्मादर्थे। तदयमर्थः। यस्मात्स्वयमप्येवमनेनोपायेन प्रतिपद्यते प्रयोगाभ्यासात्तस्मात्स्वप्रतिपत्तावुपयुज्यमानस्यास्य प्रयोगभेदस्य स्वार्थानुमाने निर्देशः। यत्पुनः परप्रतिपत्तावेवोपयुज्यते तत्परार्थानुमान एव वक्तव्यमिति।

ननु च कार्यानुपलब्ध्यादिषु कारणादीनामदृश्यानामेव प्रतिषेधः दृश्यनिषेधे स्वभावानुपलम्भप्रयोगप्रसङ्गात्। तथा च सति न तेषां दृश्यानुपलब्धेर्निषेधस्तत्कथमेषां प्रयोगाणां दृश्यानुपलब्धा-

वन्तर्भाव इत्याह । सर्वत्र चेत्यादि । अभावश्च तस्य च व्यवहारोऽभावव्यवहारौ । स्वभावानुपलब्ध्यभावव्यवहारः साध्यः । निष्टेष्वभावः । तयोः साधन्यामनुपलब्धौ । सर्वत्र चेति चशब्दो हिशब्दस्यार्थे । यस्मात्सर्वत्रानुपलब्धौ येषां प्रतिषेध उक्तस्तेषामुपलब्धिलक्षणप्राप्तानां दृश्यानामेव स प्रतिषेधस्तस्माद्दृश्यानुपलब्ध्यावन्तर्भावः । कुत एतद्दृश्यानामेवेत्याह । स्वभावेत्यादि । अत्रापि चकारो हेत्वर्थः । यस्मात्स्वभावविरुद्ध आदिर्येषां तेषामुपलब्ध्या कारणमादिर्येषां तेषामनुपलब्ध्या प्रतिषेध उक्तस्तस्माद्दृश्यानामेव प्रतिषेध इत्यर्थः । यदि नाम स्वभावविरुद्धाद्युपलब्ध्या कारणाद्यनुपलब्ध्या च प्रतिषेध उक्तस्तथापि कथं दृश्यानामेव प्रतिषेध इत्याह । उपलब्धिरित्यादि । अत्रापि चकारो हेत्वर्थः । यस्माद्ये विरोधिनो व्याप्यव्यापकभूताः कार्य्यकारणभूताश्च ज्ञातास्तेषामवश्यमेवोपलब्धिरुपलब्धिपूर्वा चानुपलब्धिर्वेदितव्या । उपलब्ध्यनुपलब्धी च ते येषां स्तस्ते दृश्या एव । तस्मात्स्वभावविरुद्धाद्युपलब्ध्या कारणाद्यनुपलब्ध्या चोपलब्ध्यनुपलब्धिमता विरुद्धादीनां प्रतिषेधः क्रियमाणो दृश्यानामेव कृतो द्रष्टव्यः । वक्ष्यमाणेषु चोद्येषु प्रक्रान्तेषु परिहारसमुच्चयार्थश्चकारो हेत्वर्थो भवति । यस्मादिदं चेदं च समाधानमस्ति तस्मात्तत्तच्चोद्यमयुक्तमिति चकारार्थः । कस्मात्पुनः प्रतिषेध्यानां विरुद्धादीनामुपलब्ध्यनुपलब्धी वेदितव्ये इत्याह । अन्येषामिति । उपलब्ध्यनुपलब्धिमद्भ्योऽन्येऽनुपलब्धा एव ये तेषां विरोधश्च कार्य्यकारणभावश्च केनचित्सहाभावश्च व्याप्यस्य व्यापकस्याभावेन

सिध्यति यस्मात्ततो विरोधिकार्यकारणभावाभावासिद्धेः कारणादुपलब्ध्यनुपलब्धिमन्त एव विरुद्धादयो निषेध्याः। उभयवन्तश्च दृश्या एव। तस्माद्दृश्यानामेव प्रतिषेधः। तदयमर्थः। विरोधः कार्यकारणभावश्च व्यापकाभावे व्याप्याभावश्च दृश्यानुपलब्धेरेवेति। एकसंनिधावपराभावप्रतीतौ ज्ञातो विरोधः। कारणाभिमताभावे च कार्याभिमताभावप्रत्ययेऽवसितकार्यकारणभावः। व्यापकाभिमताभावे च व्याप्याभावे निश्चिते निश्चितो व्याप्यव्यापकभावः। तत्र व्याप्यव्यापकभावप्रतीतेर्निमित्तमभावः प्रतिपत्तव्यः। वृक्ष गृहीते वृक्षाभावे हि शिंशापात्वाभावप्रतीतौ प्रतीतो व्याप्यव्यापकभावः। अभावप्रतिपत्तिश्च सर्वत्र दृश्यानुपलब्धेरेव। तस्माद्विरोधं कार्यकारणभावं व्याप्यव्यापकभावं च स्मरता विरोधकार्यकारणभावव्याप्यव्यापकभावविषयाभावप्रतिपत्तिनिबन्धनं दृश्यानुपलब्धिः स्मर्तव्या। दृश्यानुपलब्ध्यस्मरणे विरोधादीनामस्मरणम्। तथा च सति न विरुद्धादिविधिप्रतिषेधाभ्यामितराभावप्रतीतिः स्यात्। विरोधादिग्रहणकालभाविन्यां च दृश्यानुपलब्धाववश्यस्मर्तव्यायां तत एवाभावप्रतीतिः। तत्र यद्यपि संप्रति नास्ति दृश्यानुपलब्धिर्विरोधादिग्रहणकाले त्वासीत्। या दृश्यानुपलब्धिः संप्रति स्मर्यमाणा सैवाभावप्रतिपत्तिनिबन्धनम्। ततः संप्रति नास्ति दृश्योपलब्धिरित्यभावसाधनत्वेन दृश्यानुपलब्धिप्रयोगाद्विद्यन्ते कार्यानुपलब्ध्यादिप्रयोगाः। विरुद्धविधिना कारणादिनिषेधेन च यतो दृश्यानुपलब्धिराक्षिप्ता ततो दृश्यानुपलब्धेरेव कार्या-

न्तरवृत्तायाः स्मृतिविषयभूताया अभावप्रतिपत्तिः । अमीषां च प्रयोगाणां दृश्यानुपलब्धावन्तर्भावः । तदनेन सर्वेण दृश्यानुपलब्धावन्तर्भावो दृश्यानामनुपलब्धिप्रयोगाणां पारंपर्येण दर्शित इति वेदितव्यम् ।

उक्ता दृश्यानुपलब्धिरभावेऽभावव्यवहारे साध्ये प्रमाणम् । ५
अदृश्यानुपलब्धिः किंस्वभावा किंव्यापारा चेत्याह । विप्रकृष्टेत्यादि । विप्रकृष्टस्त्रिभिर्देशकालस्वभावविप्रकर्षैर्यस्या विषयः सा विप्रकृष्टविषयेति संग्रयहेतुः । किंस्वभावा सेत्याह । प्रत्यक्षानुमाननिवृत्तिर्लक्षणं स्वभावो यस्याः सा प्रत्यक्षानुमाननिवृत्तिलक्षणा ज्ञानज्ञेयस्वभावेति यावत् । ननु च प्रमाणात्प्रमेयसत्ताव्यवस्था । १०
ततः प्रमाणाभावात्प्रमेयाभावप्रतिपत्तिर्युक्तेत्याह । प्रमाणनिवृत्तावपीत्यादि । कारणं व्यापकं च निवर्तमानं कार्यं व्याप्यं च निवर्तयेत् । न च प्रमाणं प्रमेयस्य कारणं नापि व्यापकमतः प्रमाणयोर्निवृत्तावप्यर्थस्य प्रमेयस्य निवृत्तिर्न सिध्यति । ततोऽसिद्धेः संग्रयहेतुरदृश्यानुपलब्धिः । न निश्चयहेतुः । यत्पुनः प्रमाणसत्तया प्रमेयसत्ता सिध्यति तदयुक्तम् । प्रमेयकार्यं हि प्रमाणम् । न च कारणमन्तरेण कार्यमस्ति । न तु कारणान्यवश्यं कार्यवन्ति भवन्ति । तस्मात्प्रमाणात्प्रमेयसत्ता व्यवस्थाप्या । न प्रमाणाभावात्प्रमेयाभावव्यवस्थेति ॥

इति न्यायबिन्दुटीकायां द्वितीयः परिच्छेदः समाप्तः ॥

अथ तृतीयपरिच्छेदः।

स्वार्थपरार्थानुमानयोः स्वार्थं व्याख्याय परार्थं व्याख्यातुकाम आह। त्रिरूपलिङ्गाख्यानमिति। त्रीणि रूपाण्यन्वयव्यतिरेकपक्षधर्मत्वसंज्ञकानि यस्य तत्त्रिरूपम्। त्रिरूपं च तल्लिङ्गं च तस्याख्यानम्। आख्यायते प्रकाश्यतेऽनेनेति त्रिरूपं लिङ्गमित्याख्यानम्। किं पुनस्तद्वचनम्। वचनेन हि त्रिरूपं लिङ्गमाख्यायते। परस्मायिदं परार्थम्। ननु च सम्यग्ज्ञानात्मकमनुमानमुक्तम्। तत्किमर्थं संप्रति वचनात्मकमनुमानमुच्यत इत्याह। कारणे कार्योपचारादिति त्रिरूपलिङ्गाभिधानात्त्रिरूपलिङ्गस्मृतिरुत्पद्यते स्मृतेश्चानुमानम्। तस्यानुमानस्य परंपरया त्रिरूपलिङ्गाभिधानं कारणम्। तस्मिन्कारणे वचने कार्यस्यानुमानस्योपचारः समारोपः क्रियते। ततः समारोपात्कारणं वचनमनुमानशब्देनोच्यते। औपचारिकं वचनमनुमानं न मुख्यमित्यर्थः। न च यावत्किंचिदुपचारादनुमानशब्देन वक्तुं शक्यं तावत्सर्वं व्याख्येयम्। किं त्वनुमानं व्याख्यातुकामेनानुमानस्वरूपस्य व्याख्येयत्वान्निमित्तं व्याख्येयम्। निमित्तं च त्रिरूपं लिङ्गम्। तच्च स्वयं वा प्रतीतमनुमानस्य निमित्तं भवति परेण वा प्रतिपादितम्। तस्मात्लिङ्गस्य स्वरूपं व्याख्येयं तत्प्रतिपादकस्य शब्दः। तच्च स्वरूपं स्वार्थानुमाने व्याख्यातम्। प्रतिपादकः शब्द इह व्याख्येयः। ततः

प्रतिपादकं शब्दमवश्यं वक्तव्यं दर्शयन्ननुमानशब्देनोक्तवानाचार्य इति परमार्थः ।

परार्थानुमानस्य प्रकारभेदं दर्शयितुमाह । तद्विविधमिति । तदिति परार्थानुमानम् । द्वौ विधौ प्रकारौ यस्य तद्विविधम् । कुतो द्विविधमित्याह । प्रयोगस्य शब्दव्यापारस्य भेदात् । प्रयुक्तिः प्रयोगोऽर्थाभिधानम् । शब्दस्यार्थाभिधानव्यापारभेदाद्विविधमनुमानम् । तदेवाभिधानव्यापारनिबन्धनं द्वैविध्यं दर्शयितुमाह । साधर्म्यवद्वैधर्म्यवच्चेति । समानो धर्मो यस्य सोऽयं सधर्मा तस्य भावः साधर्म्यम् । विसदृशो धर्मोऽस्य विधर्मा विधर्मणो भावो वैधर्म्यम् । दृष्टान्तधर्मिणा सह साध्यधर्मिणः सादृश्यं हेतुकृतं साधर्म्यमुच्यते । असादृश्यं च हेतुकृतं वैधर्म्यमुच्यते । तत्र यस्य साधनवाक्यस्य साधर्म्यमभिधेयं तत्साधर्म्यवत् । यथा यत्कृतकं तदनित्यं यथाद्यघटः । यथा च कृतकः शब्द इत्यत्र कृतकत्वकृतं दृष्टान्तसाध्यधर्मिणोः सादृश्यमभिधेयम् । यस्य तु वैधर्म्यमभिधेयं तद्वैधर्म्यवत् । यथा यन्नित्यं तदकृतकं दृष्टं यथाकाशम् । शब्दस्तु कृतक इति । कृतकत्वाकृतकत्वकृतं शब्दाकाशयोः साध्यदृष्टान्तधर्मिणोरसादृश्यमिहाभिधेयम् ।

यद्यनयोः प्रयोगयोरभिधेयं भिन्नं कथं तर्हि चिरूपं लिङ्गमभिन्नं प्रकाश्यमित्याह । नानयोरर्थत इति । अर्थः प्रयोजनं प्रकाशयितव्यं वस्तु यदुद्दिश्यानुमाने प्रयुज्येते । ततः प्रयोजनादनयोर्न भेदः कश्चित् । चिरूपं हि लिङ्गं प्रकाशयि-

तव्यम्। तदुद्दिश्य द्वे अप्येते प्रयुज्येते। द्वाभ्यामपि त्रिरूपं लिङ्गं प्रकाश्यत एव। ततः प्रकाशयितव्यं प्रयोजनमनयोरभिन्नम्। तथा च न ततो भेदः कश्चित्। अभिधेयभेदोऽपि तर्हि न स्यादित्याह। अन्यत्र प्रयोगभेदादिति। प्रयोगोऽभिधानं वाचकत्वम्। वाचकत्वभेदादन्यो भेदः प्रयोजनकृतो नास्तीत्यर्थः। एतदुक्तं भवति। अन्यदभिधेयमन्यत्प्रकाश्यं प्रयोजनम्। तत्राभिधेयापेक्षया वाचकत्वं भिद्यते। प्रकाश्यं त्वभिन्नम्। अन्वये हि कथिते वक्ष्यमाणेन न्यायेन व्यतिरेकगतिर्भवति। व्यतिरेके चान्वयगतिः। ततस्त्रिरूपं लिङ्गं प्रकाश्यमभिन्नम्। न च यत्राभिधेयभेदस्तत्र सामर्थ्यगम्योऽप्यर्थो भिद्यते। यस्मात्पीनो देवदत्तो दिवा न भुङ्क्ते। पीनो देवदत्तो रात्रौ भुङ्क्ते इति। अनयोर्वाक्ययोरभिधेयभेदेऽपि गम्यमानमेकमेव। तद्वदिहाभिधेयभेदेऽपि गम्यमानं वस्त्वेकमेव।

तत्रेति। तयोः साधर्म्यवैधर्म्यवतोरनुमानयोः साधर्म्यवत्तावदुदाहरन्ननुपलब्धिमाह। यदित्यादिना। यदुपलब्धिलक्षणप्राप्तं यद्दृश्यं सल्लोपलभ्यत इति। अनेन दृश्यानुपलम्भोऽनूद्यते। सोऽसद्व्यवहारस्य विषयः सिद्धः। तदसदिति व्यवहर्तव्यमित्यर्थः। अनेनासद्व्यवहारयोग्यत्वस्य विधिः कृतः, ततश्चासद्व्यवहारस्य योग्यत्वे दृश्यानुपलम्भो नियतः कथितः। दृश्यमनुपलब्धमसद्व्यवहारयोग्यमेवेत्यर्थः। साधनस्य च साध्येऽर्थे नियतत्वकथनं व्याप्तिकथनम्। यथोक्तम्। व्याप्तिर्व्यापकस्य तत्र भाव एव व्याप्यस्य च तत्रैव भाव इति।

व्याप्तिसाधनस्य प्रमाणस्य विषयो दृष्टान्तस्तमेव दर्शयितु-माह। यथाऽन्य इति। साध्यधर्मिणोऽन्यो दृष्टान्त इत्यर्थः। दृष्ट इति प्रमाणेन निश्चितः। गगनविषाणं हि न चक्षुषा विषयी-कृतम्। अपि तु प्रमाणेन दृश्यानुपलम्भेनासद्व्यवहारयोग्यं विज्ञातम्। गगनविषाणमादिर्यस्यासद्व्यवहारविषयस्य स तथोक्तः। गगनविषाणादौ हि दृश्यानुपलम्भमात्रनिमित्तोऽसद्व्यवहारः प्रमाणेन सिद्धः। तत एव प्रमाणादनेन वाक्येनाभिधीयमाना व्याप्तिर्ज्ञातव्या।

संप्रति व्याप्तिं कथयित्वा दृश्यानुपलम्भस्य पक्षधर्मत्वं दर्श-यितुमाह। नोपलभ्यते चेति। प्रदेशः एकदेशः पृथिव्याः। स एव विशिष्यतेऽन्यस्मादिति विशेषः। एकः प्रदेशविशेष इत्येकस्मिन्प्रदेशे क्वचिदिति। प्रतिपत्तुः प्रत्यक्ष एकोऽपि प्रदेशः स एवाभावव्यवहाराधिकरणं यः प्रतिपत्तुः प्रत्यक्षो नाऽन्यः। उपलब्धिलक्षणप्राप्त इति दृश्यः। यथा चासतोऽपि घटस्य समा-रोपितमुपलब्धिलक्षणप्राप्तत्वं तथा व्याख्यातम्।

स्वभावहेतोः साधर्म्यवन्तं प्रयोगं दर्शयितुमाह। तथेति। यथानुपलब्धेस्तथा स्वभावहेतोः साधर्म्यवान्प्रयोग इत्यर्थः। यत्सदिति सत्त्वमनूद्य तत्सर्वमनित्यमित्यनित्यत्वं विधीयते। सर्वग्रहणं च नियमार्थम्। सर्वमनित्यं न किंचिन्नानित्यं यत्सत्तद-नित्यमेवानित्यत्वादन्यत्र नित्यत्वे सत्त्वं नास्तीत्येवं सत्त्वमनित्यत्वे साध्ये नियतं व्यापितं भवति। तथा च सति व्याप्तिप्रदर्शन-वाक्यमिदम्। यथा घटादिरिति। व्याप्तिसाधनस्य प्रमाणस्य

विषयकथनमेतत्। शुद्धस्येति। निर्विशेषणस्य स्वभावस्य प्रयोगः।

सविशेषणं दर्शयितुमाह। यदुत्पत्तिमदिति। उत्पत्तिः स्वरूपलाभो यस्यास्ति तदुत्पत्तिमत् उत्पत्तिमत्त्वमनूद्य तदनित्यमित्यनित्यत्वविधेः। तथा च सत्युत्पत्तिमत्त्वमनित्यत्वे नियतमाख्यातम्। स्वभावभूतः स्वभावात्मको धर्मस्तस्य भेदेन भेदं हेतूकृत्य प्रयोगः। अनुत्पन्नेभ्यो हि व्यावृत्तिमाश्रित्योत्पन्नो भाव उच्यते। सैव व्यावृत्तिः। यदा व्यावृत्त्यन्तरनिरपेक्षा वक्तुमिष्यते तदा व्यतिरेकिणीव निर्दिश्यते। भावस्योत्पत्तिरिति तया च व्यतिरिक्तयेवोत्पत्त्या विशिष्टं वस्तूत्पत्तिमदुक्तम्। तेन स्वभावभूतेन धर्मेण कल्पितभेदेन विशिष्टः स्वभावः प्रयुक्तो द्रष्टव्यः। यत्कृतकमिति। कृतकत्वमनूद्यानित्यत्वं विधीयत इति। अनित्यत्वे नियतं कृतकत्वमुक्तमतो व्याप्तिरनित्यत्वेन कृतकस्य दर्शिता। उपाधिभेदेन स्वभावस्य प्रयोग इति संबन्धः। उपाधिर्विशेषणम्। तस्य भेदेन भिन्नेनोपाधिना विशिष्टः स्वभावः प्रयुक्त इत्यर्थः। इह कदाचिच्छुद्ध एवार्थ उच्यते। कदाचिदव्यतिरिक्तेन विशेषणेन विशिष्टः। कदाचिद्व्यतिरिक्तेन। देवदत्त इति शुद्धः। लम्बकर्ण इत्यभिन्नकर्णद्वयविशिष्टः। चिचगुरिति व्यतिरिक्तचिचगवीविशिष्टः। तदुत्पत्तिमत्त्वं शुद्धमुत्पत्तिमत्त्वमव्यतिरिक्तविशेषणम्। कृतकत्वं व्यतिरिक्तविशेषणम्। ननु च चिचगुशब्दे व्यतिरिक्तस्य विशेषणस्य वाचकश्चिचशब्दो गोशब्दश्चास्ति। कृतकशब्दे तु निर्विशेषणवाचिनः शब्दस्य प्रयोगोऽस्तीत्याशङ्क्याह। अपेक्षितेति। परेषां कारणानां व्यापारः स्वभावस्य निष्पत्तौ

निष्पत्त्यर्थमपेक्षितः परव्यापारो येन स तथोक्तः । हीति यस्मादर्थे । यस्मादपेक्षितपरव्यापारः कृतक उच्यते तस्माद्व्यतिरिक्तेन विशेषणेन विशिष्टः स्वभाव उच्यते । यद्यपि व्यतिरिक्तं विशेषणपदं न प्रयुक्तं तथापि कृतकशब्देनैव व्यतिरिक्तं विशेषणमन्तर्भावितमत एव संज्ञाप्रकारोऽयं कृतकशब्दः । यस्मात्संज्ञाया- ५
मयं कन्प्रत्ययो विहितः । यत्र च विशेषणमन्तर्भाव्यते तत्र विशेषणपदं न प्रयुज्यते । क्वचित्प्रतीयमानं विशेषणं यथा कृत इत्युक्ते हेतुभिरित्येतत्प्रतीयते । तत्र च हेतुशब्दः प्रयुज्यते । कदाचिन्न वा प्रयुज्यते । प्रयुज्यमानस्वशब्दस्य यथा प्रत्ययभेद-भेदिशब्दे प्रत्ययभेदः । यथा च कृतकशब्दो भिन्नविशेषण- १०
स्वभावाभिधायेवं प्रत्ययभेदभेदित्वमादिर्येषां प्रयत्नानन्तरीयकत्वादीनां तेऽपि स्वभावहेतोः प्रयोगा भिन्नविशेषणस्वभावाभिधायिनो द्रष्टव्याः । प्रत्ययानां कारणानां भेदो विशेषस्तेन प्रत्ययभेदेन भेत्तुं शीलं यस्य स प्रत्ययभेदभेदी शब्दस्तस्य भावः प्रत्ययभेदभेदित्वम् । ततः प्रत्ययभेदभेदित्वाच्छब्दस्य कृतकत्वं १५
साध्यते । प्रयत्नानन्तरीयकत्वादनित्यत्वं साध्यते । तत्र प्रत्ययभेद-शब्दो व्यतिरिक्तविशेषणाभिधायी प्रत्ययभेदभेदिशब्दे प्रयुक्तः । प्रयत्नानन्तरीयकशब्दे च प्रयत्नशब्दः । तदेवं त्रिविधः स्वभाव-हेतुप्रयोगो दर्शितः । शुद्धोऽव्यतिरिक्तविशेषणो व्यतिरिक्त-विशेषणश्च । एवमर्थं चैतदाख्यातम् । वाचकभेदान्ना भूत्कस्य- २०
चित्स्वभावहेतावपि प्रयुक्ते व्यामोह इति ।

अथ किमेते स्वभावहेतवः सिद्धसंबन्धे स्वभावे साध्ये प्रयो-

कृत्या आहोस्विदसिद्धसंबन्ध इत्याशङ्क्य सिद्धसंबन्धे प्रयोक्तव्या इति दर्शयितुमाह सर्व एत इति। गमकत्वात्साधनानि पराश्रितत्वाच्च धर्माः साधनधर्मा एव साधनधर्ममात्रम्। मात्रशब्देनाधिकस्यापेक्षणीयस्य निरासः। तस्यानुबन्धोऽनुगमनमन्वयः सिद्धः साधनधर्ममात्रानुबन्धो यस्य स तथोक्तः। केन सिद्ध इत्याह। यथास्वं प्रमाणैरिति। यस्य साध्यधर्मस्य यदात्मीयं प्रमाणं तेनैव प्रमाणेन सिद्ध इत्यर्थः। स्वभावहेतूनां च बहुभेदत्वात्। संबन्धसाधनान्यपि प्रमाणानि बहूनीति प्रमाणैरिति बहुवचननिर्देशः। गमयितव्यत्वात्साध्यः पराश्रितत्वाच्च धर्मः साध्यधर्मस्तदयं परमार्थः। न हेतुः प्रदीपवद्योग्यतया गमकोऽपि तु नानन्तरीयकतया विनिश्चितः। साध्याविनाभावित्वनिश्चयनमेव हि हेतोः साध्यप्रतिपादनव्यापारो नाऽन्यः कश्चित्। प्रथमं बाधकेन प्रमाणेन साध्यप्रतिबन्धो निश्चेतव्यो हेतोः पुनरनुमानकालेन साधनं साध्यानन्तरीयकं सामान्येन स्मर्तव्यम्। कृतकत्वं नामाऽनित्यत्वस्वभावमिति सामान्येन स्मृतमर्थं पुनर्विशेषे योजयतीदमपि कृतकत्वं शब्दे वर्तमानमनित्यस्वभावमेवेति। तत्र सामान्यस्मरणं लिङ्गज्ञानम्। विशिष्टस्य तु शब्दगतकृतकत्वस्यानित्यत्वस्वभावस्य स्मरणमनुमानज्ञानम्। तथा च सत्यविनाभावित्वज्ञानमेव परोक्षार्थप्रतिपादकत्वं नाम। तेन निश्चिततन्मात्रानुबन्धिसाध्यधर्मे स्वभावहेतवः प्रयोक्तव्या नान्यथेत्युक्तम्।

यद्येवं संबन्धो निश्चेतव्यः साध्यस्य साधनेन सह साधन-

धर्ममात्रानुबन्धस्तु साध्यस्य कस्मान्निश्चितो मृग्यत इत्याह ।
तस्यैवेति । सिद्धसाधनधर्ममात्रानुबन्धस्य तत्स्वभावत्वादिति ।
साधनधर्मस्वभावत्वात् । यो हि साध्यधर्मः साधनधर्ममात्रा-
नुबन्धवान्स एव तस्य साधनधर्मस्य स्वभावो नाऽन्यः । भवत्वी-
दृश एव स्वभावः । स्वभाव एव तु साध्ये कस्माद्धेतुप्रयोगः । ५
स्वभावस्य हेतुत्वात् । स्वभाव एव हेतुः प्रक्रान्तः । तस्मात्स
एव साध्यः कर्तव्यः । यः साधनस्य स्वभावः स्यात्साधनधर्म-
मात्रानुबन्धश्च स्वभावो नाऽन्यः । यदि साध्यधर्मः साधनस्य
स्वभावः प्रतिज्ञार्थैकदेशस्तर्हि हेतुः स्यादित्याह । वस्तुत इति ।
वस्तुतः परमार्थतः साध्यसाधनयोस्तादात्म्यम् । समारोपितस्तु १०
साध्यसाधनयोर्भेदः । साध्यसाधनभावो हि निश्चयारूढे रूपे ।
निश्चयारूढं च रूपं समारोपितेन भेदेनेतरेतरव्यावृत्तिकृतेन
भिन्नमित्यन्यत्साधनमन्यत्साध्यम् । दूराद्धि शाखादिमानयं वृक्ष
इति निश्चीयते न शिंशपेति । अथ च स एव वृक्षः । सैव
शिंशपा । तस्मादभिन्नमपि वस्तु निश्चयो भिन्नमादर्शयतिव्या- १५
वृत्तिभेदेन । तस्मान्निश्चयारूढरूपापेक्षयाऽन्यत्साधनमन्यत्साध्य-
मतो न प्रतिज्ञार्थैकदेशो हेतुर्वास्तवं च तादात्म्यमिति । कस्मा-
त्पुनः साधनधर्ममात्रानुबन्ध्येव साध्यः स्वभावो नाऽन्य इत्याह ।
तन्निष्पत्ताविति । यो हि यन्नानुबध्नाति स तन्निष्पत्तावनि-
ष्पन्नः । तस्य तन्निष्पत्तावनिष्पन्नस्य साधनस्वभावत्वमयुक्तम् । २०
यतो निष्पत्त्यनिष्पत्ती भावाभावरूपे । भावाभावौ च परस्पर-
परिहारेण स्थितौ । यदि च पूर्वनिष्पन्नस्यानिष्पन्नस्य चैक्यं

भवेदेकस्यैवार्थस्य भावाभावौ स्यातां युगपन्न च विरुद्धयो-
र्भावाभावयोरैक्यं युज्यते। विरुद्धधर्मसंसर्गात्मकत्वादेकत्वाभावस्य।
किं च पश्चादुत्पद्यमानं पूर्वनिष्पन्नाद्भिन्नहेतुकम्। हेतुभेद-
पूर्वकश्च कार्य्यभेदः। ततो निष्पन्नाऽनिष्पन्नयोर्विरुद्धधर्मसंसर्गा-
५ त्मको भेदो भेदहेतुश्च कारणभेद इति कुत एकत्वम्। तस्मा-
त्साधनधर्ममात्रानुबन्ध्येव साध्यः स्वभावो नाऽन्यः। सा भूत्वश्चा-
न्निष्पन्नः पूर्वजस्य स्वभावः। साध्यस्तु कस्मान्न भवतीत्याह।
पूर्वजेन पश्चान्निष्पन्नस्य व्यभिचारः परित्यागो यस्तस्य संभवाच्च।
न पूर्वनिष्पन्नस्य पश्चान्निष्पन्नः साध्यः। तस्मात्साधनधर्ममात्रा-
१० नुबन्ध्येव स्वभावः। स एव च साध्यः। तथा च सिद्धसाधनधर्म-
मात्रानुबन्ध एव स्वभावहेतवः प्रयोक्तव्या इति स्थितम्।

कार्य्यहेतोः प्रयोगः साधर्म्यवानिति प्रकरणाद्गम्यतीयम्। यत्र
धूम इति। धूममनूद्य तत्राग्निरित्यग्नेर्विधिः। तथा च नियमार्थः
पूर्ववदनुगन्तव्यः। तदनेन कार्यकारणभावनिमित्ता व्याप्ति-
१५ र्दर्शिता। व्याप्तिसाधनप्रमाणविषयं दर्शयितुमाह। तथा महानसा-
दाविति। महानसादौ हि प्रत्यक्षानुपलम्भाभ्यां कार्यकारण-
भावात्माविनाभावो निश्चितः। अस्ति चेहेति। साध्यधर्मिणि पक्ष-
धर्मोपसंहारः। इहापीति। न केवलं स्वभावहेताविहापि कार्य्यहेतौ
सिद्ध एवेति। निश्चिते कार्य्यकारणत्वे कार्य्यकारणत्वनिश्चयो ह्यवश्य-
२० कर्तव्यः। यतो न योग्यतया हेतुर्गमकोऽपि तु नान्तरीयकत्वादि-
त्युक्तम्। साधर्म्यवान्स्वभावकार्य्यानुपलम्भानां प्रयोगो दर्शितः।

वैधर्म्यवन्तं दर्शयितुमाह। वैधर्म्यवत इति। यत्सदुपलब्धि-

लक्षणप्राप्तमिति । यत्सदृश्यमित्यस्तित्वानुवादः । तदुपलभ्यत इति उपलम्भविधिः । तदनेन दृश्यस्य सत्त्वं दर्शनविषयत्वेन व्याप्तं कथितमसत्त्वनिवृत्तिश्च । सत्त्वमनुपलम्भनिवृत्तिश्चोपलम्भः । तेन साध्यनिवृत्त्यनुवादेन साधननिवृत्तिर्विहिता । तथा च साध्यनिवृत्तिः साधननिवृत्तौ नियतत्वात्साधननिवृत्त्या व्याप्ता कथिता । यदि च धर्मिणि साध्यधर्मो न भवेद्धेतुरपि । हेत्वभावेन साध्याभावस्य व्याप्तत्वात् । अस्ति च हेतुरतो व्यापकस्य साधनाभावस्याभावाद्व्याप्यस्य साध्याभावस्याभाव इति साध्यनिश्चयो भवति । ततो वैधर्म्यप्रयोगे साधनाभावे साध्याभावो नियतो दर्शनीयः सर्वत्रेति न्यायः ।

स्वभावहेतोर्वैधर्म्यप्रयोगमाह । असत्यनित्यत्व इति । इहानित्यस्य साध्यस्याभावो हेतोरभावे नियत उच्यते । तेन हेत्वभावेन साध्याभावो व्याप्त उक्तः । त्रिष्वपि स्वभावहेतुषु सत्त्वोत्पत्तिमान्कृतको वा शब्द इति त्रयाणामपि पक्षधर्मत्वप्रदर्शनम् । इह च साधनाभावस्य व्यापकस्याभाव उक्तः । ततो व्याप्योऽपि साध्याभावो निवृत्त इति साध्यगतिः ।

कार्यहेतोर्वैधर्म्यप्रयोगमाह । असत्यग्नाविति । इहापि वह्न्यभावो धूमाभावेन व्याप्त उक्तः । अस्ति चाऽत्र धूम इति व्यापकस्य धूमाभावस्याभाव उक्तः । ततो व्याप्यस्य वह्न्यभावस्याभावे साध्यगतिः ।

ननु च साधर्म्यवति व्यतिरेको नोक्तः । वैधर्म्यवति चान्वयः । तत्कथमेतत्त्रिरूपलिङ्गाख्यानमित्याह । साधर्म्येणेति । साधर्म्येणाप्यभिधेयेन युक्ते प्रयोगे क्रियमाणेऽर्थादिति सामर्थ्याद्वैधर्म्यस्य

व्यतिरेकस्य गतिर्भवतीति। ह्रीति यस्मात्। तस्मात्तिरूपलिङ्गाख्यानमेतत्। यदि नाम व्यतिरेकोऽन्वयवति नोक्तोऽन्वयवचनसामर्थ्यादेवावसीयते। कथमसति तस्मिन्व्यतिरेके बुद्ध्यवसिते साध्येन हेतोरन्वयस्य बुद्ध्यावसितस्याभावात्। साध्ये नियतं साधनमन्वयवाक्याद्वस्यता साध्याभावे साधनं नाशङ्कनीयम्। इतरथा साध्यनियतमेव न प्रतीतं स्यात्साध्याभावे च साधनाभावगतिर्व्यतिरेकगतिः। अतः साध्यनियतस्य साधनस्याभिधानसामर्थ्यादन्वयवाक्येऽवसितो व्यतिरेकः। तथेति। यथान्वयवाक्ये तथार्थादेव वैधर्म्येण प्रयोगेऽन्वयस्यानभिधीयमानस्यापि गतिः। कथमसति तस्मिन्नन्वये बुद्धिग्राह्यते ते साध्याभावे हेत्वभावस्यासिद्धेरनवसायात्। हेत्वभावे साध्याभावं नियतं व्यतिरेकवाक्याद्वस्यता हेतुसंभवे साध्याभावो नाशङ्कनीयः। इतरथा हेत्वभावे नियतः साध्याभावो न स्यात्प्रतीतः। हेतुसत्त्वे च साध्यसत्त्वगतिरन्वयगतिः। अतः साधनाभावनियतस्य साध्याभावस्याभिधानसामर्थ्याद्व्यतिरेकवाक्येऽन्वयगतिः। यदि नामाकाशादौ साध्याभावे साधनाभावस्तथापि किमिति हेतुसंभवे साध्यसंभव इत्याह। नह्यौतीति। स्वभावेन प्रतिबन्धो यस्मिन्सत्येकस्य साध्यस्य निवृत्त्या नापरस्य साधनस्य नियमेन युक्ता नियमवती निवृत्तिः। स च स्वभावप्रतिबन्धो द्विप्रकारः सर्वस्य। तादात्म्यं लक्षणं निमित्तं यस्य स तथोक्तः तदुत्पत्तिर्लक्षणं निमित्तं यस्य स तथोक्तः। यो यत्र प्रतिबद्धस्तस्य स प्रतिबन्धविषयोऽर्थः स्वभावः कारणं वा स्यात्। अन्यस्मिन्प्रतिबद्धत्वानुपपत्तेः। तस्माद्विप्रकारः स इत्युक्तम्।

स च साध्येऽर्थे लिङ्गस्येत्यत्रान्तरेऽभिहितः । हिर्यस्मादर्थे । यस्मात्स्वभावप्रतिबन्धे निवर्त्यनिवर्तकभावस्तेन साध्यस्य निवृत्तौ साधनस्य निवृत्तिं कथयता प्रतिबन्धो निवर्त्यनिवर्तकयोर्दर्शनीयः । यदि हि साधनं साध्ये प्रतिबद्धं भवेदेवं साध्यनिवृत्तौ तन्नियमेन निवर्तेत । यतश्च तस्यं प्रतिबन्धो दर्शनीयस्तस्मात्साध्यनिवृत्तौ यत्साधननिवृत्तिवचनं तेनाच्छिन्नं प्रतिबन्धोपदर्शनम् । यच्च तदाच्छिन्नप्रतिबन्धोपदर्शनं तदेवान्वयवचनम् । प्रतिबन्धश्चेदवश्यं दर्शयितव्यः । न वक्तव्यस्तर्ह्यन्वयः । यस्माद्दृष्टान्ते प्रमाणेन प्रतिबन्धो दर्श्यमान एवान्वयो नापरः कश्चित्तस्मान्निवर्त्यनिवर्तकप्रतिबन्धो ज्ञातव्यः । तथा चान्वय एव ज्ञातो भवति । इतिशब्दो हेतौ । यस्मादन्वये व्यतिरेकगतिर्व्यतिरेके चान्वयगतिस्तस्मादेकेनापि सपक्षे चासपक्षे च सत्त्वासत्त्वयोः ख्यापनं कृतम् । अन्वयो मुखमुपायोऽभिधेयत्वाद्यस्य तदन्वयमुखं वाक्यम् । एवं व्यतिरेको मुखं यस्येति । इति हेतौ । यस्मादेकेनापि वाक्येन द्वयगतिस्तस्मादेकस्मिन्साधनवाक्ये द्वयोरन्वयव्यतिरेकवाक्ययोरवश्यमेव प्रयोगो न कर्तव्यः । अर्थगत्यर्थो हि शब्दप्रयोगः । अर्थश्चेदवगतः किं शब्दप्रयोगेण । एकमेव त्वन्ववाक्यं व्यतिरेकवाक्यं वा प्रयोक्तव्यम् । अनुपलब्धावपि व्यतिरेकेणोक्तेनान्वयगतिः । यत्सदुपलब्धिलक्षणप्राप्तमिति । साध्यस्याभावव्यवहारयोग्यत्वस्य निवृत्तिदृश्यसत्त्वरूपमाह । तदुपलभ्यत एवेति । अनुपलम्भस्य निवृत्तिमुपलम्भरूपामाह । तदनेन साध्यनिवृत्तिः साधननिवृत्त्या व्याप्ता दर्शिता । यदि च साधनसंभवेऽपि

साध्यनिवृत्तिर्भवेन्न साधनाभावेन व्याप्ता भवेत्। अतो व्याप्तिं प्रतिपद्यमानेन साधनसंभवः साध्यसंभवेन व्याप्तः प्रतिपत्तव्यः। अत-एवाह्यनुपलभ्यमानतादृग्गमिति। दृश्यमसदिति प्रतीतेः संप्रत्यया-दन्वयसिद्धिरिति। यतश्च साधनं साध्यधर्मप्रतिबद्धं तादात्म्य-तदुत्पत्तिभ्यां प्रतिपत्तव्यं द्वयोरपि प्रयोगयोस्तस्मात्पक्षोऽवश्य-मेव न निर्देश्यः। यत्साधन साध्यनियतं प्रतीत तत एव साध्य-धर्मिणि दृष्ट्वा साध्यप्रतीतिरतो न किंचित्साध्यनिर्देशेनेत्येवमेवार्थ-मनुपलब्धिप्रयोगे दर्शयति। साधर्म्यवति प्रयोगेऽपि सामर्थ्यादेव नेह घट इति भवति। किं पुनस्तत्सामर्थ्यमित्याह। यदुप-लब्धिलक्षणप्राप्तमिति। अनुपलम्भानुवादः सोऽसद्व्यवहारविषय इत्यसद्व्यवहारयोग्यत्वविधिः। तथा च सति दृश्यानुपलम्भो ऽसद्व्यवहारयोग्यत्वेन व्याप्तो दर्शितः। नोपलभ्यत इत्यादिना साध्यधर्मिणि सत्त्वं लिङ्गस्य दर्शितम्। यदि च साध्यधर्मस्तच्च साध्यधर्मिणि न भवेत्साधनधर्मोऽपि न भवेत्। साध्यनियतत्वात्तस्य साधनधर्मस्येति सामर्थ्यम्। यथा साधर्म्यवत्प्रयोगे तथा वैधर्म्यवत्प्र-योगेऽपि सामर्थ्यादेव नेह सद्व्यवहारविषयोऽस्ति घट इति भवति। सामर्थ्यं दर्शयितुमाह। यः सद्व्यवहारविषय इति। विद्यमानः। उपलब्धिलक्षणप्राप्त इति। दृश्यः। इत्येषा साधनिवृत्तिरुपलभ्यत एवेति साधननिवृत्तिरित्यनेन च साधनिवृत्तिः साधननिवृत्त्या व्याप्ता दर्शिता। न तथेति। यथाऽन्यो दृश्य उपलभ्यते न तथाच प्रदेशे तादृग्न इति दृश्यो घट उपलभ्यत इत्यनेन साध्यनिवृत्ते-र्व्यापिका साधननिवृत्तिरसती साध्यधर्मिणि दर्शिता।

यदि च न साध्यधर्मः साध्यधर्मिणि भवेत्साधनधर्मोऽपि न भवेदस्ति च साधनधर्म इति सामर्थ्यात्ततः सामर्थ्यान्नास्त्यत्र घट इति प्रतीतेर्न पक्षनिर्देशः । एवं कार्य्यस्वभावहेत्वोरपि सामर्थ्यात्प्रत्यय इति न पक्षनिर्देशः । कीदृशः पुनरर्थः पक्ष इत्यनेन शब्देन निर्देश्यो वक्तव्य इत्याह । स्वरूपेणैवेति । साध्यत्वेनैव स्वयमिति वादिना इष्ट इति नोक्त एवापि त्विष्टोऽपीत्यर्थः । एवभूतः सन्प्रत्यक्षादिभिरनिराकृतो योऽर्थः स पक्ष इत्युच्यते । अथ यदि न पक्षो निर्देश्यः कथमनिर्देश्यस्य लक्षणमुक्तम् । न साधनवाक्यावयवत्वादस्य लक्षणमुक्तमपि त्वसाध्यं केचित्साध्यं साध्यं चासाध्यं प्रतिपन्नाः । तत्साध्यासाध्यविप्रतिपत्तिनिराकरणार्थं पक्षलक्षणमुक्तम् । स्वरूपेणेष्ट इत्यस्य विवरणम् । साध्यत्वेनेष्ट इति पक्षस्य साध्यत्वान्नापरमस्ति रूपम् । अतः स्वरूपं साध्यत्वमिति । एवशब्दं विवरीतुमाह । स्वरूपेणैवेति ।

ननु चैवशब्दः केवल एव प्रत्यवमर्षव्यस्तत्किमर्थं स्वरूपशब्देन सह प्रत्यवमृष्टः । उच्यते । एवशब्दो निपातो द्योतकः । पदान्तराभिहितस्यार्थस्य विशेषं द्योतयतीति पदान्तरेण विशेष्यवाचिना सह निर्दिष्टः । न साधनत्वेनापीति । यत्साधनत्वेन निर्दिष्टं तत्साधनत्वेनेष्टमसिद्धत्वाच्च साध्यत्वेनापीष्टं तस्य निवृत्त्यर्थ एवशब्दः तदुदाहरति । यथेति । शब्दस्यानित्यत्वे साध्ये चाक्षुषत्वं हेतुः । शब्देऽसिद्धत्वात्साध्यमित्यनेन साध्यत्वेनेष्टिमाह । तदिति । चाक्षुषत्वमिहेति शब्दे न साध्यत्वेनैवेष्टमिति । साध्य-

त्वेनेष्टिनियमाभावमाह। साधनत्वेनाभिधानादिति। यतः साधनत्वेनाभिहितमतः साधनत्वेनापीष्टम्। न साध्यत्वेनैवेति। स्वयमित्यनेन स्वयंशब्दं व्याख्येयमुपक्षिप्य तस्यार्थमाह। वादिनेति। स्वयंशब्दो निपातः। आत्मन इति षष्ठ्यन्तस्यात्मनेति च तृतीयान्तस्यार्थे वर्तते। तदिह तृतीयान्तस्यात्मशब्दस्यार्थे वृत्तः स्वयंशब्दः। आत्मशब्दश्च संबन्धिशब्दो वादी च प्रत्यासन्नभूतो यस्य वादिन आत्मा तृतीयार्थयुक्तः स एव तृतीयार्थयुक्तो निर्दिष्टो वादिनेति। ननु स्वयंशब्दस्य वादिनेत्येष पर्य्यायः। कः पुनरसौ वादीत्याह। यस्तदेति। वादकाले साधनमाह। अनेकवादिसंभवेऽपि स्वयंशब्दवाच्यस्य वादिनो विशेषणमेतत्। यद्येव वादिन इष्टः साध्य इत्युक्तम्। एतेन च किमुक्तेन। अनेन तदा वादकाले तेन वादिना स्वयं यो धर्मः साधयितुमिष्टः स एव साध्यो नेतरो धर्म इत्युक्तं भवति। वादिनोऽनिष्टधर्मसाधयत्वनिवर्तनमस्य वचनस्य फलमिति यावत्। अथ कस्मिन्सत्यन्यधर्मसाध्यत्वसंभवो यन्निवृत्त्यर्थं चेदं वक्तव्यमित्याह। तच्छास्त्रकारेणेति। यच्छास्त्रं तेन वादिनाऽभ्युपगतं तच्छास्त्रकारेण तस्मिन्साध्यधर्मिण्यनेकस्य धर्मस्याभ्युपगमे सत्यन्यधर्मसाध्यत्वसंभवः। तथा हि शास्त्रं येनाभ्युपगतं तत्सिद्धो धर्मः सर्व एव तेन साध्य इत्यस्ति विप्रतिपत्तिरनेनापास्यते। अनेकधर्माभ्युपगमेऽपि सति स एव साध्यो यो वादिन इष्टो नाऽन्य इति।

ननु च शास्त्रानपेक्षं वस्तुबलप्रवृत्तं लिङ्गम्। अतोऽनपेक्षणीयत्वान्न शास्त्रे स्थित्वा वादः कर्तव्यः। सत्यम्। आहोपुरुषिकया

तु यद्यपि क्वचिच्छास्त्रे स्थित इति किंचिच्छास्त्रमभ्युपगतः, साधनमाह । तथापि य एव तस्येष्टः स एव साध्य इति ज्ञापनायेदमुक्तम् । इष्ट इति । इष्टशब्दमुपक्षिप्य व्याचष्टे । यत्रार्थे आत्मनि विरुद्धो वादः प्रक्रान्तो नास्त्यात्मेत्यात्म-प्रतिषेधवाद आत्मसत्तावादविरुद्धो विधि-प्रतिषेधयोर्विरोधात् । तेन विवादेन हेतुना साधनमुपन्यस्तम् । तस्मात्मार्थस्य सिद्धिं निश्चयमिच्छता वादिना सोऽर्थः साध्य इत्युक्तं भवतीष्टशब्देन । यत्तदित्युक्तं भवतीतिग्रहणमन्ते तदिहापेक्ष्य वाक्यं परिसमाप-यितव्यम् । यद्यपि परार्थानुमान उक्त एव साध्यो युक्तो ऽनुक्तोऽपि तु वचनेन साध्यः सामर्थ्योक्ततत्त्वात्तस्य । कुत एतदित्याह । तदि-त्यादि । तदिति । सो ऽधिकरणमाश्रयो यस्य स तदधिकरणो विवादस्तस्य भावस्तत्त्वं तस्मादित्येतदुक्तं भवति । यस्माद्विवादं निराकर्तुमिच्छता वादिना साधनमुपन्यस्तं तस्माद्यदधिकरणं विवादस्य तदेव साध्यम् । यतो विरुद्धं वादमपनेतुं साधनमुप-न्यस्तम् । तच्चेन्न साध्यं किमिदानीं जगति नियतं किंचित्साध्यं स्यादिति ।

अनुक्तमपि परार्थानुमाने साध्यमिष्टं तदुदाहरति । परार्था इति । चक्षुरादिर्येषां श्रोत्रादीनां ते चक्षुरादय इति धर्मी । परस्मायिमे परार्था इति साध्यं पारार्थ्यम् । संघातत्वादिति हेतुः । व्याप्तिविषयप्रदर्शनं शयनासनाद्यङ्गवदिति । शयन-मासनं च ते आदौ यस्य तच्छयनासनादि पुरुषोपभोगाङ्गं संघातरूपम् । तद्वदत्र । यत्प्रमाणे यदर्थात्मार्थाश्चक्षुरादय

दृत्यात्मार्थता नोक्ता। अनुक्ताप्यात्मार्थता साध्या। तथा हि। सांख्येनोक्तमस्त्यात्मा। तद्विरुद्धं बौद्धेनोक्तं नास्त्यात्मेति। ततः सांख्येन स्ववादविरुद्धं बौद्धवादं हेतूकृत्य विरुद्धवादनिराकरणाय स्ववादप्रतिष्ठापनाय च साधनमुपन्यस्तम्। अतो ऽनुक्ताप्यात्मार्थता साध्या तदधिकरणत्वाद्विवादस्य। शयनासनादिषु हि पुरुषोपभोगाङ्गेष्वात्मार्थत्वेनान्वयो न प्रसिद्धः संघातत्वस्य। परार्थमात्रेण तु सिद्धः। ततः परार्था दृत्युक्तम्। चक्षुरादय दृत्यचादियहणाद्विज्ञानमपि परार्थं साधयितुमिष्टम्। विज्ञानाच्च पर आत्मैव स्यात्। परस्यार्थकारि विज्ञान मेत्यतीति सामर्थ्यादात्मार्थत्वं सिध्यति चक्षुरादीनामिति मत्वा परार्थग्रहण कृतम्। तेनेष्टसाध्यवचनेन नोक्तमात्रमपि तु प्रतिवादिनो विवादास्पदत्वाद्वादिनः साधयितुमिष्टमुक्तमनुक्तं वा प्रकरणगम्यं साध्यमित्युक्तं भवति।

अनिराकृत दृति व्याख्येयम्। एतदित्यनन्तरप्रक्रान्तं यत्पक्षलक्षणमुक्तं साध्यत्वेनेष्टेत्यादि। एतल्लक्षणेन योगे ऽप्यर्थो न पक्ष दृति प्रदर्शनार्थं प्रदर्शनायानिराकृतग्रहणं कृतम्। कीदृशो ऽर्थो न पक्षः साधयितुमिष्टो ऽपीत्याह। यः साधयितुमिष्टो ऽर्थः प्रत्यक्षं चानुमानं च प्रतीतिश्च स्ववचनं चैतैर्निराक्रियते विपरीतः साध्यते न स पक्ष दृति।

तत्रेति। तेषु चतुर्षु प्रत्यक्षादिनिराकृतेषु प्रत्यक्षनिराकृतः कीदृशः। यथेति। यथाऽयं प्रत्यक्षनिराकृतस्तथान्येऽपि द्रष्टव्या दृति यथाशब्दार्थः। श्रवणेन ग्राह्यः श्रावणः। न श्रावणो

ऽश्रावणः श्रोत्रेण न ग्राह्य इति प्रतिज्ञार्थः। श्रोत्रग्राह्यत्वं शब्दस्य प्रत्यक्षसिद्धेन श्रोत्रग्राह्यत्वेन बाध्यते।

अनुमाननिराकृतो यथा नित्यः शब्द इति शब्दस्य प्रतिज्ञातं नित्यत्वमनित्यत्वेनानुमानसिद्धेन निराक्रियते।

प्रतीत्या निराकृतः। अचन्द्र इति। चन्द्रशब्दवाच्यो न भवति गगौति प्रतिज्ञातार्थः। अयं च प्रतीत्या निराकृतः। प्रतीतो ऽर्थ उच्यते। विकल्पविज्ञानविषयः प्रतीतिः। प्रतीतत्वं विकल्पविज्ञानविषयत्वमुच्यते। तेन विकल्पविज्ञानविषयत्वेन प्रतीतिरूपेण गगिनश्चन्द्रशब्दवाच्यत्वं सिद्धमेव। तथा हि। यद्विकल्पज्ञानग्राह्यं तच्छब्दाकारसंसर्गयोग्यम्। तत्सांकेतिकेन शब्देन वक्तुं शक्यम्। अतः प्रतीतिरूपेण विकल्पविज्ञानविषयत्वेन सिद्धं चन्द्रशब्दवाच्यत्वमचन्द्रत्वस्य बाधकं द्रष्टव्यम्। स्वभावहेतुश्च प्रतीतिः। यस्माद्विकल्पविषयत्वमाचानुबन्धिनी सांकेतिकशब्दवाच्यता ततः स्वभावहेतुसिद्धं चन्द्रशब्दवाच्यत्वमवाच्यत्वस्य बाधकं द्रष्टव्यम्।

स्ववचनं प्रतिज्ञार्थस्यात्मीयो वाचकः शब्दस्तेन निराकृतः। प्रतिज्ञार्थो न साध्यः। यथा नानुमानं प्रमाणम्। अत्रानुमानस्य प्रामाण्यनिषेधः प्रतिज्ञार्थः। स नानुमानं प्रमाणमित्यनेन स्ववाचकेन वाक्येन बाध्यते। वाक्यं ह्येतत्प्रयुज्यमानं वक्तुः शाब्दस्य प्रत्ययस्य मदर्थत्वमिष्टं सूचयति। तथा हि। मदाक्याद्यो ऽर्थसंप्रत्ययस्तवोत्पद्यते सोऽमत्यार्थ इति दर्शयन्वाक्यमेव नोच्चारयेदुक्ता। वचनार्थश्चेदमत्यः परेण ज्ञातव्यो वचनमपार्थकम्। यो ऽपि हि सर्वं मिथ्या ब्रवीमीति वक्ति सो ऽप्यस्य वाक्यस्य सत्यार्थत्वमादर्शयन्नेव

वाक्यमुच्चारयति। यद्येतद्वाक्यं सत्यार्थमादर्शितमेवं वाक्यान्तराण्यात्मीयान्यसत्यार्थानि दर्शितानि भवन्ति। एतदेव तु यद्यसत्यार्थमन्यान्यसत्यार्थानि न दर्शितानि भवन्ति। ततश्च न किंचिदुच्चारणस्य फलमिति नोच्चारयेत्। तस्माद्वाक्यप्रभवं वाक्यार्थालम्बनं विज्ञानं सत्यार्थं दर्शयन्नेव वक्ता वाक्यमुच्चारयति। तथा च सति बाह्यवस्तुनाऽन्तरीयकं शब्दं दर्शयता शब्दजं विज्ञानं सत्यार्थं दर्शयितव्यम्। ततो बाह्यार्थकार्य्याच्छब्दादुत्पन्नं विज्ञानं सत्यार्थमादर्शयता कार्य्यलिङ्गजमनुमानं प्रमाणं शाब्दं दर्शितं भवति। तस्मान्नानुमानं प्रमाणमिति ब्रुवता शाब्दस्य प्रत्ययस्यासन्न्याच्च उक्तोऽसदर्थत्वमेव ह्यप्रामाण्यमुच्यते। नान्यत्। शब्दोच्चारणसामर्थ्याच्चार्थाविनाभावी स्वशब्दो दर्शितः। तथा च सन्नर्थो दर्शितः। ततः कल्पितादर्थकार्य्याच्छब्दाच्छाब्दप्रत्ययार्थस्यानुमितं सत्त्वं प्रतिज्ञायमानमसत्त्वं प्रतिबध्नाति। तदेवं स्ववचनानुमितेन सत्त्वेनासत्त्वं वाच्यमानं स्ववचनेन बाधितमुक्तमित्ययमत्रार्थः।

अन्ये त्वाहुः। अभिप्रायकार्य्याच्छब्दाज्ज्ञातं ज्ञानमभिप्रायालम्बनं मदर्थमिच्छतः शब्दप्रयोगः। तेनाप्रामाण्यं प्रतिज्ञातं बाध्यत इति। तदयुक्तम्। यत इह प्रतीतेः स्वभावहेतुत्वं स्ववचनस्य च कार्यहेतुत्वं कल्पितमिष्टम्। न वास्तवम्। अभिप्रायकार्यत्वं च वास्तवमेव शब्दस्य। ततस्तदिह न गृह्यते। किं च यथाऽनुमानमनिच्छंश्चक्षुष्यभिचारित्वं धूमस्य न प्रत्येति। तथा शब्दस्याप्यभिप्रायाव्यभिचारित्वं न प्रत्येष्यति। बाह्यवस्तुप्रत्यायनाय

च शब्दः प्रयुज्यते। तन्न, शब्दस्याभिप्रायाऽविनाभावित्वाभ्युपगम-
पूर्वकः शब्दप्रयोगः। अपि च न स्वाभिप्रायनिवेदनाय
शब्द उच्चार्य्यते। अपि तु बाह्यवस्तुसत्त्वप्रतिपादनाय। तस्मा-
द्बाह्यवस्तुविनाभावित्वाभ्युपगमपूर्वकः शब्दप्रयोगः। ततः पूर्वकमेव
व्याख्यानमनवद्यम्। ५

एवं सत्यनिराकृतग्रहणेनानन्तरोक्ताश्चत्वारः पक्षवदाभासन्त
इति पक्षाभासा निरस्ता भवन्ति। संप्रति पक्षलक्षणपदानि
येषां व्यवच्छेदकानि तेषां व्यवच्छेदेन यादृशः पक्षार्थो लभ्यते
तं दर्शयितुं व्यवच्छेद्यान्संक्षिप्य दर्शयति। एवमित्यनन्तरोक्त-
क्रमेण सिद्धस्य विपर्य्ययेण विपरीतत्वेन हेतुना साध्यो द्रष्टव्यः। १०
यस्मादर्थात्सिद्धो ऽर्थो विपरीतः स साध्य इत्यर्थः। सिद्धश्च विप-
रीतो ऽसिद्धस्य। तस्मादसिद्धः साध्यः। असिद्धो ऽपि न सर्वो ऽपि तु
साधनत्वेनोक्तस्यासिद्धस्यापि विपर्य्ययेण स्वयं वादिना साधयितु-
मनिष्टस्यासिद्धस्य विपर्य्ययेण। तथोक्तमात्रस्यासिद्धस्यापि विप-
र्य्ययेण तथा निराकृतस्यासिद्धस्यापि विपर्य्ययेण साध्यः। यश्चायं १५
पञ्चभिर्व्यवच्छेद्यै रहितो ऽर्थो ऽसिद्धो ऽसाधनम्। वादिनः स्वयं
साधयितुमिष्ट उक्तोऽनुक्तो वा प्रमाणैरनिराकृतः साध्यः। स
एवासौ स्वरूपेणैव स्वयमिष्टो ऽनिराकृत एतैः पदैरुक्त इत्यर्थः।
यश्चायं साध्यः स पक्ष उच्यते। इतिशब्द एवमर्थे। एवं पक्ष-
लक्षणमनवद्यमिति। अविद्यमानमवद्यं दोषो यस्य तदनवद्यम्। २०
दर्शितं कथितम्।

चिरूपलिङ्गाख्यानं परिसमाप्य प्रसङ्गागतं च पक्षलक्षण-

मभिधाय हेत्वाभासान्वक्तुकामस्तेषां प्रस्तावं रचयति त्रिरूपे-त्यादिना। एतदुक्तं भवति। त्रिरूपलिङ्गाख्यानं वक्तुकामेन स्फुट तद्वक्तव्यम्। एवं च तत्स्फुटमुक्तं भवति। यदि तच्च तत्प्रतिरूपकं बोध्यते। हेयज्ञाने हि तद्विविक्तमुपादेयं सुज्ञात भवतीति। त्रिरूपलिङ्गाख्यान परार्थानुमानमिति प्रागुक्तम्। तच्चेति। तस्मि-न्सति त्रिरूपलिङ्गाख्याने परार्थानुमाने सतीत्यर्थः। त्रयाणां रूपाणां मध्य एकस्याप्यनुक्तौ। अपिशब्दाद्वयोरपि। साधनस्याभासः सदृशं साधनस्य न साधनमित्यर्थः। त्रयाणां रूपाणां न्यूनता नाम साधनदोषः। न केवलमनुक्तावुक्तावप्यसिद्धौ सन्देहे वा कस्येत्याह। प्रतिपाद्यस्य प्रतिवादिनः प्रतिपादकस्य च वादिनो हेत्वाभासः। अथ कस्य रूपस्यासिद्धौ सन्देहे वा किंसंज्ञको हेत्वाभास इत्याह। एकस्य रूपस्येति। धर्मिणा सह सबन्धो धर्मिसंबन्धः। धर्मिणि सत्त्वं हेतोः। तस्यासिद्धौ सन्देहे वा ऽसिद्ध-संज्ञको हेत्वाभासः। असिद्धत्वादेव च धर्मिण्यप्रतिपत्तिहेतुर्न साध्यस्य न विरुद्धस्य न संशयस्य हेतुरपि त्वप्रतिपत्तिहेतुर्न कस्यचिदतः प्रतिपत्तिरिति कृत्वा। अयं चार्थो ऽसिद्धसंज्ञाकरणा-देव प्रतिपत्तव्यः। उदाहरणमाह। यथेत्यादि। अनित्यः शब्द इत्यनित्यत्वविशिष्टे शब्दे साध्ये चाक्षुषत्वं चक्षुर्ग्राह्यत्वं शब्दे द्वयो-रपि वादिप्रतिवादिनोरसिद्धम्। चेतनास्तरव इति तरूणां चैतन्ये साध्ये सर्वा त्वक् सर्वत्वक् तस्या अपहरणे मति मरणं दिगम्बरैरुपन्यस्तम्। प्रतिवादिनो बौद्धस्यासिद्धम्। कस्मादसिद्ध-मित्याह। विज्ञानं चेन्द्रियं चायुश्च। रूपादिविज्ञानोत्पत्त्या यद-

नुमितं कार्य्यान्तर्भूतं चक्षुर्गोलकादिस्थितरूपं तदिन्द्रियम् । आयुरिति लोके प्राणा उच्यन्ते । न चागमसिद्धमिह युज्यते वक्तुम् । अतः प्राणस्वभावमायुरिह । तेषां निरोधो निवृत्तिः । स लक्षणं तत्त्वं यस्य तत्तथोक्तम् । तथाभूतस्य मरणस्यानेन बौद्धेन प्रतिज्ञातत्वात् । यदि नामैवं तथापि कथमसिद्धमि- ५
त्याह । तस्य च विज्ञानादिनिरोधात्मकस्य तरुष्वसंभवात् । सत्तापूर्वको निरोधः । ततश्च यो विज्ञाननिरोधं तरुष्विच्छेत्स कथं विज्ञानं नेच्छेत् । तस्माद्विज्ञानादिष्टैर्निरोधोऽपि नेष्टस्तरुषु । ननु च शोषोऽपि मरणमुच्यते । स च तरुषु सिद्धः । सत्यम् । केवलं विज्ञानसत्तया व्याप्तं यन्मरण तदिह हेतुर्विज्ञाननिरो- १०
धश्च । तत्सत्तया व्याप्तो न शोषमात्रम् । ततो यन्मरणहेतुस्त-त्तरुष्वसिद्धम् । यत्तु सिद्धं शोषात्मकं तदहेतुः । दिगम्बरस्तु साध्येन व्याप्तमव्याप्तं वा मरणमविचार्य मरणमात्रं हेतुमाह । तदस्य वादिनो हेतुभूतं मरणं न ज्ञातम् । अज्ञानात्सिद्धं शोषरूपम् । शोषरूपस्य मरणस्य तरुषु दर्शनात् । प्रतिवादिनस्तु ज्ञातमतो १५
ऽसिद्धम् । यदा तु वादिनोऽपि ज्ञात तदा वादिनोऽप्यसिद्धं स्यादिति न्यायः । अचेतनाः सुखादय इति । सुखमादिर्येषां दुःखादीनां ते सुखादयः । तेषामचैतन्ये साध्य उत्पत्तिमत्त्वमनित्यत्व वा लिङ्गमुपन्यस्तम् । य उत्पत्तिमन्तो ऽनित्या वा ते न चेतना यथा रूपादयः । तथा चोत्पत्तिमन्तोऽनित्या वा सुखादय- २०
स्तस्मादचेतनाः । चैतन्यं तु पुरुषस्य स्वं रूपम् । अत्र चोत्पत्तिमत्त्व-मनित्यत्वं वा पर्य्यायेण हेतुर्न युगपत् । तच्च द्वयमपि सांख्यस्य

वादिनो न सिद्धम्। परार्थो हि हेतूपन्यासः। तेन यः परस्य सिद्धः स हेतुर्वक्तव्यः। परस्य चासत उत्पाद उत्पत्तिमत्त्वम्। सतश्च निरन्वयो विनाशोऽनित्यत्वं सिद्धम्। तादृग्रूपं च द्वयमपि सांख्यस्यासिद्धम्। दृहाप्यनित्यत्वोत्पत्तिमत्त्वसाधनाज्ञानाद्वादिनोऽसिद्धम्। यदि त्वनित्यत्वोत्पत्तिमत्त्वयोः प्रमाणं वादिनो ज्ञातं स्यात्। वादिनोऽपि सिद्धं स्यात्। ततः प्रमाणापरिज्ञानादिदं वादिनो ऽसिद्धम्।

संदिग्धासिद्धं दर्शयितुमाह। स्वयमिति। हेतोरात्मनः सन्देहे ऽसिद्धः। तदाश्रयणस्य चेति। तस्य हेतोराश्रयणमाश्रीयते ऽस्मिन्हेतुरित्याश्रयणं हेतोर्व्यतिरिक्त आश्रयभूतः साध्यधर्मो कथ्यते। तत्र हि हेतुर्वर्त्तमानो गमकत्वेनाश्रीयते। तस्याश्रयणस्य सन्देहे संदिग्धः।

स्वात्मना संदिह्यमानमुदाहर्तुमाह। यथेति। बाष्प आदिर्यस्य स बाष्पादिस्तद्भावेन बाष्पादित्वेन संदिह्यमानो भूतसंघात इति। भूतानां पृथिव्यादीनां संघातः समूहः। अग्निसिद्धावग्निसिद्ध्यर्थमुपादीयमानोऽसिद्धः। एतदुक्तं भवति। यदा धूमो ऽपि बाष्पादित्वेन संदिग्धो भवति। तदासिद्धो गमकरूपानिश्चयाद्धूमतया निश्चितो वह्निजन्यत्वाद्गमकः। यदा तु संदिग्धस्तदा न गमक इति। असिद्धताख्यो दोषः।

आश्रयणासिद्धमुदाहरति। यथेति। इह निकुञ्ज इति धर्मी। पर्वतोपरिभागेन तिर्यङ्निर्गतेन प्रच्छादितो भूभागो निकुञ्जः। मयूर इति साध्यम्। केकायितादिति हेतुः। केकायितं

मयूरध्वनिः । कथमाश्रयणासिद्ध इत्याह । तदापात इति । तस्य केकायितस्यापात आगमनं तस्य देशः स उच्यते । यस्माद्देशादागच्छति केकायितम् । तस्य विभ्रमे व्यामोहे सत्ययमाश्रयणासिद्धः । निरन्तरेषु बहुषु निकुञ्जेषु सत्सु यदा केकायितापातविभ्रमः किमस्मान्निकुञ्जात्केकायितमागत- ५
मादोस्विदस्मादिति तदाश्रयणासिद्ध इति ।

धर्मिणो सिद्धावप्यसिद्धत्वमुदाहरति । यथेति । सर्वस्मिन्- गतः स्थितः सर्वगतो व्यापीति यावत् । व्यापित्व आत्मनः साध्ये सर्वत्रोपलभ्यमानगुणत्वं लिङ्गम् । सर्वत्र देश उपलभ्यमानाः सुख- दुःखेच्छाद्वेषादयो गुणा यस्यात्मनस्तस्य भावस्तत्त्वम् । न गुणा १०
गुणिनमन्तरेण वर्तन्ते । गुणानां गुणिनि समवायात् । निष्क्रिय- श्चात्मा । ततश्च यदि व्यापी न भवेत्कथं दक्षिणापथ उप- लब्धाः सुखादयो मध्यदेश उपलभ्येरन् । तस्मात्सर्वगत आत्मा । तदिह बौद्धस्यात्मैव न सिद्धः किमुत सर्वत्रोपलभ्यमानगुणत्वं सिध्येत् । तस्येत्यसिद्धौ हेत्वाभासः । पूर्वमाश्रयणसन्देहेन धर्मिणि १५
सन्देह उक्तः । संप्रति त्वसिद्धो धर्म्युक्त इत्यनयोर्विशेषस्तदेव- मेकस्य रूपस्य धर्मिबद्धस्यासिद्धावसिद्धो हेत्वाभासः ।

तथा परस्यैकस्य रूपस्यासपक्षेऽसत्त्वाख्यस्यासिद्धावनैकान्तिको हेत्वाभासः । एको ऽन्त एकान्तो निश्चयः । स प्रयोजनमस्ये- त्यैकान्तिकः । नैकान्तिकोऽनैकान्तिकः । यस्मान्न साध्यस्य न २०
विपर्ययस्य निश्चयो ऽपि तु तद्विपरीतः संशयः । साध्येतरयोः संशयहेतुरनैकान्तिक उक्तः । तमुदाहरति । यथेत्यादिना ।

अनित्यत्वमादिर्यस्य सो ऽनित्यत्वादिको धर्मः। आदिशब्दादप्रयत्नानन्तरीयकत्वं प्रयत्नानन्तरीयकत्वं नित्यत्वं च परिगृह्यते । प्रमेयत्वमादिर्यस्य स प्रमेयत्वादिकः । आदिशब्दादनित्यत्व पुनरनित्यत्वममूर्तत्वं च गृह्यते । शब्दस्य धर्मिणो ऽनित्यत्वादिके धर्मे साध्ये प्रमेयत्वादिको धर्मो ऽनैकान्तिकः । चतुर्णामपि विपक्षे ऽसत्त्वमसिद्धम्। तथा हि। अनित्यः शब्दः प्रमेयत्वादाकाशवद्घटवदिति प्रमेयत्वं सपक्षविपक्षव्यापि । अप्रयत्नानन्तरीयकः शब्दो ऽनित्यत्वाद्विद्युदाकाशवद्घटवच्चेत्यनित्यत्वं सपक्षैकदेशवृत्ति विद्युदादावस्ति नाकाशादौ । विपक्षव्यापि प्रयत्नानन्तरीयके सर्वत्र भावात् । अनित्यत्वात्प्रयत्नानन्तरीयकः शब्दो घटवद्विद्युदाकाशवच्चेत्यनित्यत्वं विपक्षैकदेशशब्दवृत्ति विद्युदादावस्ति नाकाशादौ । सपक्षव्यापि सर्वत्र प्रयत्नानन्तरीयके भावात् । नित्यः शब्दो ऽमूर्तत्वादाकाशपरमाणुवत्कर्मघटवच्चेत्यमूर्तत्वमुभयैकदेशवृत्ति । उभयोरेकदेश आकाशे कर्मणि च वर्तते । परमाणौ तु सपक्षैकदेशे घटादौ च विपक्षैकदेशे न वर्तते । मूर्तत्वाद्घटपरमाणुप्रभृतीनाम् । नित्यास्तु परमाणवो वैशेषिकैरभ्युपगम्यन्ते । ततः सपक्षान्तर्गताः । अस्य चतुर्विधस्य पक्षधर्मस्यासत्त्वमसिद्धं विपक्षे । ततो ऽनैकान्तिकता । यथा चास्य रूपस्यासिद्धावनैकान्तिकस्तथाऽस्यैव विपक्षे ऽसत्त्वाख्यस्य रूपस्य सन्देहेऽनैकान्तिकः । तमुदाहरति यथेति । असर्वज्ञ इति । असर्वज्ञत्वं साध्यम् । कश्चिद्विवक्षित इति वक्तुरभिप्रेतः पुरुषो धर्मी । राग आदिर्यस्य द्वेषादेः स रागादिः स यस्यास्ति स रागादि-

मानिति द्वितीयं साध्यम्। वाग्ग्रहणं रागादिमत्त्वस्य पृथक्साध्यत्वख्यापनार्थम्। ततो ऽसर्वज्ञत्वे रागादिमत्त्वे वा साध्ये प्रकृते वक्तृत्वं वचनशक्तिस्तदादिर्यस्योन्मेषनिमेषादेः स वक्तृत्वादिको धर्मो ऽनैकान्तिकः। संदिग्धा विपक्षाद्व्यावृत्तिर्यस्य स तथोक्तः। असर्वज्ञत्वे साध्ये सर्वज्ञत्वं विपक्षः। तत्र वचनादेः सत्त्वमसत्त्वं वा संदिग्धम्। अतो न ज्ञायते वक्ता सर्वज्ञ उतासर्वज्ञ इत्यनैकान्तिकं वक्तृत्वम्।

ननु च सर्वज्ञो वक्ता नोपलभ्यते तत्कथं वचनं सर्वज्ञे संदिग्धम्। अत एव सर्वज्ञो वक्ता नोपलभ्यत इति। एवंप्रकारस्यैवंजातीयस्यानुपलम्भस्य सन्देहहेतुत्वात्। कुत इत्याह। अदृश्यात्मा विषयो यस्य तस्य भावो ऽदृश्यात्मविषयत्वं तेन सन्देहहेतुत्वम्। यतो ऽदृश्यविषयो ऽनुपलम्भः संशयहेतुर्न निश्चयहेतुस्ततो ऽसर्वज्ञविपक्षात्सर्वज्ञाद्वक्तृत्वादेर्व्यावृत्तिः संदिग्धा। नानुपलम्भात्। सर्वज्ञे वक्तृत्वमसद्रूपमपि तु सर्वज्ञत्वेन सह वक्तृत्वस्य विरोधात्। एतच्च सर्वज्ञत्व—वक्तृत्वयोर्विरोधो नास्ति। विरोधाभावाच्च कारणाद्व्यतिरेको न सिध्यतीति संबन्धः। व्याप्तिमन्तं व्यतिरेकं दर्शयति। यः सर्वज्ञ इति। साध्याभावरूपं सर्वज्ञत्वमनूद्य न स वक्ता भवतीति साधनस्य वक्तृत्वस्याभावो विधीयते। तेन साध्याभावः साधनाभावे नियतत्वात्साधनाभावेन व्याप्त उक्त इति व्याप्तिमानीदृगो व्यतिरेको विरोधे सति वक्तृत्वसर्वज्ञत्वयोः सिध्येत्। न चास्ति विरोधः। तस्मान्न सिध्यति। कुत इत्याह। सन्देहात्। यतो विरोधाभावस्तस्मात्सन्देहः। सन्देहाद्व्यतिरेकासिद्धिः। कथं विरोधाभावः। हीति। यस्मा-

द्विविध एव विरोधो नाऽन्यः। तस्मान्न वक्तृत्वसर्वज्ञत्वयोर्विरोधः।

कः पुनरसौ द्विविधो विरोध इत्याह। अविकलकारण-स्येति। अविकलानि समग्राणि कारणानि यस्य स तथोक्तः। यस्य कारणवैकल्याद्भावो न तस्य केनचिदपि विरोधगतिः। तदर्थमविकलकारणग्रहणम्। ननु च यस्यापि कारणसाकल्यं तस्यापि निवृत्तिरशक्या केनचिदपि कर्तुं तत्कुतो विरोध-गतिः। एवं तर्हि। अविकलकारणस्यापि यत्प्रयत्नात्कारणवैक-ल्याद्भावः। तेन विरोधगतिः। तथा च सति यो यस्य विरुद्धः स तस्य किंचित्कर एव। तथा हि। शीतस्पर्शस्य जनको भूत्वा शीतस्पर्शान्तरजननशक्तिं प्रतिबध्नञ्शीतस्पर्शस्य निवर्तको वि-रुद्धः। तस्माद्धेतुवैकल्यकारी विरुद्धो जनक एव। निवर्त्यस्य सद्भानवस्थानविरोधश्चायम्। ततो विरुद्धयोरेकस्मिन्नपि क्षणे सद्भावस्थानं परिहर्तव्यम्। दूरस्थयोर्विरोधाभावाच्च निकट-स्थयोरेव निवर्त्यनिवर्तकभावः। तस्माद्यो यस्य निवर्तकः स तं यदि परं द्वितीये क्षणे निवर्तयति। प्रथमे क्षणे सन्निपत-न्नसमर्थावस्थानयोग्यो भवति। द्वितीये विरुद्धमसमर्थं करोति। द्वितीये त्वसमर्थे निवृत्ते तद्देशमाक्रामति। तत्रालोको गति-धर्मा क्रमेण जलतरंगन्यायेन देशमाक्रामन् यदाऽन्धकारे निर-न्तरमालोकक्षणं जनयति। तदालोकसमीपवर्तिनमन्धकार-मसमर्थं जनयति। ततोऽसामर्थ्यं तस्य यस्य समीपवर्त्यालोकः। असामर्थ्ये निवृत्ते तादृशो जायत आलोकः, इत्येवं क्रमेणालोके-नान्धकारोऽपनेयः। तथोष्णस्पर्शेन शीतस्पर्शो निवर्तनीयः। यदा

त्यालोकस्तत्रैवान्धकारे देशे जन्यते तदा यतः क्षणादन्धकार-देशस्यालोकस्य जनकक्षण उत्पद्यते तत एवान्धकारोऽन्धकारा-न्तरजननासमर्थ उत्पन्नः। ततोऽसमर्थावस्थाजनकत्वमेव निवर्तक-त्वम्। अतश्च यस्मिन् क्षणे जनकस्तत्तृतीये क्षणे निवृत्तो विरुद्धो यदि शीघ्रं निवर्तते। जन्यजनकभावाच्च संतानयोर्विरोधो न क्षणयोः। यद्यपि च न संतानो नाम वस्तु तथापि संतानिनो वस्तुभूताः। ततोऽयं परमार्थः न क्षणयोर्विरोधः। अपि तु बहूनां क्षणानाम्। यतः सत्सु दहनक्षणेषु प्रवृत्ता अपि शीत-क्षणा निवृत्तिधर्माणो भवन्तीति। संतानयोर्निवर्त्यनिवर्तकत्व-निमित्ते च विरोधे स्थिते सर्वेषां परमाणूनां सत्यप्येकदेशाव-स्थानाभावेन विरोध इतरेतरसंतानानिवर्तनात्तेषां गतिधर्मा चालोको यां दिशमाक्रामति तद्दिग्वर्त्तिनो विरोधिसंतानान्नि-वर्तयति। ततोऽपवरकैकदेशस्था प्रदीपप्रभाऽन्धकारनिकटवर्ति-न्यपि नान्धकारं निवर्तयति। अन्धकाराक्रान्तायां दिश्या-लोकक्षणान्तरजननासामर्थ्यात्। कारणासामर्थ्यचेतुक्तं संतान-निष्ठमेव विरोधं दर्शयता भवतेति कृतम्। भवतः प्रबन्धेन वर्तमानस्य शीतस्पर्शसंतानस्याभावो ऽन्यस्योष्णस्पर्शसंतानस्य भावे सतीति।

ये त्वाहुर्न विरोधो वास्तव इति न इदं वक्तव्याः। यथा न निष्पन्ने कार्य्ये कश्चिज्जन्यजनकभावो नाम दृष्टो ऽस्ति। कारण-पूर्विका तु कार्य्यप्रवृत्तिरतो वास्तव एव। तद्वन्न निवृत्ते वस्तुनि कश्चिदिष्टो नाम विरोधो ऽस्ति। दहननिमित्तं तु शीतस्पर्शस्य

क्षणान्तरासामर्थ्यमतो विरोधो ऽपि वास्तव एव। उदाहरणमाह। शीतश्चोष्णश्च तावेव स्पर्शौ तयोरिव। शीतोष्णस्पर्शयोर्हि पूर्ववद्विरोधो योजनीयः।

द्वितीयमपि विरोधं दर्शयितुमाह। परस्परं परिहारः परित्यागस्तेन स्थितं लक्षणं रूपं ययोस्तद्भावः परस्परपरिहारस्थितलक्षणता तया। इह यस्मिन्परिच्छिद्यमाने यद्भवच्छिद्यते तत्परिच्छिद्यमानमवच्छिद्यमानपरिहारेण स्थितरूपं द्रष्टव्यम्। नीले च परिच्छिद्यमाने तादूप्यप्रच्युतिरवच्छिद्यते तदव्यवच्छेदे नीलापरिच्छेदप्रसङ्गात्। तस्मादस्तुनो भावाभावौ परस्परपरिहारेण स्थितरूपौ। नीलात्तु यदन्यद्रूपं तन्नीलाभावाव्यभिचारि। नीलस्य दृश्यस्य पीतादावुपलभ्यमाने ऽनुपलम्भादभावनिश्चयात्। यथा च नीलमभाव परिहरति तद्वदभावाव्यभिचारि पीतादिकमपि। तथा च भावाभावयोः सात्माद्विरोधौ वस्तुनोस्वन्योन्याभावाव्यभिचारित्वाद्विरोधः। कस्य चान्यत्राभावावसायो यो नियताकारो ऽर्थस्तस्य। न त्वनियताकारो ऽर्थः क्षणिकत्वादिवत्। क्षणिकत्वं हि सर्वेषां नीलादीनां स्वरूपात्मकम्। अतो न नियताकारम्। यतः क्षणिकत्वपरिहारेण न किंचिद्दृश्यते। यद्येवमभावो ऽपि न नियताकारः। कथं न। नियताकारो नाम यावता वस्तुरूपविविक्ताकारः कल्पितो ऽभावः। ततो दृष्टं कल्पितं वा नियतं रूपमन्यत्रासदवसीयते नानियतम्। एवं नित्यत्वे पिशाचादिरपि नियताकारः कल्पितो द्रष्टव्यः। एकात्मकत्वविरोधश्चायम्। ययोर्हि

परस्परपरिहारेणावस्थान तयोरेकत्वाभावः। अत एव लाक्षणिको ऽयं विरोध उच्यते। लक्षणं रूपं वस्तूनां प्रयोजनमस्येति कृत्वा। विरोधेन ह्यनेन वस्तुतत्त्वं विभक्तं व्यवस्थाप्यते। अत एव दृश्यमाने रूपे यन्निषिध्यते तदृश्यमेवाभ्युपगम्य निषिध्यते। तथा हि। अभावो ऽपि पिशाचो ऽपि यदा पीते निषेद्धुमिष्यते तदा दृश्यात्मतया निषेध्य इति दृश्यत्वमभ्युपगम्य दृश्यानुपलब्धेरेव निषेधः। तथा च सति रूपे परिच्छिद्यमान एकस्मिंस्तद्भावो दृश्यो व्यवच्छिद्यते। यच्च तद्भाववन्नियताकारं रूपं तदपि दृश्यं व्यवच्छिद्यते। ततः स्वप्रच्युतिवत्प्रच्युतिमन्तो ऽपि व्यवच्छिन्ना इति ये परस्परपरिहारस्थितरूपाः सर्वे तेऽनेन निषिद्धैकत्वा इति सत्यपि चास्मिन्विरोधे सहावस्थान स्यादपि। ततो भिन्नव्यापारौ विरोधौ। एकेन विरोधेन शीतोष्णस्पर्शयोरेकत्वं वार्य्यते। अन्येन सहावस्थानं भिन्नप्रवृत्तिविषयौ च। सकले वस्तुन्यवस्तुनि च परस्परपरिहारविरोधः। वस्तुन्येव कतिपये सहानवस्थानविरोधः। तस्माद्भिन्नव्यापारौ भिन्नविषयौ च। ततो नानयोरन्योन्यान्तर्भाव इति। स चाय द्विविधो ऽपि विरोधो वक्तृत्वं च सर्वज्ञत्वं च तयोर्न संभवति। न ह्यविकलकारणस्य सर्वज्ञत्वस्य वक्तृत्वभावाद्भावगतिः। सर्वज्ञत्वं ह्यदृश्यम्। अदृष्टस्य चाभावो नावसीयते। ततो नानेन विरोधगतिर्भवति। न च वक्तृत्वपरिहारेण सर्वज्ञत्वमवस्थितम्। काष्ठादयोऽपि वक्तृत्वपरिहृतास्तेषामपि सर्वज्ञत्वप्रसङ्गात्। नापि सर्वज्ञत्वपरिहारेण वक्तृत्वम्। काष्ठादीनामपि वक्तृत्वप्रसङ्गात्। तत एवाविरोधाद्वक्तृत्वविधानेन सर्वज्ञत्वनिषेधः।

स्यादेतत्। यदि नास्त्येव विरोधो घट-पटयोरिव। स्यादपि तयोः सहावस्थितिदर्शनम्। अदर्शनात्तु विरोधगतिः। विरोधाच्चाभावगतिरित्याशंक्याह। न चाविरुद्धविधेरिति। अनुपलब्धावपि नायं विरुद्धविधिः। यद्यपि च सहावस्थानानुपलम्भस्थापि न तयोर्विरोधो यस्मान्न सहानुपलम्भमात्राद्विरोधोऽपि तु द्वयोरुपलभ्यमानयोर्निवर्त्यनिवर्तकभावावसायात्। तस्मादनुपलब्धावपि न वक्तृत्वविरोधिविरुद्धविधिः। अतोऽस्मान्नान्यस्याभावगतिस्तथा न वक्तृत्वाद्रागादिमत्त्वगतिः। यतो यदि वचनादि रागादीनां कार्य्यं स्याद्वचनादे रागादिगतिः स्याद्रागादिनिवृत्तौ वचनादिनिवृत्तिः स्यात्। न च कार्य्यम्। कुतः। रागादीनां वचनादेश्च कार्यकारणभावस्यासिद्धेः। कारणान्न कार्य्यमतोऽस्मान्न गतिः।

माभूद्रागादिकार्य्यं वचनम्। सहचारि तु भवति। ततो रागादौ सहचारिणि निवृत्ते निवर्तते वचनमित्याशङ्क्याह। अर्थान्तरस्य वा कारणस्य निवृत्तौ सहचारित्वदर्शनमात्रेण नान्यस्य वचनादेर्निवृत्तिः। अतो वक्तृत्वं भवेद्रागादिविरहेऽपीति। इतिशब्दस्तस्मादर्थे। तस्मादसर्वज्ञत्वविपर्ययाद्विपक्षात्सर्वज्ञत्वाद्रागादिमत्त्वविपर्य्ययाद्रागादिमत्त्वात्संदिग्धो व्यतिरेको वचनादेः। अतोऽनैकान्तिको वचनादिः।

एवमेकैकरूपादिसिद्धिसन्देहे हेतुदोषानाख्याय द्वयोर्द्वयोरूपयोरसिद्धिसन्देहे हेतुदोषान्वक्तुकाम आह। द्वयो रूपयोर्विपर्ययसिद्धौ सत्यां विरुद्धः। त्रीणि च रूपाणि सन्ति ततो

विशेषज्ञापनार्थमाह । कयोर्द्वयोरिति । विशिष्टे रूपे दर्शयति । सपक्षे सत्त्वस्यासपक्षे चासत्त्वस्य विपर्य्ययसिद्धाविति संबन्धः । कृतकत्वमिति स्वभावहेतुः । प्रयत्नानन्तरीयकत्वमिति कार्य्यहेतुः । प्रयत्नानन्तरीयकशब्देन हि प्रयत्नानन्तरं जन्म ज्ञान च प्रयत्नानन्तरीयकमुच्यते । जन्म जायमानस्य स्वभावः । ज्ञानं ज्ञेयस्य कार्य्यम् । तदिह प्रयत्नानन्तरं ज्ञानं गृह्यते । तेन कार्यहेतुः । एतौ हेतू नित्यत्वे साध्ये विरुद्धौ हेत्वाभासौ । कस्मात्पुनरेतौ विरुद्धावित्याह । अनयोरिति । सपक्षे नित्ये कृतकत्वप्रयत्नानन्तरीयकत्वयोरसत्त्वमेव निश्चितम् । अनित्ये विपक्ष एव सत्त्वं निश्चितमिति विपर्य्ययसिद्धिः । कस्मात्पुनर्विपर्य्ययसिद्धावेतौ विरुद्धावित्याह । एतौ च साध्यस्य नित्यत्वस्य विपर्य्ययमनित्यत्वं साधयतः साध्यविपर्ययसाधनाद्विरुद्धौ । यदि साध्यविपर्ययसाधनाद्विरुद्धावेतावुक्तं च परार्थानुमाने साध्यं न त्वनुक्तम् । इष्टं चानुक्तमतोऽन्य इष्टविघातकृदाभ्यामिति दर्शयन्नाह । ननु च हेतीयोऽपि विरुद्ध उक्तः । उक्तविपर्य्ययसाधनौ द्वौ हेतीयोऽयमिष्टस्य शब्देनानुपात्तस्य विधानं करोति विपर्ययसाधनादिति । इष्टविघातकृत् । तमुदाहरति । यथेति । चक्षुरादय इति धर्मी । परोऽर्थः प्रयोजनं संस्कार्य उपकर्तव्यो येषां ते परार्था इति साध्यम् । संघातत्वात्संचितरूपत्वादिति हेतुः । चक्षुरादयो हि परमाणुसंचितिरूपाः । ततः संघातरूपा उच्यन्ते । शयनमासन चादेर्यस्य तच्छयनासनादि । तदेवाङ्गं पुरुषोपभोगाङ्गत्वात् । अयं व्याप्तिप्रदर्शनविषयो दृष्टान्तः । अत्र हि पारार्थ्येन संहतत्वं

व्याप्तम्। यतः शयनासनादयः संघातरूपाः पुरुषस्य भोगिनो भवन्त्युपकारका इति परार्था उच्यन्ते। कथमयमिष्टविघातकृदित्याह। तदिष्टासंहतपारार्थ्यविपर्य्ययसाधनादिति। असहते विषये पारार्थ्यमसंहतपारार्थ्यम्। तस्य साख्यस्य वादिन दृष्टमसंहतपारार्थ्यं तदिष्टासंहतपारार्थ्यं तस्य विपर्य्ययः। संहतपारार्थ्यं नाम तस्य साधनाद्विरुद्धः। आत्माऽस्तीति ब्रुवाणः सांख्यः। कुत एतदिति पर्यनुयुक्तो बौद्धेनेदमात्मनः सिद्धये प्रमाणमाह। तस्मादसंहतस्यात्मन उपकारकत्व साध्यं चक्षुरादीनाम्। अयं तु हेतुविपर्ययव्याप्तः। यस्माद्यो यस्योपकारकः स तस्य जनकः। जन्यमानश्च युगपत्क्रमेण वा भवति संहतः। तस्मात्परार्थाश्चक्षुरादय इति संहतपरार्था इति सिद्धम्।

अयं च विरुद्ध आचार्यदिङ्नागेनोक्तः। स कस्माद्वार्तिककारेण सता त्वया नोक्तः। इतर आह। अनयोरेव साध्यविपर्ययसाधनयोरन्तर्भावात्। ननु चोक्तविपर्ययं न साधयति तत्कथमुक्तविपर्ययसाधनयोरेवान्तर्भाव इत्याह। न ह्ययमिति। हीति यस्मादर्थे। यस्मादयमिष्टविघातकृदाभ्यां हेतुभ्यां साध्यविपर्ययसाधनत्वेन न भिद्यते। यथा तौ साध्यविपर्ययसाधनौ तथायमप्युक्तविपर्ययं तु साधयतु वा मा वा किमुक्तविपर्ययसाधनेन। तस्मादनयोरेवान्तर्भावः।

ननु चोक्तमेव साध्ये तत्कथं साध्यविपर्ययसाधनत्वेनाभेद इत्याह। न हीति। यस्मादिष्टोक्तयोः परस्परस्य साध्यत्वेन

न कश्चिद्विशेषे भेद इति । तस्मादनयोरेवान्तर्भाव इत्युपसंहारः । प्रतिवादिनो हि यज्जिज्ञासितं तत्प्रकरणापन्नम् । यच्च प्रकरणापन्नं तत्साधनेच्छया विषयीकृतम् । साध्यमिष्टमुक्तमनुक्तं वा ।

ननूक्तमात्रमेव साध्यं तेनाविशेष इति । द्वयो रूपयोरसिद्धौ विरुद्ध उक्तः । अनयोर्द्वयोर्मध्य एकस्यासिद्धावपरस्य च सन्देहेऽनैकान्तिकः । कीदृशोऽसावित्याह । यथेति । विगतो रागो यस्य स वीतराग इत्येकं साध्यम् । सर्वज्ञो वेति द्वितीयम् । वक्तृत्वादिति हेतुः । व्यतिरेकोऽत्रासिद्ध इति स्वात्मन्येव सरागे चासर्वज्ञे च विपक्षे वक्तृत्वं दृष्टम् । अतोऽसिद्धो व्यतिरेकः । संदिग्धोऽन्वयः कुत इत्याह । सपक्षभूतयोः सर्वज्ञ-वीतरागयोर्विप्रकर्षादित्यतीन्द्रियत्वाद्वचनादेरिन्द्रियगम्यस्यापि । तत्रातीन्द्रिययोः सर्वज्ञत्व-वीतरागयोः सत्त्वमसत्त्वं वा संदिग्धम् । ततश्च न ज्ञायते किं वक्तृत्वात्सर्वज्ञ उत नेत्यनैकान्तिक इति ।

संप्रति द्वयोरेव सन्देहेऽनैकान्तिकं वक्तुमाह । अनयोरेवान्वयव्यतिरेकरूपयोः सन्देहात् संशयहेतुः । उदाहरणम् । सहात्मना वर्तते सात्मकमिति साध्यम् । शरीरमिति धर्मी । जीवद्ग्रहणं धर्मिविशेषणम् । मृते ह्यात्मानं नेच्छति । प्राणा आश्वासादय आदिर्यस्योन्मेषनिमेषादेः प्राणिधर्मस्य स प्राणादिः । स यस्यास्ति तत्प्राणादिमज्जीवच्छरीरम् । तस्य भावस्तत्त्वम् । तस्मादित्येष हेतुः । अयमसाधारणः संशयहेतुरूपपादयितव्यः । पक्षधर्मस्य च द्वाभ्यां कारणाभ्यां संशयहेतुत्वम् ।

संशयविषयौ यावाकारौ ताभ्यां सर्वस्य वस्तुनः संग्रहात्। तयोश्च व्यापकयोराकारयोरेकत्रापि वृत्त्यनिश्चयाद्यकाभ्यां ह्याकाराभ्यां सर्वं वस्तु न संगृह्यते। तयोराकारयोर्न संशयः। प्रकारान्तरसंभवे हि पक्षधर्मो धर्मिणमवियुक्तं द्वयोरेकेन धर्मेण दर्शयितुं न शक्नुयादतो न संशयहेतुः स्यात्। द्वयोर्धर्मयोरनियतं भावं दर्शयन्संशयहेतुर्द्वयोस्त्वनियतमपि भावं दर्शयितुमशक्तोऽप्रतिपत्तिहेतुर्नियतं भावं दर्शयन्हेतुविरुद्धो वा स्यात्तस्माद्यकाभ्यां सर्वं वस्तु संगृह्यते तयोः संशयहेतुर्यदि तयोरेकत्रापि सद्भावनिश्चयो न स्यात्। सद्भावनिश्चये तु यद्येकत्र नियतसत्तानिश्चयो विरुद्धो हेतुर्वा स्यात्। अनियतसत्तानिश्चये तु साधारणानैकान्तिकः। संदिग्धविपक्षव्यावृत्तिकः संदिग्धान्वयोऽसिद्धव्यतिरेको वा स्यात्। एकत्रापि तु वृत्त्यनिश्चयादसाधारणानैकान्तिको भवति। ततोऽसाधारणानैकान्तिकस्यानैकान्तिकत्वे हेतुद्वयं दर्शयितुमाह। न हीति। सद्भावमना वर्तते सात्मकः। निष्क्रान्त आत्मा यस्मात्स निरात्मकः। ताभ्यां यस्मान्नान्यो राशिरस्ति। किंभूतो यत्रायं वस्तुधर्मः प्राणादिर्वर्तत। तस्मादयं तयोर्भवति संशयहेतुः।

कस्मादन्यराश्यभाव इत्याह। आत्मनो वृत्तिः सद्भावो व्यवच्छेदो ऽभावस्ताभ्यां सर्वस्य वस्तुनः संग्रहात्क्रोडीकरणात्। यत्र ह्यात्मास्ति तत्सात्मकम्। तदन्यन्निरात्मकम्। ततो नान्यो राशिरस्ति संशयहेतुत्वकारणम्।

प्रकाराभ्यां सर्वसंग्रहं प्रतिपाद्य द्वितीयमाह। नाप्यनयोः

सात्मकानात्मकयोर्मध्य एकत्र सात्मकेऽनात्मके वा वृत्तेः सङ्गा-
वस्य निश्चयोऽस्ति। द्वावपि राशी त्यक्ता न वर्तते प्राणादिर्वस्तु-
धर्मत्वात् । ततश्चानयोरेव वर्तत इत्येतावदेव ज्ञातम् । विशेषे
तु वृत्तिनिश्चयो नास्तीत्ययमर्थः । तदाह । सात्मकत्वेनाऽनात्म-
कत्वेन वा विशेषेण युक्ते प्रसिद्धे निश्चिते वस्तुनि प्राणादेर्धर्मस्या- ५
सिद्धेरनैकान्तिकोऽनिश्चितत्वात् । तदेवमसाधारणस्य धर्मस्या-
नैकान्तिकत्वे कारणद्वयमभिहितम् । पक्षधर्मश्च भवन्सर्वः साधा-
रणोऽसाधारणो वा भवत्यनैकान्तिकः । तस्मादुपसंहारव्याजेन
पक्षधर्मत्वं दर्शयति । तस्मादित्यादिना जीवच्छरीरस्य संबन्धी
पक्षधर्म इत्यर्थः । यस्मात्तयोरेकत्रापि न निवृत्तिनिश्चय- १०
स्तस्मात्ताभ्यां न व्यतिरिच्यते ।

वस्तुधर्मो हि सर्ववस्तुव्यापिनोः प्रकारयोरेकत्र नियत-
सद्भावो निश्चितः प्रकारान्तरान्निवर्तते । तत एवाह । सात्म-
कादनात्मकाच्च सर्वस्माद्वस्तुनो व्यावृत्तत्वेनासिद्धेरिति । प्राणादि-
स्तावत्कुतश्चिद्घटादेर्निवृत्त एव । तत एतावद्वसातुं शक्यं १५
सात्मकादनात्मकाद्वा कियतो निवृत्तः । सर्वस्मात्तु निवृत्तो
नावसीयते । ततो न कुतश्चिद्व्यतिरेकः ।

यद्येवमन्वयोऽस्तु तयोर्निश्चित इत्याह । न तत्र सात्मकेऽना-
त्मके वार्थेऽन्वेत्यन्वयवान्प्राणादिः । कुत इत्याह। एकात्मनि
सात्मकेऽनात्मके वासिद्धेः कारणात् । वस्तुधर्मतया तयोर्द्वयोरेकत्र २०
वा वर्तत इत्यवसितः प्राणादिर्न तु सात्मक एव निरात्मक एव
वा वर्तत इति कुतोऽन्वयनिश्चयः। ननु च प्रतिवादिनो न

किंचित्सात्मकमस्ति। ततोऽस्य हेतोर्न सात्मकेऽन्वयो न व्यतिरेक इत्यन्वयव्यतिरेकयोरभावनिश्चयः। सात्मके न तु सद्भावसंशय इत्याह। नापि सात्मकादस्तुनस्तस्य प्राणादेरन्वयव्यतिरेकयोरभावनिश्चयः। नापि च निरात्मकात्। सात्मकादनात्मकादिति च पञ्चमी व्यतिरेकशब्दापेक्षया द्रष्टव्या। कथमन्वयव्यतिरेकयोर्नाभावनिश्चय इत्याह। एकस्यान्वयस्य व्यतिरेकस्य वा योऽभावनिश्चयः सोऽपरस्य द्वितीयस्य भावे निश्चयनान्तरीयको भवति। निश्चयस्याव्यभिचारी तस्य भावस्तत्त्वम्। तस्माद्यत एकाभावनिश्चयोऽपरभावनिश्चयनान्तरीयकस्तस्मान्न द्वयोरेकत्राभावनिश्चयः।

कस्मात्पुनरेकस्याभावनिश्चयोऽपरसद्भावनिश्चयाव्यभिचारीत्याह। अन्वयव्यतिरेकयोरन्योन्यव्यवच्छेदरूपत्वादिति। अन्योन्यस्य व्यवच्छेदोऽभावः स एव रूपं ययोस्तयोर्भावस्तत्त्वं तस्मात्कारणात्। अन्वयव्यतिरेकौ भावाभावौ। भावाभावौ च परस्परव्यवच्छेदरूपौ। यस्य व्यवच्छेदेन यत्परिच्छिद्यते तत्तत्परिहारेण व्यवस्थितम्। स्वाभावव्यवच्छेदेन च भावः परिच्छिद्यते। तस्मात्स्वाभावव्यवच्छेदेन भावो व्यवस्थितः। अभावो हि नीरूपो यादृग्गो विकल्पेन दर्शितः। नीरूपतां च व्यवच्छिद्य रूपमाकारवत्परिच्छिद्यते। तथा च सत्यन्वयाभावो व्यतिरेको व्यतिरेकाभावश्चान्वयः। ततोऽन्वयाभावे निश्चिते व्यतिरेको निश्चितो भवति। व्यतिरेकाभावे च निश्चितेऽन्वयो निश्चितो भवति। तस्माद्यदि नाम सात्मकमवस्तु निरात्मकं च

वस्तु तथापि न तयोः प्राणादेरन्वयव्यतिरेकयोरभावनिश्चयः। एकवस्तुन्येकवस्तुनो युगपद्भावाभावविरोधात्। तयोरभावनिश्चयायोगात्। न च प्रतिवाद्यनुरोधात्सात्मकानात्मके वस्तुनी सदसती किं तु प्रमाणानुरोधादित्युभे संदिग्धे। ततस्तयोः प्राणादिमत्त्वस्य सदसत्त्वसंशयः। यत एव क्वचिदन्वयव्यतिरेकयोर्न भावनिश्चयो नाप्यभावनिश्चयस्तत एवान्वयव्यतिरेकयोः संदेहः। यदि तु क्वचिदप्यन्वयव्यतिरेकयोरेकस्याप्यभावनिश्चयः स्यात्स एव द्वितीयस्य भावनिश्चय इत्यन्वयव्यतिरेकसंदेह एव न स्यात्। यतश्च न क्वचिद्भावाभावनिश्चयस्तत एवान्वयव्यतिरेकयोः संदेहः। संदेहाच्चानैकान्तिकः।

कस्मादनैकान्तिकः। साध्येतरस्य च विरुद्धस्यातः संदिग्धान्वयव्यतिरेकान्निश्चयाभावात्। सपक्षविपक्षयोर्हि सदसत्त्वसंदेहेन साध्यस्य न विरुद्धस्य सिद्धिः। न च सात्मकानात्मकाभ्यां च परः प्रकारः संभवति। ततः प्राणादिमत्त्वाद्धर्मिणि जीवच्छरीरे संशयः। आत्मभावाभावयोरित्यनैकान्तिकः प्राणादिरिति। त्रयाणां रूपाणामसिद्धौ संदेहे च हेतुदोषानुपपाद्योपसंहरन्नाह। एवमित्यनन्तरोक्तेन क्रमेणैषां मध्य एकैकं रूपं यदसिद्धं संदिग्धं वा भवति। द्वे द्वे वासिद्धे संदिग्धे वा भवतः। तदाऽसिद्धश्च विरुद्धश्चानैकान्तिकश्च ते हेत्वाभासाः। यथायोगमिति। यस्यासिद्धौ संदेहे वा यो हेत्वाभासो युज्यते स तस्यासिद्धेः संदेहाच्च व्यवस्थाप्यत इति यस्य यस्य येन येन योगो यथायोगमिति।

ननु चाचार्येण विरुद्धाव्यभिचार्यपि संशयहेतुरुक्तः। हेत्वन्तरसाधितस्य विरुद्धं यत्तन्न व्यभिचरति स विरुद्धाव्यभिचारी। यदि वा विरुद्धश्चासौ साधनान्तरसिद्धस्य धर्मस्य विरुद्धसाधनादव्यभिचारी च स्वसाध्याव्यभिचारादविरुद्धाव्यभिचारी। सत्यमुक्त आचार्येण। मया त्विह नोक्तः। कस्मादित्याह। अनुमानस्य विषयः प्रमाणसिद्धं चैरूप्यम्। यतो ह्यनुमानसद्भावः सोऽनुमानस्य विषयः। प्रमाणसिद्धाच्च चैरूप्यादनुमानसद्भावस्तस्मात्तदेवानुमानविषयः। तस्मिन्प्रक्रान्ते न विरुद्धाव्यभिचारिसंभवः। प्रमाणसिद्धो हि चैरूप्ये प्रस्तुते स एव हेत्वाभासः संभवति यस्य प्रमाणसिद्धं रूपम्। न च विरुद्धाव्यभिचारिणः प्रमाणसिद्धमस्ति रूपम्। अतो न संभवः। ततोऽसंभवो नोक्तः। कस्मादसंभव इत्याह। न हीति। यस्मान्न संभवोऽस्ति विरुद्धतायाः। कार्यं च स्वभावश्च तयोरुक्तलक्षणयोरिति। कार्यस्य कारणाज्जन्मलक्षणं तत्त्वम्। स्वभावस्य च साध्यव्याप्तत्वं तत्त्वम्। यत्कार्यं यैश्च स्वभावः स कथमात्मकारणं व्यापकं च स्वभावं परित्यज्य भवेद्येन विरुद्धः स्यात्। अनुपलम्भस्य चोक्तलक्षणस्येति। दृश्यानुपलम्भत्वमनुपलम्भलक्षणम्। तस्यापि च स्वभावाव्यभिचारित्वान्न विरुद्धत्वसंभवः स्यात्। एतेभ्योऽन्यो भविष्यतीत्याह। न चान्य एतेभ्योऽव्यभिचारी चिभ्योऽत एव तेष्वेव हेतुत्वम्।

क्व तर्ह्याचार्यदिङ्नागेनायं हेतुदोष उक्त इत्याह। यस्मादस्वबलप्रवृत्तेऽनुमाने न संभवति तस्मादागमाश्रयमनुमान-

माश्रित्य विरुद्धाव्यभिचार्युक्तः। आगमसिद्धं हि यस्यानुमानस्य लिङ्गंचैरूप्यं तस्यागम आश्रयः।

ननु चागमसिद्धमपि चैरूप्यं प्रमाणसिद्धमित्याह। अवस्तु-दर्शनबलप्रवृत्तमिति। अवस्तुनो दर्शनं विकल्पमात्रं तस्य बलं सामर्थ्यम्। ततः प्रवृत्तमप्रमाणादिकल्पमात्राद्व्यवस्थितं चैरूप्य- ५
मागमसिद्धमनुमानस्य। न तु प्रमाणात्।

तत्तर्ह्यनुमानेनागमसिद्धचैरूप्यं क्वाधिक्रियतमित्याह। तदर्थेति। तस्यागमस्य योऽर्थोऽतीन्द्रियः प्रत्यक्षानुमानाभ्यामविषयीकृतः सामान्यादिस्तस्य विचारेषु प्रक्रान्तेष्वागमाश्रयमनुमानं संभवति। तदाश्रयो विरुद्धाव्यभिचार्युक्त आचार्येणेति। १०

कस्मात्पुनरागमाश्रयेऽप्यनुमाने संभव इत्याह। शास्त्रकृतां विपरीतस्य वस्तुविरुद्धस्य स्वभावस्योपसंहारो ढौकनमर्थेषु तस्य संभवाद्विरुद्धाव्यभिचारिसंभवः। भ्रान्त्येति विपर्यासेन। विप-र्यस्ता हि शास्त्रकाराः सन्तमसन्तं स्वभावमारोपयन्तीति।

यदि शास्त्रकृतोऽपि भ्रान्तो अन्येष्वपि पुरुषेषु क आश्वास १५
इत्याह। न हीति। न हेतुषु कल्पनया हेतुत्वव्यवस्थापि तु वस्तुस्थित्या। ततो यथावस्थितवस्तुस्थितिव्यात्मकार्यानुपलम्भेष्वस्य संभवो नास्ति। अवस्थितं परमार्थसदस्तु तदनतिक्रान्ता यथा-वस्थिता वस्तुस्थितिव्यवस्था येषां ते यथावस्थितवस्तुस्थितयः। ते हि यथावस्तुस्थितं तथास्थिता न कल्पनयाऽतस्तेषु न भ्रान्तेरव- २०
काशोऽस्ति येन विरुद्धाव्यभिचारिसंभवः स्यात्। तत्र विरुद्धा-व्यभिचारिणुदाहरणम्। यत्सर्वस्मिन्देशेऽवस्थितैः स्वसंबन्धिभिर्युग-

पदभिसंबध्यते तत्सर्वदेशावस्थितैरभिसंबध्यमानत्वं सामान्यस्यानूद्य सर्वगतत्वं विधीयते। तेन युगपदभिसंबध्यमानत्वं सर्वगतत्वे नियतं तेन व्याप्तं कथ्यते। दृष्टं सामान्यं कणादमहर्षिणा निष्क्रियं दृश्यमेकं चोक्तम्। युगपच्च सर्वैः स्वैः स्वैः संबन्धिभिः समवायेन संबद्धम्। तच्च पैलुकेन कणादशिष्येण व्यक्तिषु व्यक्तिरहितेषु च देशेषु सामान्यं स्थितं साधयितुं प्रमाणमिदमुपन्यस्तम्। यथाकाशमिति। व्याप्तिप्रदर्शनविषयो दृष्टान्तः। आकाशमपि हि सर्वदेशावस्थितैर्घटादिभिः स्वसंयोगिभिर्युगपदभिसंबध्यमानं सर्वगतं चाभिसंबध्यते च सर्वदेशावस्थितैः स्वसंबन्धिभिरिति हेतोः पक्षधर्मत्वप्रदर्शनम्।

अस्य स्वभावहेतुत्वं प्रयोजयितुमाह। तत्संबन्धीति। तेषां सर्वदेशावस्थितानां द्रव्याणां संबन्धी सामान्यस्य स्वभावः स एव तत्संबन्धिस्वभावमात्रम्।

तदनुबध्नातीति तदनुबन्धिनी। काऽसावित्याह। तद्देश-संनिहितस्वभावता। तेषां संबन्धिनां देशस्तद्देशस्तद्देशे संनिहितः स्वभावो यस्य तत्तद्देशसंनिहितस्वभावं तस्य भावस्तत्ता। यस्य हि येषां संबन्धी स्वभावस्तन्नियमेन तेषां देशे संनिहितं भवति। ततस्तत्संबन्धित्वानुबन्धिनी तद्देशसंनिहितता सामान्यस्य।

ननु च गवां संबन्धी स्वामी। न च तद्देशे संनिहित-स्वभावः स्वामी। तत्कथं संबन्धित्वात्तद्देशत्वमित्याह। न हीति। यो यच्च देशे नास्ति स देशो यस्य स तद्देशस्तं न व्याप्नोत्या-

त्मना स्वरूपेण । इह सामान्यस्य तद्वतां च समवायलक्षणः संबन्धः । स चाभिन्नदेशयोरेव । तेन यत्र यत्समवेतं तत्तदात्मीयेन रूपेण क्रोडीकुर्वत्समवायिरूपदेशे स्वात्मानं निवेशयति । तद्देशरूपनिवेशनमेव तत्क्रोडीकरणम् । ततस्तत्समवायः । तस्माद्यद्यत्र समवेतं तत्तद्व्यं व्याप्नुवदात्मना तद्देशे संनिहितं भवति । ५ तदयमर्थः । तद्देशस्थवस्तु व्यापनं तद्देशसत्तया व्याप्तम् । तद्देशसत्ताभावे तद्व्यापनाभावाद्व्यापनलक्षणः समवायसंबन्धो न स्यात् । अस्ति च व्यापनम् । अतस्तद्देशे संनिहितत्वमिति । तदयं स्वभावहेतुः ।

पैठरप्रयोगं दर्शयन्नाह । द्वितीयोऽपीति । यदुपलब्धेर्लक्षणतां विषयतां प्राप्तं दृश्यमित्यर्थः । एतेन दृश्यानुपलब्धिमनूद्य तत्तत्तत्रास्तीत्यसङ्गवहार्यत्वं विहितम् । ततो व्याप्यदृश्यानुपलब्धेर्व्यापकमसङ्गवहार्य्यत्वं दर्शितम् । तद्यथेति । क्वचिदसन्घटो दृष्टान्तः ।

पक्षधर्मत्वं दर्शयितुमाह । नोपलभ्यते चेति । व्यक्तेरन्तरालं १५ व्यक्त्यन्तरं च व्यक्तिशून्यं चाकाशं दृश्यमपि कस्यांचिद्व्यक्तौ गोसामान्यमश्वादिषु व्यक्त्यन्तरेषु व्यक्तिशून्ये चाकाशे चोपलभ्यते । तस्मान्न तेष्वस्तीति गम्यते । अयमनुपलम्भः पूर्वोक्तस्य स्वभावः परस्परविरुद्धौ यावर्थौ तयोः साधनात्तावेकस्मिन्धर्मिणि संशयं जनयतः । न ह्येकोऽर्थः परस्परविरुद्धस्वभावो भवितुमर्हति । २० एकेन चाच व्यक्त्यन्तरेषु व्यक्तिशून्ये चाकाशे सत्त्वम् । अपरेण चानुपलम्भेनासत्त्वं साध्यते । न चैकस्यैकदैकत्र सत्त्वमसत्त्वं च

युक्तं तयोर्विरोधात्। तदागमसिद्धस्य सामान्यस्य सर्वगतत्वाऽसर्वगतत्वयोः साध्ययोरेतौ विरुद्धाव्यभिचारिणौ जातौ। यतः सामान्यस्यैकस्य युगपत्सर्वदेशावस्थितैरभिसंबन्धित्वं चाभ्युपगतं दृश्यत्वं च। ततः सर्वसंबन्धित्वात्सर्वगतत्वं दृश्यत्वादन्तरालानुपलम्भात्सर्वगतत्वम्। ततः शास्त्रकारेणैव विरुद्धव्याप्तत्वमपश्यता विरुद्धव्याप्तौ धर्मावुक्ता विरुद्धाव्यभिचार्यवकाशो दत्त इति। न च वस्तुन्यस्य संभवः। इत्युक्ता हेत्वाभासाः।

ननु च साधनावयवत्वाद्यथा हेतव उक्तास्तत्प्रसङ्गेन हेत्वाभासास्तथा साधनावयवत्वाद्दृष्टान्ता वक्तव्यास्तत्प्रसङ्गेन च दृष्टान्ताभासास्तत्कथं नोक्ता इत्याह। त्रिरूपो हेतुरुक्तस्तत्किं दृष्टान्तैः। स्यादेतत्तावता नार्थप्रतीतिरित्याह। तावतैवेति। उक्तलक्षणेनैव हेतुना भवति साध्यप्रतीतिः। अतः स एव गमकस्तद्वचनमेव साधनम्। न दृष्टान्तो नाम साधनस्यावयवः। यतश्चायं नावयवस्तेन नास्य दृष्टान्तस्य लक्षणं हेतुलक्षणात्पृथगुच्यते। कथं तर्हि हेतोर्व्याप्तिनिश्चयो यद्यदृष्टान्तको हेतुरिति चेत्। नोच्यते हेतुरदृष्टान्तक एवापि तु न हेतोः पृथग्दृष्टान्तो नाम। हेत्वन्तर्भूत एव दृष्टान्तः। अत एवोक्तं नास्य लक्षणं पृथगुच्यत इति। न त्वेवमुक्तं नास्य लक्षणमुच्यत इति।

यद्येवं हेतूपयोगिनोऽपि लक्षणं वक्तव्यमेवेत्याह। गतार्थत्वात्। गतोऽर्थः प्रयोजनमभिधेयं वा यस्य दृष्टान्तलक्षणस्य तत्तथा तस्य भावस्तत्त्वं तस्मात्। दृष्टान्तलक्षणं ह्युच्यते दृष्टान्तप्रतीतिर्यथा स्यात्। दृष्टान्तश्च हेतुलक्षणादेवावसितः। ततो

दृष्टान्तलक्षणस्य यत्प्रयोजनं दृष्टान्तप्रतीतिस्तङ्गतं निष्पन्नमभिधेयं वा। गतं ज्ञानं दृष्टान्ताख्यम्। कथं गतार्थत्वमित्याह। हेतो रूपभेदेनोक्तं सामान्येन साधारणं कार्यस्वभावानुपलम्भानामेतल्लक्षणमित्यर्थः।

किं पुनस्तत्सपक्ष एव यत्सत्त्वं विपक्षाच्च सर्वस्माद्व्यावृत्तिर्या रूपद्वयमेतद्भेदेनोक्तम्। न च सामान्यमुक्तमपि शक्यं ज्ञातुम्। अतस्तदेव विशेषनिष्ठं वक्तव्यम्। अतः पुनरपि विशेषेण विशेषवन्तौ जन्म-तन्माचानुबन्धौ दर्शनीयावुक्तौ। कार्यस्य जन्म ज्ञातव्यमुक्तम्। जन्मनि हि विज्ञाते कार्यस्य सपक्ष एव सत्त्वं विपक्षाच्च सर्वस्माद्व्यावृत्तिर्ज्ञाता भवति। स्वभावस्य तन्माचानुबन्धो दर्शनीय उक्तः। तदिति साधनं तदेव तन्माचं साधनमाचं तस्यानुबन्धोऽनुगमनं साधनमाचभावे भावः साध्यस्य। तन्माचभावित्वमेव हि साध्यस्य तादात्म्यम्। साधनस्य यदा स्वभावो ज्ञातो भवति तदा स्वभावहेतोः सपक्ष एव सत्त्वं विपक्षाच्च सर्वस्माद्व्यावृत्तिर्ज्ञाता भवति। तदेवं सामान्यलक्षणं विशेषात्मकं ज्ञातव्यं नान्यथा। ततो विशेषलक्षणमुक्तम्।

किमतो यदि नामैवमित्याह। तत्र सामान्यलक्षणे दर्शयितुकामेन विशेषलक्षणं दर्शयतैवं दर्शनीयमिति संबन्धः। यत्र धूमस्तत्राग्निरिति कार्यहेतोर्व्याप्तिर्दर्शिता। व्याप्तिश्च कार्यकारणभावसाधनात्प्रमाणान्निश्चीयते। ततो यथा महानस इति दर्शनीयम्। असत्यग्नौ न भवत्येव धूम इति व्यतिरेको दर्शितः। स च यथेतरस्मिन्निति दर्शनीयः। वह्निनिवृत्तिर्हि धूमनिवृत्तौ

नियता दर्शनीया। सा च महानसादितरत्र दर्शनीया। यच्च कृतकत्वं तत्रानित्यत्वमिति स्वभावहेतोर्व्याप्तिर्दर्शिता। अनित्यत्वाभावे न भवत्येव कृतकत्वमिति व्यतिरेको दर्शितः। व्याप्तेश्च साधकं प्रमाणं साधर्म्यदृष्टान्ते दर्शनीयम्। प्रसिद्ध-
५ व्याप्तिकस्य च हेतोः साध्यनिवृत्तौ निवृत्तिर्दर्शनीया। तदवश्यं यथा घटे यथाकाशे चेति दर्शनीयम्।

कस्मादेवमित्याह। न हीति। यस्मादन्यथा सामान्यलक्षण-रूपे सपक्षविपक्षयोः सदसत्त्वे यथोक्तप्रकारे इति नियते। सपक्ष एव सत्त्वं विपक्षेऽसत्त्वमेवेति नियमो यथोक्तप्रकारः। तेन शक्ये
१० दर्शयितुम्। विशेषलक्षणे हि दर्शिते यथोक्तप्रकारे सदसत्त्वे दर्शिते भवतः। न च विशेषलक्षणमन्यथा शक्यं दर्शयितुम्। तस्य साध्यस्य कार्यं तत्कार्यं धूमस्तस्य भावस्तत्कार्यता सैव नियमो यतस्तत्कार्यतया धूमो दहने नियतः सोऽयं तत्कार्यता-नियमो विशेषलक्षणरूपोऽन्यथा दर्शयितुमशक्यः। स्वभाव-
१५ लिङ्गस्य च स्वभावेन साध्येन व्याप्तिर्विशेषलक्षणरूपा न शक्या दर्शयितुम्। यस्मात्कार्यकारणभावस्तादात्म्यं च महानसे घटे च ज्ञातव्यं तस्माद्व्याप्तिसाधनं प्रमाणं दर्शयता साधर्म्यदृष्टान्तो दर्शनीयः। वैधर्म्यदृष्टान्तस्तु प्रसिद्धे तत्कार्यत्वे कारणाभावे कार्याभावप्रतिपत्त्यर्थम्। तत एव नावश्यं वस्तु भवति।
२० कारणाभावे कार्याभावो वस्तुन्यवस्तुनि वा भवति। ततो वस्त्व-वस्तु वा वैधर्म्यदृष्टान्त इष्यते। तस्माद्दृष्टान्तव्यतिरेकेण हेतो-रन्वयो व्यतिरेको वा न शक्यो दर्शयितुम्। अतो हेतुरूपाख्याना-

देव हेतोर्व्याप्तिसाधनस्य प्रमाणस्य दर्शकः साधर्म्यदृष्टान्तः। प्रसिद्ध-व्याप्तिकस्य साध्याभावे हेत्वभावप्रदर्शनाद्वैधर्म्यदृष्टान्त उपादेय इति च दर्शितं भवति। अस्मिंश्चार्थे दर्शिते दर्शित एव दृष्टान्तो भवति। योऽयमर्थो व्याप्तिसाधनप्रमाणप्रदर्शिनः कश्चिदुपादेयो निवृत्तिप्रदर्शनश्चेत्यस्मिन्नर्थे प्रदर्शिते दर्शितो दृष्टान्त इत्याह। एतावन्मात्रं रूपं यस्य तस्य भावस्तत्त्वं तस्मादिति। एतावदेव हि रूपं दृष्टान्तस्य। यदुत व्याप्तिसाधनप्रमाण-दर्शनत्वं नाम साधर्म्यदृष्टान्तस्य प्रसिद्धव्याप्तिकस्य वा साध्य-निवृत्तौ साधननिवृत्तिप्रदर्शकत्वमित्येतद्वैधर्म्यदृष्टान्तस्य। तच्च हेतुरूपाख्यानादेवाख्यातमिति किं दृष्टान्तलक्षणेन। एतेनैव च हेतुरूपाख्यानाद्दृष्टान्तत्वप्रदर्शनेन दृष्टान्तस्य दोषा दृष्टान्ता-भासा कथिता भवन्ति। तथा हि। पूर्वोक्तसिद्धये य उपा-दीयमानोऽपि दृष्टान्तो न समर्थः स्वकार्यं साधयितुं स दृष्टान्त-दोष इति सामर्थ्यादुक्तं भवति।

दृष्टान्ताभासानुदाहरति। यथेति। नित्यः शब्द इति। शब्दस्य नित्यत्वे साध्येऽमूर्तत्वादिति हेतुः। साधर्म्येण कर्मवत्पर-माणुवद्घटवदित्येते दृष्टान्ता उपन्यस्ताः। एते च दृष्टान्तदोषाः। साध्यं च साधनं चोभयं चेति तैर्विकलाः। साध्यविकलं कर्म तस्यानित्यत्वात्। साधनविकलः परमाणुर्मूर्तत्वात्परमाणूनाम्। असर्वगतं द्रव्यपरिमाणं मूर्तिः। असर्वगताश्च द्रव्यरूपाश्च पर-माणवः। नित्यास्तु वैशेषिकैरिष्यन्ते। ततो न साध्यविकलः। घटस्तूभयविकलः। अनित्यत्वान्मूर्तत्वाच्च घटस्येति। तथा

संदिग्धः साध्यधर्मो यस्मिन्स संदिग्धसाध्यधर्मः स आदिर्येषान्ते तथोक्ताः। संदिग्धसाध्यधर्मः। संदिग्धसाधनधर्मः। संदिग्धोभयः। उदाहरणम्। रागादिमानिति रागादिमत्त्वं साध्यम्। वचनादिति हेतुः। रथ्यापुरुषवदिति दृष्टान्तः। रागादिमत्त्वं संदिग्धम्। मरणं धर्मोऽस्येति मरणधर्मा तस्य भावो मरणधर्मत्वं साध्यम्। अयं पुरुष इति धर्मी। रागादिमत्त्वादिति हेतुः। रथ्यापुरुषे दृष्टान्ते संदिग्धं साधनं साध्यं तु निश्चितं मरणधर्मत्वमिति।

असर्वज्ञ इति। असर्वज्ञत्वं साध्यम्। रागादिमत्त्वादिति हेतुः। तदुभयमपि रथ्यापुरुषे दृष्टान्ते संदिग्धम्। असर्वज्ञत्वं रागादिमत्त्वं चेति।

तथाऽनन्वय इति। यस्मिन्दृष्टान्ते साध्यसाधनयोः सभवमात्रं दृश्यते न तु साध्येन व्याप्तो हेतुः सोऽनन्वयः। अप्रदर्शितान्वयश्च यस्मिन्दृष्टान्ते विद्यमानोऽप्यन्वयो न प्रदर्शितो वक्त्रा सोऽप्रदर्शितान्वयः। अनन्वयमुदाहरति। यथेति। यो वक्तेति वक्तृत्वमनूद्य स रागादिमानिति रागादिमत्त्वं विहितम्। ततो वक्तृत्वस्य रागादिमत्त्वं विहितम्। ततो वक्तृत्वस्य रागादिमत्त्वं प्रति नियमस्तेन व्याप्तिरुक्ता। दृष्टपुरुषवदिति। दृष्टग्रहणेन प्रतिवाद्यपि गृह्यते वाद्यपि। तेन वक्तृत्व-रागादिमत्त्वयोः सत्त्वमात्रमिष्टे पुरुषे सिद्धम्। व्याप्तिस्तु न सिद्धा। तेनाऽनन्वयो दृष्टान्त इति।

अनित्यः शब्द इत्यनित्यत्वं साध्यम्। कृतकत्वादिति हेतुः। घटवदित्यत्र दृष्टान्तेन प्रदर्शितोऽन्वयः। इह यद्यपि

कृतकत्वेन घटसदृशः शब्दस्तथापि नानित्यत्वेनापि सदृशः प्रत्येतुं शक्योऽतिप्रसङ्गात् । यदि तु कृतकत्वमनित्यत्वस्वभावं विज्ञात भवत्येवं कृतकत्वादनित्यत्वप्रतीतिः स्यात् । तस्माद्यत्कृतकं तदनित्यमिति । कृतकत्वमनित्यत्वनियतमभिधाय नियमसाधनायान्वयवाक्यार्थप्रतिपत्तिविषयो दृष्टान्त उपादेयः । स च प्रदर्शितान्वय एव । अनेन त्वन्वयवाक्यमनुक्त्वैव दृष्टान्त उपात्तः । ईदृशश्च साधर्म्यमात्रेणैवोपयोगी । न च साधर्म्यात्साध्यसिद्धिः । अतोऽन्वयार्थो दृष्टान्तस्तदर्थश्चानेन नोपात्तः । साधर्म्यार्थश्चोपात्तो निरूपयोग इति वक्तृदोषादयं दृष्टान्तदोषः । वक्ता ह्यत्र परः प्रतिपादयितव्यः । ततो यदि नाम न दुष्टं वस्तु तथापि वक्ता दुष्टं दर्शितमिति दुष्टमेव । तथा विपरीतोऽन्वयो यस्मिन्दृष्टान्ते स तथोक्तः । तमेवोदाहरति । यदनित्यं तत्कृतकमिति । कृतकत्वमनित्यत्वनियतं दृष्टान्ते दर्शनीयम् । एवं कृतकत्वादनित्यत्वगतिः स्यात् । अत्र त्वनित्यत्वं कृतकत्वे नियतं दर्शितम् । कृतकत्वं त्वनियतमेवानित्यत्वे । ततो यादृशमिह कृतकत्वमनियतमनित्यत्वे प्रदर्शितं तादृशान्नास्त्यनित्यत्वप्रतीतिः । तथाहि । यदनित्यमित्यनित्यत्वमनूद्य तत्कृतकमिति कृतकत्वं विहितम् । अतोऽनित्यत्वं नियतमुक्तं कृतकत्वे न तु कृतकत्वमनित्यत्वे । ततो यथानित्यत्वादनियतात्प्रयत्नानन्तरीयकत्वेन प्रयत्नानन्तरीयकत्वप्रतीतिस्तद्वत्कृतकत्वादनित्यत्वप्रतिपत्तिर्न स्यात् । अनित्यत्वेऽनियतत्वात्कृतकत्वस्य । यद्यपि च कृतकत्वं वस्तुस्थित्याऽनित्यत्वे नियतं तथाप्यनियतं वक्ता दर्शितम् । अतस्तत्त्वयं न दुष्टमपि

वक्तुर्दोषादृष्टम्। तस्मादिपरीतान्वयोऽपि वक्तुरपराधान्न वस्तुतः। परार्थानुमाने च वक्तुरपि दोषश्चिन्त्यते। इति साधर्म्येण नव दृष्टान्तदोषा उक्ताः।

वैधर्म्येणापि नव दृष्टान्तदोषान्वक्तुमाह। नित्यत्वे शब्दस्य साध्ये हेतावमूर्तत्वे परमाणुवद्वैधर्म्यदृष्टान्तः। साध्याव्यतिरेकी नित्यत्वात्परमाणूनाम्। कर्म साधनाव्यतिरेकि। अमूर्तत्वात्कर्मणः। आकाशमुभयाव्यतिरेकि। नित्यत्वादमूर्तत्वाच्च। साध्यमादिर्येषां तानि साध्यादीनि साधसाधनोभयानि तेषामव्यतिरेको वृत्त्यभावः स येषामस्ति ते साध्याद्यव्यतिरेकिणः। ते चोदाहृताः।

अपरानुदाहर्तुमाह। तथेति। साध्यस्य व्यतिरेकः साध्यव्यतिरेकः संदिग्धः साध्यव्यतिरेको यस्मिन्स संदिग्धसाध्यव्यतिरेकः स आदिर्येषां ते तथोक्ताः।

संदिग्धसाध्यव्यतिरेकमुदाहर्तुमाह। यथेति। असर्वज्ञा इत्येकं साध्यम्। अनाप्ता अक्षीणदोषा इति द्वितीयम्। कपिलादय इति धर्मी। अविद्यमानसर्वज्ञतेत्यादिहेतुः। सर्वज्ञता चाप्तता च तयोर्लिङ्गभूतः प्रमाणातिशयो लिङ्गात्मकः प्रमाणविशेषः। अविद्यमानः सर्वज्ञताप्तताल्लिङ्गभूतः प्रमाणातिशयो यस्मिंस्तत्तथोक्तं शासनं तादृगं शासनं येषां ते तथोक्तास्तेषां भावस्तत्त्वं तस्मात्प्रमाणातिशयो ज्योतिर्ज्ञानोपदेश इहाभिप्रेतः। यदि हि कपिलादयः सर्वज्ञा आप्ता वा स्युस्तदा ज्योतिर्ज्ञानादिकं कस्मान्नोपदिष्टवन्तः। न चोपदिष्टवन्तः। तस्मान्न सर्वज्ञा आप्ता वा।

अत्र प्रमाणे वैधर्म्योदाहरणम् । यः सर्वज्ञ आप्तो वा स ज्योतिर्ज्ञानादिकं सर्वज्ञताप्ततालिङ्गभूतमुपदिष्टवान् । यथा ऋषभो वर्धमानश्च तावादौ यस्य स ऋषभवर्धमानादिर्दिगम्बराणां शास्ता सर्वज्ञ आप्तश्चेति । तदिह वैधर्म्योदाहरणादृषभादेरसर्वज्ञत्वस्यानाप्तताया च व्यतिरेको व्यावृत्तिः संदिग्धा । यतो ज्योतिर्ज्ञानं चोपदिशेदसर्वज्ञश्च भवेदनाप्तो वा । कोऽत्र विरोधः । नैमित्तिकमेतज्ज्ञानं व्यभिचारि न सर्वज्ञत्वमनुमापयेत् ।

संदिग्धः साधनव्यतिरेको यस्मिन्स तथोक्तः । तमुदाहरति । यथेति । ऋक्सामयजूंषि त्रीणि त्रयी तां वेत्ति त्रयीवित् । तेन न ग्राह्यं वचनं यस्येति साध्यम् । विवक्षित इति कपिलादिर्धर्मी । रागादिमत्त्वादिति हेतुः ।

अत्र प्रमाणे वैधर्म्योदाहरणम् । साध्याभावः साधनाभावेन व्याप्तो यत्र दर्श्यते तद्वैधर्म्योदाहरणम् । ग्राह्यं वचनं येषां ते ग्राह्यवचना इति साध्यनिवृत्तिमनूद्य न ते रागादिमन्त इति साधनाभावो विहितः । गौतम आदिर्येषां ते तथोक्ता मन्वादयो धर्मशास्त्राणि स्मृतयस्तेषां कर्तारः । त्रयीविदा हि ब्राह्मणेन ग्राह्यवचना धर्मशास्त्रकृतो वीतरागाश्च । त इति धर्मी । व्यतिरेकविषयो गौतमाद्य इति गौतमादिभ्यो रागादिमत्त्वस्य साधनस्य निवृत्तिः संदिग्धा । यद्यपि ते ग्राह्यवचनास्त्रयीविदा तथापि किं सरागा उत वीतरागा इति संदेहः ।

संदिग्ध उभयोर्व्यतिरेको यस्मिन्स तथोक्तः । तमुदाहरति । यथेति । अवीतरागा इति रागादिमत्त्वं साध्यम् । कपिलाद्य

इति धर्मौ। परिग्रहो लभ्यमानस्य स्वीकारः प्रथमः। स्वीकारादूर्द्धं यद्गार्ध्यं मात्सर्यं स आग्रहः। परिग्रहश्चाग्रहश्च ताभ्यां योगात्। कपिलादयो लभ्यमानं स्वीकुर्वन्ति स्वीकृतं न मुञ्चन्तीति ते रागादिमन्तो गम्यन्ते।

अत्र प्रमाणे वैधर्म्योदाहरणम्। यत्र साध्याभावे साधनाभावो दर्शयितव्यः। यो वीतराग इति साध्याभावमनूद्य न तस्य परिग्रहाग्रहाविति साधनाभावो विहितः। यथा ऋषभादेरिति दृष्टान्तः। एतस्मादृषभादेर्दृष्टान्तादवीतरागत्वस्य साध्यस्य परिग्रहाग्रहयोगस्य च साधनस्य निवृत्तिः संदिग्धा। ऋषभादीनां हि परिग्रहाग्रहयोगोऽपि संदिग्धो वीतरागत्वं च। यदि नाम तत्सिद्धान्ते वीतरागाश्च निष्परिग्रहाश्च पठ्यन्ते तथापि संदेह एव।

अपरानपि चानुदाहर्तुमाह। अविद्यमानो व्यतिरेको यस्मिन्सोऽव्यतिरेकः। अवीतराग इति रागादिमत्त्वं साध्यम्। वक्तृत्वादिति हेतुः। दृष्ट व्यतिरेकमाह। यत्रावीतरागत्वं नास्तीति साध्याभावानुवादः। तत्र वक्तृत्वमपि नास्तीति साधनाभावविधिः। तेन साधनाभावेन साध्याभावो व्याप्त उक्तः। दृष्टान्तो यथोपलखण्डेति। कथमयमव्यतिरेको यावतोपलखण्डादुभयं निवृत्तम्। किमतो यद्युपलखण्डादुभयं व्यावृत्तं सरागत्वं च वक्तृत्वं च तथापि व्याप्त्या व्यतिरेको यस्तस्यासिद्धेः कारणादव्यतिरेकोऽयम्।

कीदृशौ पुनर्व्याप्तिरित्याह। सर्वो वीतराग इति साध्या-

भावानुवादः । न वक्तीति साधनाभावविधिः । तेन साध्याभावः साधनाभावनियतः ख्यापितो भवतीति । ईदृशौ व्याप्तिस्तया व्यतिरेको न सिद्धोऽस्य चार्थस्य प्रसिद्धये दृष्टान्तस्तत्स्वकार्याकरणाद्दुष्टः ।

अप्रदर्शितो व्यतिरेको यस्मिन् स तथोक्तः । अनित्यः शब्द इत्यनित्यत्वं साध्यम् । कृतकत्वादिति हेतुः । आकाशवदिति वैधर्म्येण दृष्टान्तः । दृह परार्थानुमाने परस्मादर्थः प्रतिपत्तव्यः । स शुद्धोऽपि स्वतो यदि परेणाशुद्धः ख्याप्यते । स तावद्यथा प्रकाशितस्तथा न युक्तो यथा युक्तस्तथा न प्रकाशितः । प्रकाशितश्च हेतुः । अतो वक्तुरपराधादपि परार्थानुमाने हेतुर्दृष्टान्तो वा दुष्टः स्यादपि । न च सादृश्यात्सादृश्याद्वा साध्यप्रतिपत्तिरपि तु साध्यनियताद्धेतोः । अतः साध्यनियतो हेतुरन्वयवाक्येन व्यतिरेकवाक्येन च वक्तव्यः । अन्यथा गमको नोक्तः स्यात् । स तथोक्तो दृष्टान्तेन सिद्धो दर्शयितव्यः । तस्माद्दृष्टान्तो नामाऽन्वयव्यतिरेकवाक्यार्थप्रदर्शनः । न चेह व्यतिरेकवाक्यं प्रयुक्तम् । अतो वैधर्म्यदृष्टान्त इहासादृश्यभावेन साधक उपन्यस्तः । न च तथा साधको व्यतिरेकविषयत्वेन । स साधको न च तथोपन्यस्त इति । अतोऽप्रदर्शितव्यतिरेको वक्तुरपराधाद्दुष्टः ।

विपरीतो व्यतिरेको यस्मिन्वैधर्म्यदृष्टान्ते स तथोक्तः । तमुदाहरति । यदकृतकमित्यादि । इहान्वयव्यतिरेकवाक्याभ्यां साध्यनियतो हेतुर्दर्शयितव्यः । यदा च साध्यनियतो हेतुर्दर्शयितव्यस्तदा व्यतिरेकवाक्ये साध्याभावः साधनाभावे नियतो

दर्शयितव्यः। एवं हि हेतुः साध्यनियतो दर्शितः स्यात्। यदि तु साध्याभावः साधनाभावे नियतो नाख्यायते साधनसत्तायामपि साध्याभावः संभाव्येत। तथा च साधनं साध्यनियतं न प्रतीयेत। तस्मात्साध्याभावः साधनाभावे नियतो वक्तव्यः। विपरीतव्यतिरेके च साधनाभावः साध्याभावे नियत उच्यते। न साध्याभावः साधनाभावे। तथा हि। यदकृतकमिति साधनाभावमनूद्य तन्नित्यमिति साध्याभावविधिः। ततोऽयमर्थः। अकृतको नित्य एव। तथा च सत्यकृतकत्वं नित्यत्वे साध्याभावे नियतमुक्तं न नित्यत्वं साधनाभावे। ततो न साध्यनियतं हेतुं व्यतिरेकवाक्यमाह। तथा च विपरीतव्यतिरेकोऽपि वक्तुरपराधादुष्टः।

दृष्टान्तदोषानुद्धृत्य दुष्टत्वनिबन्धनत्वं दर्शयितुमाह। न ह्येभिरिति। साध्यनियतहेतुप्रदर्शनाय दृष्टान्ता वक्तव्याः। एभिश्च हेतोः सपक्ष एव सत्त्वं विपक्षे च सर्वत्रासत्त्वमेव यत्सामान्यलक्षणं तन्निश्चयेन न शक्यं दर्शयितुम्। ननु च सामान्यलक्षणं विशेषनिष्ठमेव प्रतिपत्तव्यं न स्वत एवेत्याह विशेषलक्षणं वा। यदि विशेषलक्षणं प्रतिपादयितुं शक्येत। स्यादेव सामान्यलक्षणप्रतिपत्तिः। विशेषलक्षणमेव तु न शक्यमेभिः प्रतिपादयितुम्। तस्मादर्थापत्त्या सामर्थ्येनेति न तेषां निराकरणं द्रष्टव्यम्। साध्यनियतसाधनप्रतीतय उपात्ताः। तदसमर्था दुष्टाः स्वकार्यकरणादिति सामर्थ्यम्। दृयता साधनमुक्तम्।

दूषणं वक्तुमाह। दूषणा का द्रष्टव्या। न्यूनतादीनामुक्तिरुच्यते। न येत्युक्तिर्वचनं न्यूनतादिर्वचनम्। दूषणं विपरीतु-

माह । ये पूर्वं न्यूनतादयोऽसिद्धविरुद्धानैकान्तिका उक्तास्तेषा-
मुद्भावनं यद्वचनं तद्दूषणम् । ननु च न्यूनतादयो न विपर्यय-
साधनास्तत्कथं दूषणमित्याह । तेन न्यूनतादिवचनेन परेषामि-
ष्टस्यासावर्थस्य तस्य सिद्धिर्निश्चयस्तस्याः प्रतिबन्धान्नावश्य विपर्यय-
साधनादेव दूषणं विरुद्धवदपि तु परस्याभिप्रेतनिश्चयनिबन्धा- ५
न्निश्चयाभावो भवति । निश्चयविपर्यय इत्यस्ति विपर्ययसिद्धि-
रिति। उक्ता दूषणाभासा इति। दूषणवदाभासन्त इति दूषणा-
भासाः । के ते जातयः । जातिशब्दः सादृश्यवचन उत्तरसदृ-
शानि जात्युत्तराणीति । उत्तरस्थानप्रयुक्तत्वादुत्तरसदृशानि
जात्युत्तराणि । तदेवोत्तरसादृश्यमुत्तरस्थानप्रयुक्तत्वेन दर्शयितु- १०
माह । अभूतस्यासत्यस्य दोषस्योद्भावनानि । उद्भाव्यत एते-
रित्युद्भावनानि वचनानि तानि जात्युत्तराणि । जात्या सादृ-
श्येनोत्तराणि जात्युत्तराणीति ।

कतिपयपदवस्तुव्याख्यया यन्मयाप्तं
कुशलममलमिन्दोरंशुवन्न्यायबिन्दोः । १५
पदमजरमवाप्य ज्ञानधर्मोत्तरं य-
ज्जगदुपकृतिमात्रव्याप्तिः स्यामतोऽहम् ॥

समाप्तेयं न्यायबिन्दुटीका कृतिराचार्यधर्मोत्तरस्य ॥०॥

सहस्रमेकं श्लोकानां तथा शतचतुष्टयम् ।
सप्तसप्ततिसंयुक्तं निपुणं परिपिण्डितम् ॥ २०

II.

न्यायबिन्दुः ।

NYÁYABINDU.

न्यायबिन्दुः ।

प्रथमः परिच्छेदः ।

सम्यग्ज्ञानपूर्विका सर्वपुरुषार्थसिद्धिरिति तद्व्युत्पाद्यते । द्विविधं सम्यग्ज्ञानं प्रत्यक्षमनुमानं च । तच्च प्रत्यक्षं कल्पनापोढमभ्रान्तम् । अभिलापसंसर्गयोग्यप्रतिभासप्रतीतिः कल्पना तया रहितम् । तिमिराशुभ्रमणनौयानसंक्षोभाद्यनाहितविभ्रमं ज्ञानं प्रत्यक्षम् ।

तच्चतुर्विधम् । इन्द्रियज्ञानस्वविषयानन्तरविषयसहकारिणेन्द्रियज्ञानेन समनन्तरप्रत्ययेन जनितं तत् । मनोविज्ञानं सर्वं चित्तचैत्तानामात्मसंवेदनं भूतार्थभावनाप्रकर्षपर्यन्तजं योगिज्ञानं चेति ।

तस्य विषयः स्वलक्षणम् । यस्यार्थस्य संनिधानासंनिधानाभ्यां ज्ञानप्रतिभासभेदस्तत्स्वलक्षणम् । तदेव परमार्थसत् । अर्थक्रियासामर्थ्यलक्षणत्वाद्वस्तुनः । अन्यत्सामान्यलक्षणं सो ऽनुमानस्य विषयस्तदेव च प्रत्यक्षं ज्ञानं प्रमाणफलमर्थप्रतीतिरूपत्वात् । अर्थसारूप्यमस्य प्रमाणं तदृशादर्थप्रतीतिसिद्धेरिति ॥

प्रथमः परिच्छेदः ॥

द्वितीयः परिच्छेदः ।

अनुमानं द्विधा । स्वार्थं परार्थं च । तत्र स्वार्थं त्रिरूपाल्लिङ्गाद्यदनुमेये ज्ञानं तदनुमानम् । प्रमाणफल-व्यवस्थाऽत्रापि प्रत्यक्षवत् । त्रैरूप्यं पुनर्लिङ्गस्यानुमेये सत्त्वमेव । सपक्ष एव सत्त्वम् । असपक्षे चासत्त्वमेव निश्चितम् ।

अनुमेयो ऽत्र जिज्ञासितविशेषो धर्मी । साध्यधर्म-सामान्येन समानो ऽर्थः सपक्षः । न सपक्षो ऽसपक्षः । ततो ऽन्यस्तद्विरुद्धस्तदभावश्चेति त्रिरूपाणि च । त्रीण्येव च लिङ्गानि । अनुपलब्धिः स्वभाव-कार्ये चेति तत्रानुपलब्धिर्यथा न प्रदेशविशेषे क्वचिद्घट उपलब्धि-लक्षणप्राप्तस्यानुपलब्धेरिति । उपलब्धिलक्षणप्राप्तिरुप-लम्भप्रत्ययान्तरसाकल्यं स्वभावविशेषश्च । यः स्वभावः सत्त्वन्येषूपलम्भप्रत्ययेषु यत्प्रत्यक्ष एव भवति स स्वभावः । स्वभावः स्वसत्तामात्रभाविनि साध्यधर्मे हेतुः । यथा वृक्षोऽयं शिंशपात्वादिति । कार्यं यथाग्निरत्र धूमा-दिति । अत्र द्वौ वस्तुसाधनौ । एकः प्रतिषेधहेतुः ।

स्वभावप्रतिबन्धे हि सत्यर्थो ऽर्थं गमयेत् । तदप्रतिबद्धस्य तदव्यभिचारनियमाभावात् । स च प्रतिबन्धः साध्येऽर्थे लिङ्गस्य वस्तुनस्तादात्म्यात्साध्यार्थादुत्पत्तेश्च । अतत्स्वभावस्यातदुत्पत्तेश्च तच्चाप्रतिबद्धस्वभावत्वात् । ते च तादात्म्य-तदुत्पत्ती स्वभाव-कार्ययोरेवेति । ताभ्यामेव वस्तुसिद्धिः । प्रतिषेधसिद्धिरपि यथोक्ताया एवानुपलब्धेः । सति वस्तुनि तस्या असंभवात् । अन्यथा चानुपलब्धिलक्षणप्राप्तेषु देशकालस्वभावविप्रकृष्टेष्वात्मप्रत्यक्षनिवृत्तेरभावनिश्चयाभावात् । अमूढस्मृतिसंस्कारस्यातीतस्य वर्तमानस्य च प्रतिपत्तृप्रत्यक्षस्य निवृत्तिरभावव्यवहारसाधनी । तस्या एवाभावनिश्चयात् । सा च प्रयोगभेदादेकादशप्रकारा ।

स्वभावानुपलब्धिर्यथा । नाच धूम उपलब्धिलक्षणप्राप्तस्यानुपलब्धेरिति ।

कार्यानुपलब्धिर्यथा । नेहाप्रतिबद्धसामर्थ्यानि धूमकारणानि सन्ति धूमाभावात् ।

व्यापकानुपलब्धिर्यथा । नाच शिंशपा वृक्षाभावादिति ।

स्वभावविरुद्धोपलब्धिर्यथा । नाच शीतस्पर्शो ऽग्नेरिति ।

विरुद्धकार्योपलब्धिर्यथा । नाच शीतस्पर्शो धूमादिति ।

विरुद्धव्याप्तोपलब्धिर्यथा । न ध्रुवभावी भूतस्यापि भावस्य विनाशो हेत्वन्तरापेक्षणादिति ।

कार्यविरुद्धोपलब्धिर्यथा । नेहाप्रतिबद्धसामर्थ्यानि शीतकारणानि सन्त्यग्नेरिति ।

व्यापकविरुद्धोपलब्धिर्यथा । नाच तुषारस्पर्शो ऽग्नेरिति ।

कारणानुपलब्धिर्यथा । नाच धूमोऽग्न्यभावादिति ।

कारणविरुद्धोपलब्धिर्यथा । नास्य रोमहर्षादिविशेषाः संनिहितदहनविशेषत्वादिति ।

कारणविरुद्धकार्योपलब्धिर्यथा । न रोमहर्षादिविशेषयुक्तपुरुषवानयं प्रदेशो धूमादिति ।

इमे सर्वे कार्यानुपलब्ध्यादयो दशानुपलब्धिप्रयोगाः स्वभावानुपलब्धौ संग्रहमुपयान्ति । पारंपर्येणार्थान्तरविधिप्रतिषेधाभ्यां प्रयोगभेदे ऽपि प्रयोगदर्शनाभ्यासात्स्वयमप्येवं व्यवच्छेदप्रतीतिर्भवतीति स्वार्थे ऽप्यनुमाने ऽस्याः प्रयोगनिर्देशः । सर्वत्र चास्यामभावव्यवहारसाधन्यामनुपलब्धौ येषां स्वभावविरुद्धा-

दीनामुपलब्ध्या कारणादीनामनुपलब्ध्या च प्रतिषेध उक्तस्तेषामुपलब्धिलक्षणप्राप्तानामेवोपलब्धिरनुपलब्धिश्च वेदितव्या। अन्येषां विरोधकार्यकारणभावासिद्धिः ।

विप्रकृष्टविषयानुपलब्धिः प्रत्यक्षानुमाननिवृत्तिलक्षणा संशयहेतुः प्रमाणनिवृत्तावप्यर्थाभावासिद्धेरिति ॥

इति द्वितीयः परिच्छेदः ।

तृतीयः परिच्छेदः।

चिरूपलिङ्गाख्यानं परार्थानुमानम्। कारणे कार्योपचारात्। तद्विविधं प्रयोगभेदात्। साधर्म्यवद्वैधर्म्यवच्चेति। नानयोरर्थतः कश्चिद्भेदो ऽन्यत्र प्रयोगभेदात्। तत्र साधर्म्यवद्यदुपलब्धिलक्षणप्राप्तं सन्नोपलभ्यते सो ऽसद्व्यवहारविषयः सिद्धः। यथाऽन्यः कश्चिद्दृष्टः शशविषाणादिर्नोपलभ्यते च क्वचित्प्रदेशविशेष उपलब्धिलक्षणप्राप्तो घट इति तथा स्वभावहेतोः प्रयोगः। यत्सत्तत्सर्वमनित्यं यथा घटादिरिति। शुद्धस्य स्वभावहेतोः प्रयोगः। यदुत्पत्तिमत्तदनित्यमिति। स्वभावभूतधर्मभेदेन स्वभावस्य प्रयोगः। यत्कृतकं तदनित्यमित्युपाधिभेदेन। अपेक्षितपरव्यापारो हि भावः स्वभावनिष्पत्तौ कृतक इति। एवं प्रत्ययभेदभेदित्वादयो द्रष्टव्याः। सन्नुत्पत्तिमान्कृतको वा शब्द इति पक्षधर्मोपदर्शनं सर्वं एते साधनधर्मा यथास्वं प्रमाणैः सिद्धसाधनधर्ममाचानुबन्ध एव साध्यधर्मेऽवगन्तव्याः। तत्स्वभावत्वात्स्वभावस्य च हेतुत्वात्। वस्तुतस्तयोस्तादात्म्यात्तन्निष्पत्तावनिष्पन्नस्य तत्स्वभावत्वाभावाद्-

व्यभिचारसंभवाच्च । कार्यहेतोरपि प्रयोगः । धूमस्तचाग्निर्यथा महानसादावस्ति चेह धूम इति । इहापि सिद्ध एव । कार्यकारणभावे कारणे साध्ये कार्यहेतुर्वक्तव्यः । वैधर्म्यवतः प्रयोगो यत्सदुपलब्धिलक्षणप्राप्तं तदुपलभ्यत एव । यथा नीलादिविशेषः । न चैवमिहोपलब्धिलक्षणप्राप्तस्य सत उपलब्धिर्घटस्येत्यनुपलब्धिप्रयोगः । असत्यनित्यत्वे नास्ति सत्त्वमुत्पत्तिमत्त्वं कृतकत्वं वा । असंश्च शब्द उत्पत्तिमान्कृतको वेति स्वभावहेतोः प्रयोगः । असत्यग्नौ न भवत्येव धूमो ऽच चास्तीति कार्यहेतोः प्रयोगः । साधर्म्येणापि हि प्रयोगे ऽर्थाद्वैधर्म्यगतिरिति । असति तस्मिन्साध्ये न हेतोरन्वयाभावात् । तथा वैधर्म्येणाप्यन्वयगतिः । असति तस्मिन्साध्यभावे हेत्वभावस्यासिद्धेः । न हि स्वभावप्रतिबन्धे सत्येकस्य निवृत्तावपरस्य नियमेन निवृत्तिः । स च द्विप्रकारः । सर्वस्य 'तादात्म्यलक्षणस्तदुत्पत्तिलक्षणश्चेत्युक्तम् । तेन हि निवृत्तिं कथयता प्रतिबन्धो दर्शनीयः । तस्मान्निवृत्तिवचनमाक्षिप्तप्रतिबन्धोपदर्शनमेव भवति । यच्च प्रतिबन्धोपदर्शनं सदेवान्वयवचनमित्येकेनापि वाक्येनान्वयमुखेन व्यतिरेकमुखेन वा प्रयुक्तेन सपक्षाऽसपक्षयोर्लिङ्गस्य सदसत्त्वख्यापनं कृतं

भवतीति नावश्यवाक्यद्वयप्रयोगः। अनुपलब्धावपि यत्सदुपलब्धिलक्षणप्राप्तं तदुपलभ्यत एवेत्युक्ते ऽनुपलभ्यमानं तादृशमसदिति प्रतीतेरन्वयसिद्धिः। द्वयोरप्यनयोः प्रयोगे ऽवश्यं पक्षनिर्देशः। यस्मात्साधर्म्यवत्प्रयोगे ऽपि यदुपलब्धिलक्षणप्राप्तं सन्नोपलभ्यते सो ऽसद्व्यवहारविषयः। नोपलभ्यते चायमुपलब्धिलक्षणप्राप्तो घट इत्युक्ते सामर्थ्यादेव नेह घट इति भवति। तथा वैधर्म्यवत्प्रयोगे ऽपि यः सद्व्यवहारविषय उपलब्धिलक्षणप्राप्तः स उपलभ्यत एव न तथाच तादृशो घट उपलभ्यत इत्युक्ते सामर्थ्यादेव नेह सद्व्यवहारविषय इति भवति।

कीदृशः पुनः पक्ष इति निर्देश्यः। स्वरूपेणैव स्वयमिष्टो निराकृतः पक्ष इति। स्वरूपेणेति साध्यत्वेनेष्टः। स्वरूपेणैवेति साध्यत्वेनेष्टो न साधनत्वेनापि। यथा शब्दस्यानित्यत्वे साध्ये चाक्षुषत्वं हेतुः। शब्दे ऽसिद्धत्वात्साध्यं न पुनस्तदिह साध्यत्वेनैवेष्टं साधनत्वेनाप्यभिधानात्। स्वयमिति वादिना यस्तदा साधनमाह। एतेन यद्यपि क्वचिच्छास्त्रे स्थितसाधनमाह। तच्छास्त्रकारेण तस्मिन्धर्मिण्यनेकधर्माभ्युपगमे ऽपि यस्तदा तेन वादिना धर्मः स्वयं साधयितुमिष्टः स एव साध्यो

नेतर इत्युक्तं भवति। इष्ट इति यचार्थे विवादेन साधनमुपन्यस्तं तस्य सिद्धिमिच्छता सो ऽनुक्तो ऽपि वचनेन साध्यस्तदधिकरणत्वाद्विवादस्य। यथा परार्थाश्चक्षुरादयः संघातत्वाच्छयनासनाद्यङ्गवदिति। अचात्मार्था इत्यनुक्तावप्यात्मार्थताऽनेनोक्तमाचमेव साध्यमित्युक्तं भवति। अनिराकृत इति। एतल्लक्षणयोगे ऽपि यः साधयितुमिष्टो ऽप्यर्थः प्रत्यक्षानुमानप्रतीतिस्ववचनैर्निराक्रियते न स पक्ष इति प्रदर्शनार्थं तच प्रत्यक्षनिराकृतो यथा अश्रावणः शब्द इति। अनुमाननिराकृतो यथा नित्यः शब्द इति। प्रतीतिनिराकृतो यथा अचन्द्रः शशीति। स्ववचननिराकृतो यथा नानुमानं प्रमाणम्। इति चत्वारः पक्षाभासा निराकृता भवन्ति। सिद्धस्यासिद्धस्यापि साधनत्वेनाभिमतस्य स्वयं वादिना तदा साधयितुमनिष्टस्योक्तमाचस्य निराकृतस्य च विपर्ययेण साध्यस्तेनैव स्वरूपेणाभिमतो वादिन इष्टो निराकृतः पक्ष इति पक्षलक्षणमवद्यं दर्शितं भवति। चिरूपलिङ्गाख्यानं परार्थानुमानमित्युक्तम्।

तच चयाणां रूपाणामेकस्यापि रूपस्यानुक्तौ साधनाभास उक्तावप्यसिद्धौ संदेहे वा प्रतिपाद्यप्रति-

पादकयोरेकस्य रूपस्य धर्मिसंबन्धस्यासिद्धौ संदेहे चासिद्धो हेत्वाभासः। यथा अनित्यः शब्द इति साध्ये चाक्षुषत्वमुभयासिद्धम्। चेतनास्तरव इति साध्ये सर्वत्वगपहरणे मरणं प्रतिवाद्यसिद्धं विज्ञानेन्द्रियायुर्निरोधलक्षणस्य मरणस्यानेनाभ्युपगमात्तस्य च तरुष्वसंभवात्। अचेतनाः सुखादय इति साध्य उत्पत्तिमत्त्वमनित्यं वा सांख्यस्य स्वयं वादिनो ऽसिद्धम्। तथा स्वयं तदाश्रयणस्य वा संदेहे ऽसिद्धः। यथा बाष्पादिभावेन संदिह्यमानो भूतसंघातो ऽग्निसिद्धावुपदिश्यमानः संदिग्धासिद्धः। यथेह निकुञ्जे मयूरः केकायितादिति तदापातदेशविभ्रमे। धर्म्यसिद्धावप्यसिद्धो यथा सर्वगत आत्मेति साध्ये सर्वोपलभमानगुणत्वम्। तथैकस्य रूपस्यासपक्षे सत्त्वस्यासिद्धावनैकान्तिको हेत्वाभासः। यथा शब्दस्यानित्यत्वादिके धर्मे साध्ये प्रमेयत्वादिको धर्मः सपक्ष-विपक्षयोः। सर्वत्रैकदेशे वा वर्तमानस्तथास्यैव रूपस्य संदेहे ऽप्यनैकान्तिक एव। यथा सर्वज्ञः कश्चिद्विवक्षितः पुरुषो रागादिमान् वेति साध्ये वक्तृत्वादिको धर्मः संदिग्धविपक्षव्यावृत्तिकः। सर्वत्रैकदेशे वा सर्वज्ञो वक्ता नोपलभ्यत इति। एवंप्रकारस्यानुपलम्भस्या-

दृश्यात्मविषयत्वेन संदेहे हेतुत्वात्। असर्वज्ञ-विपर्ययाद्वक्तृत्वादेर्व्यावृत्तिः संदिग्धा। वक्तृत्व-सर्वज्ञत्वयोर्विरोधाभावाच्च। यः सर्वज्ञः स वक्ता न भवतीत्यदर्शनेऽपि व्यतिरेको न सिध्यति। संदेहाद्विविधो हि पदार्थानां विरोधः। अविकलकारणस्य भवतोऽन्यभावः। अभावाद्विरोधगतिः। शीतोष्णस्पर्शवत्। परस्परपरिहारस्थितलक्षणतया वा भाववत्। स च द्विविधोऽपि विरोधो वक्तृत्व-सर्वज्ञत्वयोर्न संभवति। न चाविरुद्धविधेरनुपलब्ध्यावप्यभावगतिः। रागादीनां वचनादेश्च कार्यकारणभावासिद्धेः। अर्थान्तरस्य वा कारणस्य निवृत्तौ न वचनादेर्निवृत्तिरिति संदिग्धव्यतिरेको ऽनैकान्तिको वचनादिः। द्वयो रूपयोर्विपर्ययसिद्धौ विरुद्धः। कयोर्द्वयोः सपक्षे सत्त्वस्य सपक्षे चासत्त्वस्य यथा कृतकत्वं प्रयत्नानन्तरीयकत्वं च नित्यत्वे साध्ये विरुद्धो हेत्वाभासः। अनयोः सपक्षे ऽसत्त्वमसपक्षे च सत्त्वमिति विपर्ययसिद्धिः। एतौ च साध्यविपर्ययसाधनाद्विरुद्धौ। तच्च तृतीयोऽपीष्टविघातकृद्विरुद्धः। यथा परार्थाश्चक्षुरादयः संघातत्वाच्छयनाशनाद्यङ्गवदिति। तदिष्टासंहतपारार्थ्यविपर्ययसाधनाद्विरुद्धः स इह कस्मान्नोक्तः। अनयोरेवान्तर्भावात्। न

द्वयमाभ्यां साध्यविपर्ययसाधनत्वेन भिद्यते। न हीष्टोक्तयोः साध्यत्वेन कश्चिद्विशेष इति द्वयो रूपयोरेकस्यासिद्धावपरस्य च संदेहे ऽनैकान्तिकः। यथा वीतरागः कश्चित्सर्वज्ञो वा वक्तृत्वादिति। व्यतिरेको ऽप्यसिद्धः। संदिग्धो ऽन्वयः। सर्वज्ञ-वीतरागयोर्विप्रकर्षाद्वचनादेस्तच्च सत्त्वमसत्त्वं वा संदिग्धमनयोरेव द्वयो रूपयो संदेहे ऽनैकान्तिकः। सात्मकं जीवच्छरीरं प्राणादिमत्त्वादिति। न हि सात्मकनिरात्मकाभ्यामन्यो राशिरस्ति। यच्च प्राणादिर्वर्तते। आत्मनो वृत्तिव्यवच्छेदाभ्यां सर्वसंग्रहात्। नाप्यनयोरेकच्च वृत्तिनिश्चयः। सात्मकत्वेन निरात्मकत्वेन वा प्रसिद्धे प्राणादेरसिद्धिः। तस्माज्जीवच्छरीरसंबन्धी प्राणादिः सात्मकादनात्मकाच्च सर्वस्माद्व्यावृत्तत्वेनासिद्धेः। ताभ्यां न व्यतिरिच्यते न तच्चाऽन्वेति। एकात्मन्यप्यसिद्धेः। नापि सात्मकान्निरात्मकाच्च तस्यान्वयव्यतिरेकयोरभावनिश्चयः। एकाभावनिश्चयस्यापराभावनान्तरीयकत्वात्। अन्वयव्यतिरेकयोरन्योन्यव्यवच्छेदरूपत्वात्। अत एवान्वयव्यतिरेकयोः संदेहादनैकान्तिकः साध्येतरयोरतो निश्चयाभावात्। एवं त्रयाणां रूपाणामेकैकस्य द्वयोर्द्वयोर्वा रूपयोरसिद्धौ संदेहे च यथा-

योगमसिद्धविरुद्धानैकान्तिकास्त्रयो हेत्वाभासाः । विरुद्धाव्यभिचार्यपि संशयहेतुरुक्तः । स इह कस्मान्नोक्तो ऽनुमानविषये ऽसंभवात् । न हि संभवो ऽस्ति कार्यस्वभावयोरुक्तलक्षणयोरनुपलम्भस्य च विरुद्धतायाः । न चान्यो ऽव्यभिचारी । तस्मादवस्तुदर्शनबलप्रवृत्तमागमाश्रयमनुमानमाश्रित्य तदर्थविचारेषु विरुद्धाव्यभिचारी साधनदोष उक्तः । शास्त्रकाराणामर्थेषु भ्रान्त्या विपरीतस्य स्वभावोपसंहारसंभवात् । न ह्यस्य संभवो यथावस्थितवस्तुस्थितिष्ठात्मकार्येषूपलम्भेषु । तचोदाहरणं यत्सर्वदेशावस्थितैः स्वसंबन्धिभिः संबध्यते तत्सर्वगतं यथाकाशमभिसंबध्यते सर्वदेशावस्थितैः स्वसंबन्धिभिर्युगपत्सामान्यमिति । तत्संबन्धिस्वभावमाचानुबन्धिनी तद्देशसंनिहितस्वभावता। न हि यो यच नास्ति स तद्देशमात्मना व्याप्नोतीति स्वभावहेतुप्रयोगः । द्वितीयो ऽपि प्रयोगो यदुपलब्धिलक्षणप्राप्तं सन्नोपलभ्यते न तत्तचास्ति । तद्यथा । क्वचिदविद्यमानो घटो नोपलभ्यते चोपलब्धिलक्षणप्राप्तं सामान्यं व्यक्त्यन्तरालेष्विति । अयमनुपलम्भप्रयोगः स्वभावश्च परस्परविरुद्धार्थसाधनादेकच संशयं जनयतः । चिरूपो हेतुरुक्तः । तावतैवार्थप्रतीतिरिति न पृथग्दृष्टान्तो नाम

साधनावयवः कश्चित्। तेनास्य लक्षणं पृथगुच्यते गतार्थत्वात्। हेतोः सपक्ष एव सत्त्वमसपक्षाच्च सर्वतो व्यावृत्तरूपमुक्तमभेदेन पुनर्विशेषेण कार्यस्वभावयोर्जन्म तन्नाचानुबन्धौ दर्शनीयावुक्तौ। तच्च दर्शयता यच्च धूमस्तचाग्निरसत्यग्नौ न क्वचिद्धूमो यथा महानसेतरयोः। यच्च कृतकत्वं तचानित्यत्वमनित्यत्वाभावे कृतकत्वासंभवो यथा घटाकाशयोरिति दर्शनीयम्। न ह्यन्यथा सपक्षविपक्षयोः सदसत्त्वे यथोक्तप्रकारे शक्ये दर्शयितुम्। तत्कार्यतानियमः कार्यलिङ्गस्य स्वभावलिङ्गस्य च स्वभावेन व्याप्तिः। अस्मिंश्चार्थे दर्शिते दर्शित एव दृष्टान्तो भवति। एतावन्मात्ररूपत्वात्तस्येति। एतेनैव दृष्टान्तदोषा अपि निरस्ता भवन्ति। यथा नित्यः शब्दो ऽमूर्तत्वात्। कर्मवत्परमाणुवद्घटवदिति। साध्यसाधनधर्मोभयविकलास्तथा संदिग्धसाध्यधर्मादयश्च यथा रागादिमानयं वचनाद्रथ्यापुरुषवत्। मरणधर्मोऽयं पुरुषो रागादिमत्त्वाद्रथ्यापुरुषवत्। अमर्वज्ञोऽयं रागादिमत्त्वाद्रथ्यापुरुषवदिति। अनन्वयो ऽप्रदर्शितान्वयश्च यथा यो वक्ता स रागादिमानिष्टपुरुषवत्। अनित्यः शब्दः कृतकत्वाद्घटवदिति। तथा विपरीतान्वयो यदनित्यं तत्कृतकमिति साधर्म्येण

वैधर्म्येणापि परमाणुवत्कर्मवदाकाशवदिति साध्याद्य-
व्यतिरेकिणः । तथा संदिग्धसाध्यव्यतिरेकादयो यथा
सर्वज्ञाः कपिलादयोऽनाप्ता वा । अविद्यमानसर्वज्ञ-
ताप्ततालिङ्गभूतप्रमाणातिशयशासनत्वादिति । अत्र
वैधर्म्योदाहरणं यः सर्वज्ञ आप्तो वा स ज्योतिर्ज्ञाना-
दिकमुपदिष्टवान् । तद्यथा ऋषभवर्धमानादिरिति ।
तत्रासर्वज्ञातानाप्ततयोः साध्यधर्मयोः संदिग्धो व्यति-
रेकः । संदिग्धसाधनव्यतिरेको यथा न त्रयीविदा
ब्राह्मणेन ग्राह्यवचनः कश्चित्पुरुषो रागादिमत्त्वा-
दिति । अत्र वैधर्म्योदाहरणं ये ग्राह्यवचना न ते
रागादिमन्तस्तद्यथा गौतमादयो धर्मशास्त्राणां प्रणे-
तार इति । गौतमादिभ्यो रागादिमत्त्वस्य साधन-
धर्मस्य व्यावृत्तिः । संदिग्धासंदिग्धोभयव्यतिरेको
यथा । अवीतरागाः कपिलादयः परिग्रहाग्रहयोगा-
दिति । अत्र वैधर्म्येणोदाहरणं यो वीतरागो न तस्य
परिग्रहाग्रहो यथा ऋषभादेरिति । ऋषभादेरवीत-
रागत्वपरिग्रहाग्रहयोगयोः साध्यसाधनधर्मयोः
संदिग्धो व्यतिरेकः । अव्यतिरेको यथा अवीतरागो
वक्तृत्वात् । वैधर्म्योदाहरणं यत्र वीतरागत्वं नास्ति
स वक्ता । यथोपलखण्ड इति । यद्यप्युपलखण्डादुभयं

व्यावृत्तया सर्वो वीतरागो न वक्तेति व्याख्या व्यतिरेकासिद्धेरव्यतिरेकः। अप्रदर्शितव्यतिरेको यथा अनित्यः शब्दः कृतकत्वादाकाशवदिति। वैधर्म्येणापि विपरीतव्यतिरेको यथा यदकृतकं तन्नित्यं भवतीति। न ह्येभिर्दृष्टान्ताभासैर्हेतोः सामान्यलक्षणं सपक्ष एव सत्त्वं विपक्षे च सर्वत्रासत्त्वमेव निश्चयेन शक्यं दर्शयितुं विशेषलक्षणं वा। तदर्थापत्त्यैषां निरासो वेदितव्यः। दूषणा न्यूनतायुक्तिः। ये पूर्वं न्यूनतादयः साधनदोषा उक्तास्तेषामुद्भावनं दूषणं तेन परेष्टार्थसिद्धिप्रतिबन्धात्। दूषणाभासास्तु जातयः। अनुभूतदोषोद्भावनानि जात्युत्तराणीति।

इति तृतीयः परिच्छेदः समाप्तः।

न्यायबिन्दुः समाप्तः॥

CRITICAL NOTE.

p. 1, B prefixes ओं नम॰ सर्वज्ञाय. l 5. B सम्यग्ज्ञानपूर्विकेत्यादिना l. 6, B omits चेति. l. 7, स्वाभिधेय॰, B अभिधेय॰. l. 8, अतस्तन्न निरूप्यते ; this was printed from conjecture. A omitting न , B has the न. l. 8, B अभिधेये तु निःप्रयोजने तत्प्रतिपत्तये. l. 12, तत्प्रतिपत्त्यर्थ, B तत्प्रतिपत्तये

p 2. l 6, उपायो व्युत्पादनस्य, B उपयोग्युत्पादनस्य l 7. B वाच्यं. l 8, B सामर्थ्ये.—एक तु वदत् ; these letters are very indistinct in A, B confirms the conjectural text. l 10, read प्रयोजनपद with B. l 12, B ततश्च. l 14, B व्युत्पाद्यमानानां. l. 16, B omits इद. l. 20, B omits अपि॰ l 23, write ०प्रदेश.

p. 3, l 2, put the stop after प्रेक्षावतां l. 3, अनर्थसंशयः, B adds अपि. l. 4, B आख्यातृणा.—B क्रीडाद्यर्थं. l. 9, B ज्वरच्छत्तक॰ l. 10, अतो वा प्रकरणात्, this was printed from conjecture, A seems to read अतोऽन्यप्रकरणात्, B has भावाप्रकरणात् (sic). l. 11, सभाव्येत , B adds the numeral 5 ; so also with the preceding 4 cases. l. 13, अभिधेयादिषु ; B adds त्तक्तेषु (sic), apparently for उक्तेषु.—B omits तु. l. 15, B अभिसंवादसंज्ञानं (sic) l. 17, प्रदर्शितमर्थं, B prefixes स्वय. l, 21, विज्ञानं, B ज्ञानं. l. 21, B omits च.

p. 4, l. 1, अत एव: B adds च. l. 3, तचैवार्थे, B तचैव चार्थे. l. 5, प्रवृत्तिविषयो०, B प्रवृत्तिविषय'. l 9, लिङ्गसंबन्ध, read लिङ्ग-संबद्धं with B; A लिगसववं (sic). l. 10, नियतस्य, B नियत०. l. 11, आदर्शयत्, B उपदर्शयत्. l. 12, प्रदर्शितः, B दर्शितः l. 18, B writes अत्यतविपरीतभावाभादानि (sic). l. 19, B omits, अर्थक्रियासमर्थ. l 20, तदेव, B adds तेन l. 22, अर्थाधिगमात्मकं, B writes अर्थाविजियासमर्थवस्वधिगमात्मकत्वं.

p. 5, l. 3, ०संसर्गः, write संसर्गैः; A संसर्ग्रः (sic), B संसर्गेः (sic) —अन्याकारवदस्तु०, B अन्याकारवस्तु०. l. 5, कुम्बिका०, (A कुंविका), B., l. 9, ननु, B adds च. l. 13, तदेव, B adds तेन. l. 16, कारणशब्दोपादाने was printed from conjecture, A having ०शब्दापादाने; it is now confirmed by B. l. 17, मन्यते, B writes गम्यत (sic). l. 18, तयो, B adds मध्ये. l. 21, अर्थक्रियानिर्भासे, B अर्थक्रियानिर्भासात्. l. 22, प्रवृत्तिः, read प्राप्तिः with B.

p. 6, l. 2, ज्ञाने, B ज्ञाते.—अर्थे ज्ञाते, read अर्थिन· with B; the reading in A cannot be made out. l. 7, उपेक्षणीयः; B adds अपि. l. 11, B omits इति l. 13, वृत्तो न; B adds च. l. 15, ०निबन्धनैवेति; B omits एव. l. 21, ०सिद्धि०, B ०सिद्धेः. l. 22, यावद्भूयात्, B writes यावद्भूया (sic) या काचित्पुरुष०.—सम्यग्ज्ञान०, B सा सम्यग्ज्ञान०.

p. 7, l. 1, B omits सा. l. 3, तद्युत्पाद्यते, B तत्सम्यग्ज्ञान द्युत्पाद्यते. l. 6, B omits द्युत्पाद्यते. l. 8, द्वौ विधौ, B द्वे विधे. l. 9, द्वे, B adds एव. l. 10, व्यक्तिभेदे, B भेदे. l. 11, सकल-व्यक्त्यनुयायि was printed from conjecture, the fourth and fifth aksharas having been destroyed; it is con-

firmed by B. l. 13, अप्रर्शिते; B adds तु. l. 15, द्विविधं: read द्वैविध्य with A and B. l. 19, अलक्षाश्रितत्वेन was printed from conjecture, A having अलक्षाश्रितत्वेन, it is confirmed by B. l. 20, लक्ष्यते, B लभ्यते. l 22. ०ज्ञान, B ०विज्ञान.

p. 8, l. 7, ग्रहीते, B ग्रहीत०. l. 13, एकदेशः, B एकदेश-निर्देशः. l. 14, प्रत्यक्षं, B प्रत्यक्षत्वं.—B omits च l. 15, तत्कल्पनापोढाभ्रान्तत्व०, B तत्कल्पनापोढभ्रान्तत्व०. l. 19, सिद्ध, B प्रसिद्धं.—B writes तदनकल्पना०. l. 22, अर्थक्रियाक्षमं, B adds च.

p. 9, l. 1, ०धर्मात्मकं, write वर्णात्मक with A and B. l. 2, निराकरणार्थ, B निरासार्थ. cf. below l. 13.—तु, B च. l. 14, विप्रतिपत्तिनिरासार्थ, B adds (विप्रपत्तिनिरासार्थ) तथाऽभ्रान्तग्रहणेनाप्यनुमाने निवर्त्तिते कल्पनापोढग्रहणं विप्रतिपत्तिनिरासार्थम्. l. 15, स्वप्रतिभासे ऽनर्थे ऽध्यवसायेन, B स्वप्रतिभासो (? स्वप्रतिभासे) र्थे र्थाध्यावसायेन

p. 10, l. 2, अभिलाप्यते, B अभिलप्यते, A's reading is also corrected to this.—अभिलापेन संसर्गः, B adds अभिलाप-संसर्गः l. 4, ग्रहीलनं, write ग्रहीलनं with A and B.—अभिधेया-भिधानयोः, B अभिधानाभिधेययोः. l 5, संनिविष्टौ, B निविष्टौ. l. 6, अभिधेयाभासः, B अभिधेयाकारभासः l. 7, अभिलापेन, B अभिलाप०. l. 8, B omits भवति l. 10, ०संस्रष्टाभासा, B ०स-स्रष्टप्रभासा (? ०संस्रष्टप्रतिभासा) l. 11, संगृह्येत, B सगृह्यते. l. 12, ०आभासा. B प्रतिभासा.—तदर्हजातस्य, B adds बालकस्य. l. 15, योग्यता०, B योग्यत्व०. l. 16, ०प्रतिभासत्वं, B प्रतिभासत्वे.

p. 11, l. 5, संनिहितमात्र०, B संनिहितार्थमात्र०. l. 12,

श्रोत्रज्ञानं, B श्रोत्रविज्ञानं.—शब्दस्वलक्षणग्राहि, B omits शब्द.—शब्दस्वलक्षण, B शब्दे स्वलक्षणं च. l. 18, ०ज्ञान, B ०विज्ञानं as in l, 12. l. 22, परेण, B adds सूत्रेण (MS. मूत्रेण)

p. 12, l. 3, विभ्रम०, B भ्रम०. l. 4, मन्द, B adds हि —भ्रम्यमाणे, B भ्राम्यमाणे l. 5, विभ्रम०, A भ्रम०. l. 9, ज्वलित०, B ज्वलितरूप —B आध्यात्मिकं भ्रातिकारणं. l 11, इन्द्रियभ्रान्त्ययोगात्, B omits इन्द्रिय l. 14, B omits हि —अलातादौ, B अलाते l. 17, तैः, B एतैः —तथाविधं, B तत्तथाविधं ; तत् is also supplied in margin of A. l. 20, निराकरणार्थं, B ०निरासार्थ l. 22, मानसप्रत्यक्षे, B मानसे च प्रत्यक्षे.

p 13, l. 2, ०ज्ञानस्य, B ०विज्ञानस्य.—अन्तरमस्येति, B adds अनन्तरः. l. 9, विषयविज्ञानाभ्या हि मनोविज्ञानं, B विषयविज्ञानाभ्यां मनोविज्ञानाभ्या मनोविज्ञानं &c.— तदनयोर्न परस्परसहकारित्वं, B तदनयोः परस्परस्य सहकारित्व. l. 12, B omits कृत.—B omits second असौ. l 15, प्रत्यक्षमित्युक्त, A प्रत्युक्त, corrected into प्रत्यक्षमित्युक्त.—B omits इति. l. 22, विज्ञानस्य, B ज्ञानस्य

p. 14, l 4, B has the pratika सर्वचित्तेत्तादि. l. 11, वक्तुं शक्य, B शक्यं वक्तु l. 12, सातरूपेण, B सातानुरूपेण l. 13, सातादिरूपः, B सतरूपः.—स्यात्, B adds तदा l. 17, ज्ञानानुभव —तच्च ज्ञानरूप वेदन B तत्वज्ञानस्वरूपवेदन l. 21, भावनायाः, B भावनयो (sic).— आभासस्य, B अवभासस्य

p. 15, l. 1, ०गतिः, B ०गमन l 12, B omits अर्थ. l. 13, अस्फुटाभत्वात्, B adds एव च l 16, परिसमाप्यर्थः, B परिसमाप्तिवचन. l 18, चतुर्विध०, B चतुर्विधस्य l. 21, प्रमाणस्य विषयः, B विषयः प्रमाणस्य

p 16, l. 4, अनर्थाध्यवसायेन, read अर्थाध्यवसायेन with B l 12, ज्ञानस्य, B ज्ञान० l 13, सन्, read स with B. l. 20, स च, B स एव च,

p 17, l. 11. B has the pratika अन्यदित्यादि.—तत्सामान्यलक्षणं, B तस्मात्सामान्यलक्षण. l 18. the clause ततस्तत्सामान्यलक्षणं is omitted in A, but is supplied in the margin ; B ततस्तस्मात्सामान्यलक्षण

p. 18, l. 9. अर्थात्, B प्राधादर्थात् l. 13, अर्थदर्शन० B अर्थप्रदर्शन० l 16, B repeats यद् before सादृश्य l. 17. ज्ञान, B विज्ञान. l. 18. तच्च सादृश्य, B तच्च सारूप्य सादृश्यं

p. 19, l. 2, तत्सिद्धेः. B तत सिद्धेः. l. 5, विज्ञान, B ज्ञान l. 12, ज्ञानस्य, B adds इति.

p 20, l. 3. ०रूपत्वं, read रूप with B. l. 5, अवस्थाप्यमाने, B व्यवस्थाप्यमाने. l. 8. दर्शनं, B अदर्शनं (०त्वेनादर्शनं) l. 9. B omits तु l. 11, अवस्यन्ति, B अध्यवस्यन्ति. The colophon in B is इति आचार्यधर्मोत्तरविरचितायां न्यायबिन्दुटीकायां प्रत्यक्षपरिच्छेद, प्रथमः, A adds to colophon the words मङ्गलमस्तु.

p. 21, l. व्याख्यातु, B व्याख्यातुकाम·. l. 7, ०निर्देशाङ्गमेव, A. निर्देशार्थमेव.

p 22, l. 2, B has the pratika प्रमाणफलमिति l. 3, प्रत्यक्षवत्प्रत्यक्ष इव, MSS प्रत्यक्ष इव प्रत्यक्षवत्; it was perhaps unnecessary to make the correction l. 8, B omits अस्य. l. 14, A omits तद् l. 20, A omits अर्थ, it is supplied in margin.

p. 23, l. 2. निरस्तं, B निबिद्धं. l. 3. पक्षैकदेशासिद्धः, B adds निरस्तो हेतुः. l. 7, कुर्यात्, B ब्रूयात् l. 11, साधारणानैकान्तिक',

B adds अनित्यः शब्दः प्रमेयत्वात् l. 12, सपक्षव्यापिसत्ताकस्य so B; A writes सपक्षऽव्यापिसत्ताकस्य with what looks like a correction of सपक्ष into सपक्षा l 14. तु, A हि. l. 15. निश्चितवचनेन, A निश्चयवचनेन. l 19. निरासः, B adds नित्यः शब्दः कृतकत्वात् खवत्, compare l. 11, above various reading. l. 22, असत्त्ववचनात्, B असत्त्वशब्दात्.

p. 24, l. 2, B omits अपि. l 6, तदुच्यते, B उच्यते. l. 7, द्वयोरप्युपादानम्, B omits अपि. l. 8, अनियमे, B अनियते l. 9, स हेतुरिति, A omits स, it is supplied in the margin. l. 13, प्रथोक्तव्यः, A कर्तव्यः. l. 22, स सपक्ष; A omits स.

p 25, l 1, सशब्दादेशः, A शब्दादेशः corrected in the margin to सशब्दादेशः —सामान्यं, B साम्य l. 8, तेन च, B omits च —तद्विरुद्धत्वं, B च विरुद्धत्व

p 26, l. 1, उपलब्धिर्ज्ञानम्। तस्या लक्षणं जनिका सामग्री, A उपलब्धिर्ज्ञान तस्य लक्षणं। जनिका सामग्री. l. 10, कथ्यते, B गम्यते l. 13, दृश्यं, B दृश्यत्व l 14, घटविविक्त०, B घटादिविविक्त०. l. 16, वस्तु न निश्चितं तज्ज्ञान च, B वस्तु तज्ज्ञानं चा (sic) न निश्चतं. l. 19, ततो दृश्यघटरहितः, B तादृशघटरहितः.

p. 27, l. 13, अतश्च संनिहिताय द्रष्टुं प्रवृत्तः सः, so A, writing आतश्च for अतश्च, and संनिहिता, corrected into सनिहिताय in the margin; B अतश्च सन्निहिता यद्दृष्टुं प्रवृत्ताः (sic) स. l. 17, शक्यो द्रष्टुं शक्यो; B omits the numbers in this para. l. 19, स्वभावमुदाहर्तुमाह, B adds स्वभावेत्यादि. l. 20, साध्यस्यैव स्वभावः, B साध्यस्य भावः.

p. 18, l. 1, A omits स l 4, शिंशप०, A writes सिंसप in

the first place and शिंशपा in the second; so also in the next line प्रचुरसिंसपे, but अविदितशिंशपा०. l. 6, यदा, B यथा. —उपादर्श्य, B उपदर्श्य. l. 7, वृक्षव्यवहारनिमित्त, B वृक्षव्यवहारस्य निमित्त. l 8, शिंशपा पश्यति, B पश्यति शिंशपा.—अवृक्षं, A अवृक्षत्व. l 9, B puts the stop after स भूत. l. 12. अग्निरिति, A वह्निरिति. l. 13, प्रत्यक्षानुपलम्भनिबन्धन, B प्रत्यक्षानुपलभ निबधन. l. 15, अयुक्त, A युक्तं. l. 17, अत्रेति एष, B अत्रेति अत्र. l. 18, B omits साधनौ l. 19, B omits the first अभावः.

p. 29, l. 1, परस्पर०, B परस्पर. l 3, हेतवः, B adds अपि l. 8, कारणे, B कारण०. l. 15, ०अभावः, B ०अभावात्. l. 16, अप्रतिबद्ध०, B अप्रतिबध० l 18, न प्रतिबद्धाः; B omits न. — अप्रतिबद्ध०, B अप्रतिबंध०. l. 23, अविनाभावनिश्चयः, B अविनाभावित्वनिश्चयः.

p. 30, l 3, क्व B कः. l. 13, लिङ्गस्येत्याह, B लिंगस्य न वस्तुन इत्याह. l. 14, B omits अर्थ आत्मा. l 15, तादात्म्यं, B adds तत्स्वभावत्वं. l 16, तच, B तत्तच l. 19, निश्चयापेक्ष एव, B निश्चयापेक्षया एव l. 20, ०अपेक्षः, B अपेक्षया. l. 23, लिङ्गस्य, B adds स्यात्.

p 32, l 3, एकैकस्य, B एकस्य l. 6, स्वभावविशेषविप्रकृष्टाः, B स्वभावविशेषरहिताः. l. 14, अमूढेति, B अमूढेत्यादि. l 17, एकज्ञानससर्गिणि, B adds भूतले. l. 18, दृश्यतया, B दृश्यमानतया. l 19, ०ससर्गी, B ०ससर्गात्. l. 20, समग्र०, B समय०.

p 33, l. 6, B omits तु. l. 13, B omits न l. 20, A and B omit first न, it is supplied in the margin in A.

p. 34, l. 2, B omits इति.—स्फुट, A स्फुटः. l 5, अनुपलभ्यमानत्वात्, A अनुपलभ्यमानत्वात्. l. 8, निःशृङ्गगमनागमन०, B निःशृंगगमागम०. l. 10, तदेवमेतस्य, B तदेव तस्य.—०व्यवहारस्य, A

व्यवहार०. l. 18, A omits अभाव. l. 19, अक्षत करोति. l. 21, प्रवर्तिनी, so B A apparently reads प्रवर्त्तनमुपल०, which has been corrected into प्रवर्त्तन्युपल० (sic).

p. 35, l 5, एकादश प्रकारा अस्या इत्येकादशप्रकारा, B एकादश-प्रकारा एकादश प्रकारा अस्य इत्येकादशप्रकारा l. 9, ०भेदात्, A ०भेद० l. 21, धवलगृह०, B धवलगृहस्य.

p 36, l. 3, B omits च l. 4, A तदृक्षांगणदेशेन भ (sic) वह्निना, B तदृक्षागणस्थेन च. — तद्देशः, B seems to write तादृशः. l. 7, दृश्यमानादृश्यमानाकाशदेशावयव०, A दृश्यमानाकारी (sic) देशावयवः. l. 17, शिंशपात्वस्य, B शिंशपात्व० l. 21, न यः, B यो न

p. 37, l. 2, तादृशे, A तादृश०. l 4, प्रतिषेध्यस्य, A प्रतिषेध्य०. —B omits यथेति l. 5, A omits इति, writing, however, न प्रीतस्पर्श (sic) l 7, दृश्ये, A दृश्यो, B दृश्ये तु l 8, दूरस्थत्वात्, B दूरत्वात्. l. 13, विरुद्ध०, A विरोध०. l. 14, तत्र, A यत्र. l. 16, ०निवृत्तिमनुमिमीते, A ०निवृत्तिरनुमीयते l. 17, सर्वोपवरक०, B. सर्वोपवरक० l 20, भवतीति, B omits इति.

p. 38, l. 1, जननात्, B जनकात्. l. 2, विनश्वरः। तस्य, A विनश्व-रस्य. l. 3, नामाध्रुव०, B नाध्रुव० l. 4, रज्जनादि०, B रजकादि०. l. 7, B omits च. l. 10, दृश्यतया, A तया l. 11, यत एवं, A य एव. l 13, दृश्यमानात्मत्व, B दृश्यमानात्मकत्व. l. 15, यदि दृश्यघटात्मत्व०, B यदैव दृश्यघटात्मकत्व०.—दृश्यात्मत्वम्, B दृश्यात्मत्वम्. l. 16, यद्यय, B adds घटः l. 20, प्रतिषेधः. B निषेधः.

p 39, l. 3, न तानि सन्तीति, B तानि न संती (sic). l. 10, वह्नेः, B अग्नेः, l 13, तथा, B तथा च. l. 14, B omits च. l. 17, विशिष्ट०, B विशिष्टे. l. 20, दृश्य न भवति, B अदृश्यं भवति.

p 40, l 1, B omits तच. —दृश्यः, B दृश्यते. l. 2, प्रतिषेध्यते, B प्रतिषिध्यते.—ज्वलितः, B प्रज्वलित· l 3, इन्धन, B वन. l 8. विशिष्यन्ते, B विशेष्यंते, so also in l. 10.—B omits तत्. l. 18, A ०भाव (sic), B भाव. l 21, देश्र०, B प्रदेश्र० l 23, B omits रोमहर्षादिविशेषयुक्त.

p 41, l. 1, ०विशेषयुक्त०, B ०विशेषगुणयुक्त०. l. 2, रोमहर्षादि०, B रोमहर्ष० l 5, तच, A यच. l. 7, तस्मिन्देशे, B तद्देशे. l 8. धूममात्रेण तु, A omits तु. l 10, B omits विशेष, A omits न l. 13, ०प्रयोगान्ताः, A प्रयोक्तान (sic), B प्रकाता l. 16, सत्याह, A त्याह (sic).—B omits सति, cf. next line. l 19, दश्रग्रहणात्तदाहरण०, B दश्रग्रहणोदाहरण०.

p 42, l 3, अर्थान्तरविधीत्यादि, MSS. अर्थातरविधीति —प्रतिषेध्यादर्थादर्थान्तरस्य, B प्रतिषेध्यादर्थातरस्य. l. 11, प्रयोगभेदेन भेदः. l. 12, शब्दश्च, B शब्दस्तु l. 13, ०घटिताना B परिघटिताना. l. 16, B प्रयोगभेदादेव भेदः, B omits, इति शब्दः l. 20, प्रतिषेधः, B निषेधः.

p. 43, l 1, तस्य च व्यवहारः, B तद्व्यवहारश्च. l. 4, अनुपलब्धौ, B adds सत्यां. l. 5, दृश्यानामेव B दृश्यमानानामेव.—B omits स l 22, M A the words एव ये, to and including अभावेन, l 23, are supplied in the margin

p 44, l 3, विरोधः, B adds च. l. 10, ०प्रतीतौ प्रतीतः, B omits प्रतीतः. l. 14, तथा च सति, B तेषा च सति. l 17, संप्रति नास्ति, B सप्रतितनौ.

p. 45, अदृश्यानुपलब्धि', B adds तु —B omits च. l. 9, B omits सा.—लक्षणा, A writes लक्षणा । न ज्ञान० l 17, न तु, B न च.

p 46, l 3, तल्लिङ्गं, A लिङ्ग. l. 6, A omits च. l. 9, ०लम्बना,

B ०लम्बना. l 12, औपचारिक, A औपचारक l. 17, प्रतिपादितं, B adds भवति. l 18, व्याख्येयं, B च आख्येय.

p. 47, l. 3. B omits तद्विविधमिति. l. 8, A साधर्म्यवद्वै विध्यवच्चेति l 9, धर्मोऽस्य, A writes यच्च (sic) for यस्य; B धर्मोस्य l 12. B omits a line here, writing साधर्म्यमभिधेय यस्य तु वैधर्म्यमभिधेय l 14, A writes शब्द०। त्यत्र. l. 20. B अर्थः प्रयोजन यत्प्रयोजनं प्रकाशयितव्यं वस्तु उद्दिश्य. l. 21, A प्रकाशयितव्यवस्तु. —अनयोः, B नानयो

p. 48, l. 15, उदाहरन्, B उदाहरणमुदाहर्तु l. 17, B omits सिद्ध०. l. 18, ०योग्यत्वस्य, B योग्यत्वे l 21, व्याप्तिः, A व्याप्ति०. l. 22, च, A वा

p. 49, l. 6, ०मात्र०, B ०मात्रः.

p. 50, l. 1, प्रयोगः सविशेषणं, B प्रयोगस्य विशेषणं. l. 3, यस्य, B स यस्य.—A repeats the pratika यदुत्पत्तिमदिति after उत्पत्तिमत्. l. 4, ०विधेः, B ०विधिः. l. 11, A अनियतत्वे.

p 51, l 4, न, B adds च —विशेषणं, B विशेषणपदं. l 8, B omits च l. 9, प्रत्ययभेदभेदिशब्दे B. प्रत्ययभेदशब्दे. l. 16, B omits second साध्यते. l 19, ०प्रयोगः. B ०योगः l. 20, एवमर्थ, B एतदर्थं.

p. 52, l. 2, गमकत्वात्, A गमत्वात्. l. 6, B omits इति — B omits साध्यधर्मस्य. l. 12, B omits हि, l. 15, स्मृतमर्थ, B स्मृतमर्थाय.

p. 53, l. 6, इत्त, B एव. l. 8, ०अनुबन्धस्य स्वभावः, B ०अनुबंधवाच्च भावः l. 11, साध्यसाधनयोः, B साध्यसाधन०. l. 18, अनुबन्ध्येव, B अनुबधे च. l. 19, A स तन्निष्पत्तावनिष्पन्नस्य साधन०।

p. 54, l. 10, स्वभावः। स एव च साध्यः। तथा च सिद्धसाधन०, B यः

स्वभावः स एव च साध्यस्वभावः सिद्धसाधन० l 11, स्वभावहेतवः. B स्वभावे स्वभावहेतवः. l. 13, अग्नेः, B अग्नि०. l. 18, कार्यहेतौ, B कार्यहेतोः. l. 19, कार्यकारणत्व०, B कार्यकारणभाव०.

p. 55, l. 6, A omits हेतुरपि l. 9, नियतः, B नियमः. l 12, नियतः, B नियमः. l. 16, निवृत्तः, B निवर्त्तते l 17, वैधर्म्यप्रयोग, B वैधर्म्यवत्प्रयोगम्.— l. 20, साधर्म्यवति व्यतिरेकः, B साधर्म्यव्यतिरेकः.

p. 56, l 1, B omits इति l 2, B तथाप्यन्वयवचनसामर्थ्यात्. l. 3, A व्यतिरेक०. l. 4, B बुद्ध्यवसितस्य. l. 10, B omits ते. l. 13, A साध्यसत्वं. l. 19, B सर्वस्य प्रतिबद्धस्य.

p. 57, l. 4, B omits तत् l. 5, B तेनाच्छिन्नं प्रतिबन्धोपदर्शनं तदेवान्वयवचनं. l 9, निवर्त्यनिवर्तक०, B निवर्त्यनिवर्तकयो:. l. 11, अन्वये, B adds अपि. l. 14, A इतिकरणो हेतौ. l 17, B omits तु. l. 19, उक्तेन, B युक्तेन

p. 58, l. 1, A व्याप्तिप्रतिपद्यमानेन. l. 3, A omits प्रतीतेः. l. 5, B is corrupt, or has a lacuna from प्रयोगयोः to घट इति भवति. l. 9. यदुपलब्धिलक्षणप्राप्तमिति, B यदुपलब्धिलक्षणप्राप्त सन्नोपलभ्यत इति.

p 59, l. 5, A साध्यत्वेनैवास्वयमिति. l. 7, अर्थः, B अर्थो य. l 10, असाध्य केचित्साध्यं साध्यं चासाध्य प्रतिपन्नाः, B असाध्यं किंचित्साध्य साध्य चासाध्य केचित्प्रतिपन्ना. l. 15, तत्किमर्थं, B तत्कथ. l 19, B omits च l 20 उदाहरति, B adds यथेति.

p. 60, l. 5, तृतीयान्तस्यार्थे वर्तते, B तृतीयान्तस्यार्थेन युक्तः. l. 7, B omits एव. l. 10, B omits अपि. l. 13, B omits धर्मः. l. 15, साध्यत्व०, B साध्यत्वस्य.—चेद, B चैतत्.

p. 61, l. 2, B omits second तस्य l. 17, B omits तत. l. 18. B omits ते.

p 62, l 1, B omits अनुक्ता. l. 5, शयनासनादिषु, A शयनादिषु. l. 6, A, आत्मार्थत्वेन प्रसिद्धः (omitting अन्वयः). l. 7, B परार्थमात्रेण. l 9, B omits परस्य. l. 14, अनिराकृतः, A अनिकृतः. l. 16, प्रदर्शनाय, B प्रतिपादनाय. l. 19, न स पक्षः, B स न पक्षः.—प्रत्यक्षनिराकृतः, B omits प्रत्यक्ष.

p 63, l. 8, विकल्पविज्ञानविषयत्वेन, A विकल्पविज्ञानेन. l. 9, ०विकल्पज्ञानग्राह्य, A ज्ञानग्राह्य. l. 23, ब्रवीमिति वक्ति. B ब्रवीति वक्ति.

p 64, l 1, A writes तद्येतद्. l. 2, A असत्यानि. l. 5, तथा, A यथा. l. 8, आदर्शयता, A आदर्शयिता l 9, शाब्दस्य, B शब्दस्य. l. 10, B असन्तर्थो ग्राह्य, A असन् ग्राह्य. l 12, शाब्दप्रत्ययार्थस्य. A शब्दप्रत्ययार्थस्य.

p. 65, l 2, शब्दप्रयोगः, B omits the next two lines, going on to पूर्वक्रमेव ; the copyist's eye has wandered from the one शब्दप्रयोग to the other. l. 3, शब्दः, A writes टब्दः. l 6, एव , B adds च l. 9, अनन्तरोक्तक्रमेण, B अनन्तरोक्तेन क्रमेण. l 16, असाधनं, A adds the figure 2. l 17, वा, A adds the figure 4.—निराकृतः, A adds the figure 5.

p 66, l. 2 एतद्, तद्. l. 3, प्रतिरूपकं, B प्रतिरूप. l. 4, A writes विवक्ष. l. 11, कस्य, B कस्यैकस्य.—वा किं०, A वाक्यं. l. 17, अनित्यः, B नित्यः l 18, B writes द्वयोर्द्वयोरपि. l. 22, चायञ्च, B adds तत्र विज्ञान (sic) चक्षुरादि जयित (sic).

p. 67, l. 1, B writes कार्यान्तभूतं l. 2, B writes उच्यते. l 3, आयुरिह । तेषा, B आयुः । इह तेषा. l. 6, असंभवात्, B अभावात्. l. 10, विज्ञानसत्तया, A विज्ञानसत्ताया, so also in

next line. l. 11, ततः, A तत्र. l. 14, हेतुभूत. A writes हेतु-ज्ञात्तत (sic).

p. 68, l. 1, परार्थो हि, B परार्थादि. l. 5, प्रमाण, B प्रमाणं. l. 6, स्यात्, B adds तदा. l. 14, A writes बाष्पादिह्यमाना. l. 17, A writes गक.

p. 69, l. 1, A writes तदघात. l. 5, केकायितापातविभ्रमः, B केकायितापातनिकुंजे विभ्रमः. l. 6, अस्मात्, B अन्यस्मात्.

p. 70, l. 2, B omits नित्यत्व. l. 4, गृह्यते, B गृह्यते. l. 8, A writes विद्युदाकाशघटवत्. l. 9, नाकाशादौ, B omits what follows down to the second नाकाशादौ, by a copyist's error.

p 71, l. 4, संदिग्धा, B संदिग्ध०. l. 7, B omits च. l. 9, एवं-जातीयस्य, B एवंजातीयकस्य. l. 11, संशयहेतुः, B सदेहहेतुः (sic). l. 13, सर्वज्ञे, B सदिग्धे. l. 17, न स वक्ता, B स वक्ता न. l. 18, साधनाभावेन, B साधर्म्यभावेन. l. 20, सिध्यति, B adds इति. l. 22, ह्यौति । यस्मात्, B ह्यियस्मात् ।

p. 72, l. 18, आक्रामन्, B आक्रामयन्. l. 21, असामर्थ्ये, A writes असमर्थ्ये, B असमर्थे.

p. 73, l. 2, अन्धकारान्तरासमर्थः, B अन्धकारान्तराजननासमर्थः (correct अन्धकारान्तरजननासमर्थः). l. 3, असमर्थावस्था०, B असा-मर्थ्यावस्था०. l. 5, संतानयोः, A writes सतनयोः l. 12, तद्विवर्तिनः A तद्विवर्त्तिनः. l. 14, अन्धकाराक्रान्तायां, A writes ध्यंधकारायाक्रांतायां. l. 15, ०हेतुकृतं B ०हेतुत्वकृत l. 16, भवता, A B भवतः.

p. 74, l. 14, विरोधौ, B विरोधो —कः कस्य. l. 21, नित्यत्वे, A B नित्यत्व.

p. 75, l, परस्परपरिहारेण, B परस्परेण. l. 3, वस्तुतत्त्वं, A

writes स्तुतत्वं. l. 13, B omits प्रवृत्ति. l. 14, सद्भावस्थान०, B सद्भावस्थानं. l. 16, द्विविधः, A द्विरोधः.

p. 76, l. 2, विरोधाच्च, B omits च. l. 6, निवर्त्य०, A निर्वर्त्य०. l. 10, वचनादि०, B वचन०. l. 17, तस्मादसर्वज्ञत्वविपर्ययादिपक्षात् &c., B तस्मादसर्वज्ञत्वावीतरागत्वविपर्ययात् (sic) विपक्षात्सर्वज्ञत्वावीतरागादिमत्त्वात्संदिग्धः &c.

p. 78, l. 23, परस्परस्य A परस्परस्मात्.

p. 80, l. 8, यकाभ्यां, A याभ्यां. l. 11, साधारणानैकान्तिकः, A साधारणानैकान्तिक०.—०व्यावृत्तिकः, A adds the figure 2.

p. 81, l. 7, भवन्सर्वः, A भवन् सर्वः.

p. 82, l. 9, अपरभावनिश्चयन०, A omits निश्चयन०.

p. 83, l. 2, निश्चयायोगात्, B निश्चययोगात्. l. 5, प्राणादि०, A प्रमाणादि०. l. 11, B drops a line, writing साध्यस्ये योर्हि (sic). l. 13, सिद्धिः, B असिद्धिः. l. 18, B omits वा. l. 21, A omits one वेन.

p. 84, l. 2, विरुद्धं यत्, B यद्विरुद्धं l. 18, स्यात्, B स्यादेति तत्.

p. 85, l. 7, A omits तदर्थेति. l. 11, A writes ०आगमाश्रयो.

p. 86, l. 4, एकं, B एव. संबन्धिभिः, B स्वसंबन्धिभिः. l. 9, च, B वा.

p. 87, l. 1, समवायलक्षणः, A समवायलक्षण०. l. 2, तेन, B अनेन. l. 4, तत्क्रोडी०, B न क्रोडी०. l. 6, तद्देशसत्ताभावे, B तद्देशसत्तायाअभावे. l. 12, तत्तत्र, A ततत्तत्र, B तत्तत्र. l. 17, व्यक्तिशून्ये, A शून्ये. l. 21, B omits व्यक्त्यन्तरेषु.

p. 88, l. 1, तदागमसिद्धस्य, A तदागममसि० (sic), B तस्मादागम०. l. 2, सर्वगतत्वासर्वगतत्वयोः, B सर्वगतत्वयोः. l. 3, अभिसंबन्धित्वं, B अभिसंबद्धत्वं l. 6, उक्ता विरुद्ध०, B उक्तौ। इह विरुद्ध०. l. 7, न च वस्त्वन्यस्य, B न वस्त्वन्यस्य हेतोः. l. 10, B omits उक्तः. l. 11, तावतैवेति, A

तावता चेति. l. 12, अतः, B ततः. l. 13, तद्वचनं, B ततस्तद्वचनं. l. 18, B omits इति.

p. 89, l. 2, A omits ज्ञानं. l. 3, अभेदेनोक्तं, B उक्तमभेदेन. l. 5, B omits यत्. l. 9, विज्ञाते, B ज्ञाते. l. 12, B तस्य, B साधनमात्रस्य. l. 18, एवं B adds च.

p. 90, l. 1, इतरच्च, A adds इति. l. 5, साधर्म्य०, B साधर्म्ये. l. 8, सदसत्त्वे, A adds the figure 2. l. 17 साधर्म्य०, B साध्य०. l. 21, दृष्टान्तव्यतिरेकेण, B दृष्टान्तमन्तरेण. l. 22, B puts the न before हेतोः.

p. 91, l. 5, प्रदर्शनः, A writes प्रदर्शिन, (as it always writes दर्शयिता), B दर्शकः.—प्रदर्शिते, B दर्शिते. l. 9, B omits वैधर्म्य-दृष्टान्तस्य तत्. l. 11, दृष्टान्तस्य दोषा; A is defective from here; at the end of the line दोषा is wanting; B दृष्टान्त-दोषा. l. 13, omits दृष्टान्तः. l. 14, उक्तं भवति, B इत्येतदुक्तं भवति. l. 16, शब्दस्य नित्यत्वे साध्ये, B नित्यत्वे साध्ये शब्दस्य.

p. 92, l. 15, रागादिमत्त्वं, A रागादिमत्त्वे. l. 18, गृह्यते, B संगृह्यते. l. 18, वाद्यपि, A विद्यपि. l. 22, B omits अत्र.

p. 93, l. 2, शक्यः, B शक्यते.—अनित्यत्व०, B अनित्य. l. 4, अनित्यत्व०, B अनित्यत्वे. l. 5, दृष्टान्तः; B goes on to तदर्थस्य, 10, from a common cause of error. l. 6, प्रदर्शितान्वयः is from conjecture, the mutilated line breaking off at प्र. l. 22, A omits तथाप्यनियतं.

p. 94, l. 1, वक्तृदोषात्, A writes वक्तृ दोषात्, B वक्तृदोषात्. l. 2, नव दृष्टान्त०, B तद्दृष्टान्त०. l. 4, नव, B अपि.—वक्तुमाह, B वक्तुकाम आह. l. 5, परमाणुवत्, B परमाणु०. l. 9, दृश्यभावः, B निदृत्ताभावः (sic).

p. 95, l. 13, आत्मो यत्र, B यत्र आत्मः. l. 14, रागादि०, B रोगादि०. l. 17, त इति, B त इतीह. l. 20, त्रयीविदा, B त्रयीविदः.

p. 96, l. 9, ०योगस्य, A योगलक्ष.—निवृत्तिः. from B, A व्य, the line breaking off.

p. 97, l. 2, ख्यापितः, A ख्यापितः. — B omits इति. l. 14, दृष्टान्तेन सिद्धः, B दृष्टान्तेनासिद्धः. l. 18, अतः, B अयं.

p. 98, l. 3, B संभाव्यते.—प्रतीयेत, B प्रतीयते. l. 12, ०प्रदर्शनाय, B ०प्रदर्शना हि. l. 19, ०प्रतीतये, B ०प्रतिपत्तये.

p. 99, l. 6, अस्ति, B adds एव. l. 7, दूषणवत्, B दूषणावत्. l. 9, B omits इति. l. 17, समाप्तेयं &c. B आचार्यधर्मोत्तरपाद-विरचितायां न्यायबिन्दुटीकायां तृतीयः परिच्छेदः समाप्तः ॥

परिग्रहण संख्या .. 16114
ग्रंथ २, केन्द्र सु पुस्त तिब्बती
शिक्षा संस्थान, सारनाथ, वाराणसी